99 - (1c)

Mahamahopadhyaya
HARAPRASAD SASTRI
M. A., C. I. E.

26, Pataldanga Street,
Calcutta .... 191 ,

No. 3 - Madanapālavinoda nighaṇṭu (or, A Book of Synonyms of Medical Terms for the delectation of Madana, who was a petty prince in the Province of Delhi about 1375 A.D.)

Attributed to Madanapāla, raja of Kastha, near Delhi

Substance - Country-made paper, yellow on one side and white on the other. [not always]

No. of leaves — 67 and an index of ~~11 pages~~ 6 leaves all white.

Lines — 11 ~~12~~ in a page.

No. of chapters — 13.

Character — Devanagar of the 19th Century.

not dated

23.VI.19

MADANAPĀLA.

99. Sanskrit MS. in Devanāgarī characters, on country-made paper: undated but written in the 19th cent.: $10\frac{1}{4} \times 5\frac{1}{2}$ in., 67+6 leaves.

Madanapālavinodanighaṇṭu, a vocabulary of materia medica composed in 1375 A. D. Attributed to Madanapāla, rajah of Kastha, near Delhi.

मदनविनोदनिघंटस्यसूचीपत्रं

मदनविनोदनिघंटस्य सूचीपत्रमिदम्

मदनविनोदनिघंटस्यसूचीपत्रम्

मदनविनोदनिघंटस्य सूचीपत्रमिदम्

मदनविनोदनिघंटस्य सूचीपत्रमिदम

मदनविनोदनिघंटस्यसूचीपत्रमिदम्

मदनविनोदनिघंटस्यसूचीपत्रम्

द्रव्यनामगुणाः	पत्र	पृष्ठ	पंक्ति
सालेनामगुणाः इ॰ साल	२९	२	४
तमालनामगु॰	२९	२	५
खयरनामगु॰	२९	२	६
रेवत इ॰ रमजा	२९	२	९
वंदूलनामगु॰	२९	२	१०
विजयसारनामगु॰	२९	२	११
तिनिशनामगु॰	३०	१	२
भोजपत्र नामगुणाः	३०	१	३
पलाशनामगु॰	३०	१	४
धव धामिनि	३०	१	६
सहिजन नामगु॰	३०	१	७
सिहोर नामगुणाः	३०	१	९
वरणा नामगुणाः	३०	१	१०
झिंगिणी नामगु॰	३०	१	११
साल इ॰ सालई	३०	२	१
हिंगोर नामगुणाः	३०	२	३
करहेरीनामगुणाः	३०	२	४
मोखनामगु॰	३०	२	६
फरासनामगुणाः	३०	२	८
सेमरिनामगु॰	३०	२	९
स्वेतकुलानामगुणाः	३०	२	११
सनपुत इ॰ कुकुरमुता	३१	१	१
हलदरु इ॰ हरदुआ	३१	१	२
करंज॰ नामगुणाः	३१	१	३
करंजीनामगुणाः	३१	१	६
तिरगिसीनामगु॰	३१	१	७
छोकरा नामगुणाः	३१	१	८
डिंढिणीनामगु॰	३१	१	१०
रीठा नामगुणाः	३१	१	११
सीसवनामगुणाः	३१	२	१
अगस्त्यनामगुणाः	३१	२	३
दारवनामगुणाः	३१	२	८
अश्मन्त्र नामगुणाः	३२	१	१
जामुनि रायजामुनि	३२	१	७
नारिअर नामगुणाः	३२	१	१०
छोहारा नामगुणाः	३२	२	१
सिलेमानीखजूर	३२	२	४
केरा नामगुणाः	३२	२	६
अनार नामगुणाः	३२	२	८
बेरि नामगुणाः	३२	२	११
बेरिभेद नामगु॰	३३	१	१
खिरिणी नामगुणाः	३३	१	६
चिरौंजी नामगुणाः	३३	१	८
फालसा नामगु	३३	१	९
तेंदू पसेंदू	३३	१	११
काको नामगुणाः	३३	२	३
आडु नामगुणाः	३३	२	४
महुआ नामगु॰	३३	२	५
कटहर नामगुणाः	३३	२	९
बडहर नामगुणाः	३३	२	११
ताड नामगुणाः	३४	१	१
खजूर नामगुणाः	३४	१	३
सेव नामगुणाः	३४	१	५
अमृतफल इ॰ सरबती	३४	१	७
बदाम नामगुणाः	३४	१	८
पिस्ता नामगुणाः	३४	१	९
इलायची नामगुणाः	३४	२	१
आडू नामगुणाः	३४	२	२
अंजीर नामगुणाः	३४	२	३
अखरोट नामगुणाः	३४	२	४
पालेवक नाशावक	३४	२	५
तूत ४	३४	२	७
तूवर इ॰ खपातूत	३४	२	११
बिजौरा नामगुणाः	३५	१	१
मीठाकाकरी	३५	१	५
नारंगी नामगुणाः	३५	१	६
जंबीरी नामगु॰	३५	१	८
अम्लवेत	३५	१	९
अम्लवेती	३५	१	१०
निंबूद्वयनामगु॰	३५	१	११

मदनविनोदनिघंटस्यसूचीपत्रम्

द्रव्यनामगुणाः	पत्र	पृष्ठ	पंक्ति	द्रव्यनामगुणाः	पत्र	पृष्ठ	पंक्ति
कमरखनामगुणाः	३५	२	२	डोडीनामगुणाः	३८	१	२
अमिलीनामगु०	३५	२	३	डिंडिश इ० डिंढिसी	३८	१	३
तिंतिणीकनामगु०	३५	२	५	वडीसेमिनामगुणाः	३८	१	४
कौशानामगुणाः	३५	२	६	छोटीसेमिनामगु०	३८	१	५
कैथनामगु०	३५	२	८	बथुआनामगु०	३८	१	६
कैतपत्रीनामगुणाः	३५	२	१०	चंदनबथुआ लालसपेद	३८	१	८
आमहूतनामगुणाः	३५	२	११	चिल्लीनामगुणाः	३८	१	९
राजाम्रनामगु०	३६	१	१	कालशाक इ० मटर	३८	१	११
चतुरम्लपंचाम्ल	३६	१	२	चौलाईनामगुणाः	३८	२	२
सोपारीनामगु०	३६	१	५	फोगनामगुणाः	३८	२	४
ताम्बूलनामगुणाः	३६	१	७	परवरनामगु०	३८	२	५
हरफारेवडीनामगु०	३६	१	९	वनपरवरनामगु०	३८	२	८
लवलीनामगु०	३६	१	११	चिचिंडानामगु०	३८	२	९
कूष्माण्डनामगु०	३६	२	५	पालकनामगुणाः	३८	२	१०
कर्कारु इ० रकसा	३६	२	९	श्वेतकलपोई	३९	१	१
कालिंद इ० तरबूज	३६	२	११	लोणिआनामगुणाः	३९	१	२
मीठीतुंबीनामगुणाः	३७	१	१	कुरवारीनामगु०	३९	१	५
कडुतुंबीनामगु०	३७	१	२	नाडीनामगुणाः	३९	१	६
काकडीनामगुणाः	३७	१	३	सरसोंकाडरनामगु०	३९	१	८
वालमखीरानामगु०	३७	१	५	चणाकनामगुणाः	३९	१	९
चिर्भटी इ० फूट	३७	१	७	मटरनामगुणाः	३९	१	१०
वालुक इ० पेहटा	३७	१	९	चौरीनामगुणाः	३९	१	११
सेधिकचरिआ	३७	१	१०	कसेरी गाजर	३९	२	१
कटुतरोईनामगुणाः	३७	१	११	मूलीनामगुणाः	३९	२	३
मीठीतरोईनामगुणाः	३७	२	२	करीरनामगुणाः	३९	२	६
घीआतरोई	३७	२	३	सहिजननामगुणाः	३९	२	७
वेंगणनामगुणाः	३७	२	४	लहसुननामगु०	३९	२	११
श्वेतवेंगण	३७	२	७	प्याजनामगुणाः	४०	१	३
कंडूरीनामगुणाः	३७	२	८	सलगमनामगुणाः	४०	१	४
करेलानामगुणाः	३७	२	१०	सूरणनामगुणाः	४०	१	५
ककोडा इ० खेखसा	३८	१	१	अस्थिसंहार इ० हडजोर	४०	१	७
वांझककोडीनामगुणाः	३८	१	१	वाराहीकंदनामगु०	४०	१	८

मदनविनोदस्य सूचीपत्रमिदम्

मदनविनोदनिघंटस्यसूचीपत्रमिदम्

मदनविनोदनिघंटस्यसूचीपत्रमिदम्

इतिमदनविनोदनिघंटस्य
सूचीपत्रंसमाप्तम् ॥

श्रीरामः

श्रीगुरुचरणकमलेभ्योनमोनमः॥ ॥ वीजंश्रुतीनांस्तुषनंमुनीनांजीवंजडानांमहदादिकानां॥ आग्नेयमस्त्रंभ
वपातकानांकिंचिन्महःश्यामलमाश्रयामि॥१॥ लम्बोष्ठाकपोलमधुवासिमधुव्रतालीकुंभस्थलीमदविभूषितलो
हितांगी॥ माणिक्यमौलिरिवराजतियस्यमौलौविघ्नंसधूनयतुविघ्नपतिःसदावः॥२॥ योध्वांतसंततिविशालपयोधि
मध्यान्निःकामयत्यशरणांभुवनंनिमज्जत्॥ दत्वाजगत्त्रयहितंस्वकरावलंबंवांछांसवोदिनकरःसफलीकरोतु॥३॥
मिथ्याशनादिकृतदोषचयप्रकोपनघेउवर्धितउपद्रवनक्रमीने॥ रोगांबुधौभवजनस्यनिमज्जतोयःपोतःप्रय
छतुशुभानिसकाशिराजः॥४॥ केचित्संतिनिघंटवोतिलघवःकेचिन्महांतःपरेकेचिदुर्गमनामकाःकतिपयेभाव
स्वभावोज्झिताः॥ तस्मान्नातिलघुर्नचातिविपुलःख्यातादिनामास्ततोप्रीत्यैद्रव्यगुणान्वितोयमधुनाग्रंथोमयाव
ध्यते॥५॥ सर्वैकायेनसंसाध्यंतस्याःपुंस्थितिकारणं॥ आयुर्वेदोपदेशास्तुवास्यनस्यात्स्वरवावहः॥६॥ तत्रापिपूर्वं
ज्ञातव्याद्रव्यनामगुणागुणाः॥ अतस्तएववक्ष्यंतेतद्ज्ञानेहिक्रियाक्रमः॥७॥ अथहरीतकीनामगुणाः॥ शि
वाहरीतकीपथ्याचेतकीविजयाजया॥ प्रपथ्याप्रमदामोघाकायस्याप्राणदामृता॥८॥ जीवनीयाहैमवतीपू
तनाएतनाभया॥ वयस्थानंदिनीरोयाश्रेयसीरोहिणीतथा॥९॥ हरीतकीपंचरसालवणातुवरोत्कटा॥ रूक्षोष्णा

दीपनी मेध्या स्वादुपाका रसायनी ॥ १० ॥ सरा वृंहिप्रदायुष्या चक्षुष्या रूंहरी लघुः ॥ श्वासकासप्रमेहार्शःकुष्ठशोफे
दरक्रिमीन् ॥ ११ ॥ वैस्वर्यग्रहणीदोषविबंधविषमज्वरान् ॥ गुल्माध्मानव्रणाछर्दिहिक्काकंडूहृदामयान् ॥ १२ ॥ कामलां
शूलमानाहप्लीहानं चापकर्षति ॥ मधुरा म्लतया वातं कषायस्वादुभावतः ॥ पित्तं हंति कफं हंति कटुत्वेन हरीतकी ॥ वा
तघ्नी लवणैः पथ्या पित्तघ्नी छतसंयुता ॥ नागरेणा कफं हंति सर्वरोगान्गुडान्विताः ॥ १५ ॥ अथामलीनाम ॥ धात्रीफला
मृतफला मलकैले श्री फलं शिवं ॥ तद्धात्रीफलं वृष्यं विशेषाद्रक्तपित्तजित् ॥ १६ ॥ अम्लत्वात्पवनं हंति पित्तं माधुर्यशैत्य
तः ॥ कफं रूक्षकषायत्वात्तस्मात्त्रिमधिकं फलं ॥ १७ ॥ अथ वहेरानाम ॥ विभीतकः कर्षफलो भूतावासः कलिद्रुमः ॥ वा
सेतोक्षो विंध्यजातः संवर्त्तस्तिलपुष्पकः ॥ १८ ॥ विभीतकः स्वादुपाकः कषायः कफपित्तनुत ॥ उष्णवीर्यो हिमस्पर्शो भे
दनः कासनाशनः ॥ १९ ॥ रूक्षो नेत्रहितः केश्यो मज्जातो मदकारकः ॥ अथ त्रिफलालक्षणं ॥ एका हरीतकी योज्या
द्वौ च योज्यौ विभीतकौ ॥ चत्वार्यामलकान्याहुस्त्रिफलैषा प्रकीर्तिता ॥ श्लो ॥ अथ भूम्यावलानाम ॥ भूधात्री बहुपत्रा
स्यात्तमरा तामलकी शिवा ॥ भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ॥ २१ ॥ पिपासाकासपित्तास्रकफपांडुक्षताप
हा ॥ अथ पानीआवला ॥ प्राचीनामलकं प्राचीनागरं तिक्तकं मतं ॥ तत्स्यक्तं पित्तकफकृत्तद् उक्तं गुरु समीरजित ॥ २२ ॥

त्रिफले त्रय एतास्या ऽथ श्रेष्ठा फलोत्तमा त्रिफला कुष्ठमेहास्रकफपित्तविना
शिनी चक्षुष्या रोपणी हृद्या वयस्स्थापनी सरा ३ त्रुटिरिति ॥

अरूसः

अथ वासानाम॥ वासा वृषः सिंहमुखी भिषङ्माता टरूषकः॥ शीतवल्ली सिंहकर्णी मातृका सिंहवल्लिका॥ २३॥ वृषः सिंही
सिंहमुखी वासको वाजिदंतकः॥ शुक्ला हैमवती चैव सिंहास्यो वाजिदंतकः॥ २४॥ वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः॥
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः॥ २५॥ अथ गुडूचीनाम॥ गुडूची कुंडली छिन्ना वयस्थामृतवल्लरी॥ छिन्नोद्भ
वा छिन्नरुहा ऽमृता ज्वरविनाशिनी॥ २६॥ वत्सादनी चंद्रहासा जीवंती चक्रलक्षणा॥ गुडूची कटुका लघ्वी स्वादुपाका र
सायनी॥ २७॥ संग्राहिणी कषायोष्णा बल्या तिक्ताग्निदीपनी॥ कामलाकुष्ठवातास्रज्वरपित्तकृमीन्जयेत्॥ २८॥ घृते
न वातं सगुडा विबंधं पित्तं सिताढ्या मधुना कफं च॥ वातास्रमुग्रं रुबुतैलमिश्रा शुंठ्यामवातं शमयेद्गुडूची॥ २९॥ अथ
विल्वनाम॥ विल्वं शलाटुः शैलूषो मालूरश्च सदाफलः॥ लक्ष्मीफलो गंधगर्भः शांडिल्यः कंटकी मतः॥ ३०॥ विल्वं ग्रा
हि कषायोष्णं कटु दीपनपाचनं॥ बल्यं हृद्यं लघु स्निग्धं तिक्तं वातकफापहं॥ ३१॥ पक्वं गुरु त्रिदोषं स्याद्दुर्जरं पूतिमा
रुतं॥ विदाहि विष्टंभकरं मधुरं वह्निमांद्यकृत॥ ३२॥ ग्राहिणी कफवातामशूलघ्नी विल्वपेशिका॥ वातश्लेष्मह
रं तस्य पत्रं संग्राहि वातजित्॥ ३३॥ कांजिके संस्थितं विल्वमग्निसंदीपनं परं॥ हृद्यं रुचकरं प्रोक्तमामवातविनाशनं
॥ ३४॥ अथ अरणीनाम॥ अग्निमंथो जयः केतुररणी वैजयंतिकाः॥ जयाजयंती तर्कारी नादेयी भमजेवका॥ ३५॥

पाडरि इति प्रसिद्धं

अग्निमंथः श्वयथुहृद्वीर्योष्णः कफवातनुत ॥ अथ पाटलानाम ॥ पाटला कामदूती स्यात्कुंभीका कालवृंतिका ॥ स्था
ल्यमोघा मधुदूती ताम्रपुष्पी स्तुवासिनी ॥ ३५ ॥ अन्या फलेरुहा श्वेता कुंभीका काष्ठपाटला ॥ पाटला रुचिशोषास्र
श्वासतृट्छर्दिनाशिनी ॥ ३६ ॥ अनुष्णानुवरा स्वादुः तत्पुष्पं कफरक्तनुत ॥ पित्तातिसारदाहघ्नं फलं हिक्कास्रपित्तनुत ॥ ३७ ॥
अथ कुंभेरिनाम ॥ काश्मरी सर्वतोभद्रा श्रीपर्णी कृष्णवृंतिका कुंभारी काश्मरी हीरा काश्मर्यो भद्रपर्णिका ॥ ३८ ॥ का
श्मरी ज्वरशूलघ्नी वीर्योष्णा मधुरा गुरुः ॥ तत्पुष्पं वातलं ग्राहि पित्तास्रकप्रदरापहं ॥ ४० ॥ फलं रसायनं केश्यं बृंहणं हृद्यं श्रु
र्म्लं गुरु ॥ वातपित्तक्षयतृष्णा रक्तमूत्रविबंधनुत ॥ ४१ ॥ अथ अरलुनाम ॥ श्योनाकः पृथुशिंबः स्याच्छुक
नासा कुटुंनटः ॥ भूतवृक्षश्च कट्वंगः टुंटुकः सल्लकोरलुः ॥ ४२ ॥ मयूरजंघो भल्लूकः प्रियंजीवः कटुंभरः ॥ श्योनाको
दीपनः पाके कटुस्तंभनको हिमः ॥ ४३ ॥ ग्राही तिक्तोनिलश्लेष्मपित्तकासामनाशनः ॥ ४४ ॥ अथ महत्पंचमूलनामः ॥ बिल्वा
दिभिः पंचभिरेभिरेतैः स्यात्पंचमूलं महदग्निकारि ॥ लघु सतिक्तं रसतः कषायं मेदःकफश्वाससमीरहारि ॥ ४५ ॥
अथ गोक्षुरनाम ॥ गोक्षुरस्त्रिकटः कंटः फलः स्यात्स्वादुकंटकः ॥ गोकंटको भक्षकंटस्त्रिकंटो व्यालदंष्ट्रकः ॥ ४६ ॥
श्वदंष्ट्रः स्थूलशृंगाटः षडंगः क्षुरकः स्त्रिकः ॥ गोक्षुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः ॥ ४७ ॥ प्रमेहश्वासकासा ।

स्तुवरको हिमः ॥ छि ४

श्रमकृच्छ्रहृद्रोगवातजित्॥४८॥ अथ सालपर्णीनाम॥ शालपर्णी ध्रुवा सौम्या त्रिपर्णी पीतनी स्थिरा॥ विदारिगंधाति
गुहा दीर्घमूलांशुमत्यपि॥४९॥ शालपर्णी गुरुश्छर्दि ज्वरश्वासातिसारजित्॥ शोषदोषत्रयहरा बृंहण्युक्ता रसायनी॥
५०॥ अथ पृष्टिपर्णीनामः॥ पृष्टिपर्णी क्रोष्टुपुच्छा धावनी कलशी गुहा॥ शृगालविन्ना जटिला पृथक्पर्णी च पर्णिका
५१॥ पृष्टिपर्णी लघुर्वृष्या मधुरोष्णा विनाशयेत्॥ रक्तातीसारदाहार्ति दोषत्रयवमिज्वरान्॥५२॥ वडी कटेरीनाम॥ वृ
हती स्थूलभंटाकी विशदा च महोत्कटा॥ वार्त्ताकी महती सिंधी कंटकी राष्ट्रिका कुली॥५३॥ वृहती ग्राहिणी हृद्या पाच
नी कफवातजित्॥ अरुच्याकुष्ठज्वरश्वासशूलकासाग्निमांद्यजित्॥५४॥ छोटी कटेरीनाम॥ कंटालिका कंटकिनी कंट
कारी निदिग्धिका॥ दुःस्पर्शा धावनी क्षुद्रा व्याघ्री दुःप्रधर्षिणी॥५५॥ स्वेतकटेरीनाम॥ सितक्षुद्रा चंद्रहासा ल।
क्ष्मणा क्षेत्रदूतिका॥ कंटकारी सरा तिक्ता कटुका दीपनी लघुः॥५६॥ रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्॥
निहंति पीनसं पार्श्वपीडाकृमिहृदामयान्॥५७॥ तद्वत्योक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी॥ अथ लघुपंचमूल
नाम॥ ह्रस्वाख्यं पंचमूलं स्यात्पंचभिर्गोक्षुरादिभिः॥ वल्यं पित्तानिलहरं नात्युष्णं स्वादु बृंहणं॥५८॥ अथ दशमू
लनाम॥ एताभ्यां पंचमूलाभ्यां दशमूलमुदाहृते॥ दोषत्रयश्वासकासशिरःपीडापतंत्रकान्॥५९॥ अथायाष्टवर्गोल

॥रामः॥

तंद्रास्वेदज्वरानाहारुचिपार्श्वरुजो जयेत् १

स्त्रगो॥ श्वेतलोमान्वितः कंदो लताजातः सच्छिद्रकः॥ ऋद्धिर्वृद्धिश्च विज्ञेया विख्याता कोशजामले॥ ३०॥ तूलग्रंथि
समा ऋद्धिर्वामावर्त्तफला तथा॥ वृद्धिस्तु दक्षिणावर्त्तफला लक्ष्या कृता कृता॥ ३१॥ पीवरीसदृशः कंदः शुष्कः सारः सु
गंधिकः॥ काकोलीक्षीरकाकोलीअ॰ थोर्थं तं विनिर्दिशेत्॥ ३२॥ ईषच्छुक्ला तु काकोली क्षीरवत्यां दुरापरा॥ शुष्का
द्रकनिभः कंदः स्निग्धो मधुरशीतलः॥ ३३॥ महाद्वैमेति विख्याता ङ्गौधोमेद उच्यते॥ रसोनकंदवत्कंदो निःसारः
सूक्ष्मपत्रकः॥ ३४॥ जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ॥ जीवकः कूर्चिकाकारो ऋषभो वृषशृंगवत्॥ ३५॥
अथ ऋद्धिवृद्धिनाम॥ ऋद्धिर्वृद्धिर्युगं लक्ष्मीः सिद्धिः सर्वजनप्रिया॥ ऋद्धिः श्रेष्ठा रथांगस्था मंगल्या आवर्ता व
सुः॥ ३६॥ योग्य पुग्मा तुष्टिराशीर्वृद्धिरप्येतदाह्वया॥ ऋद्धिर्वृद्धिश्च द्वे एते विख्याते कोशयामले॥ ३७॥ ऋद्धिर्वृद्धिर्वला
त्रिदोषघ्नी शुक्रला मधुरा गुरुः॥ वृद्धिर्गर्भप्रदा शीता वृष्या कासक्षयास्रनुत्॥ ३८॥ अथ काकोलीक्षीरकाकोलीनाम
काकोली मधुरा वीरा वयस्था क्षीरशुक्लिका॥ ध्वांक्षोली वायसोली स्यात्स्वादुमांसी पयस्विनी॥ ३९॥ द्वितीया क्षीर
काकोली स्याद्हृक्षीरिणी मता॥ काकोली युगलं शीतं शुक्रलं मधुरं गुरु॥ ४०॥ जयेत्समीरदाहास्रपित्तशोष
तृषाज्वरान्॥ ४१॥ अथ मेदामहामेदानाम॥ मेदा जेया शल्यपर्णी मेदा मेदोद्भवोध्वरा॥ महामेदा वसुच्छिद्रा त्रि

जीवकऋषभके ४

दंता देवतामणिः ॥७२॥ मेदायुगं गुरु स्वादु वृष्यं स्तन्यं कफापहं ॥ बृंहणं शीतलं पित्तरक्तक्षयसमीरजित ॥७३॥ अ
थ जीवकऋषभकनाम ॥ जीवको मधुरः शृंगो ह्रस्वांगः कूर्चशीर्षकः ॥ ऋषभो वीर इंद्राक्षो विषाणी दुर्धरो वृषः ॥
७४॥ जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ॥ हरतः पित्तदाहास्रकार्श्यवातक्षयामयान ॥७५॥ अष्टवर्गोष्टभि
द्रव्यैरेतैः शीतोतिशुक्रलः ॥ बृंहणः पित्तदाहास्रशोषघ्नः स्तन्यगर्भकृत ॥७६॥ ऋध्यभावे वलां योज्या वृध्यभावे म
हाबलाः ॥ काकोलीयुगलाभावे निक्षिपेच्च शतावरी ॥७७॥ मेदाभावे अश्वगंधा महामेदे प्रसारिणी ॥ जीवकार्षभ
काभावे गुडूचीं वंशलोचना ॥७८॥ अथ जीवंतीनाम ॥ जीवंती जीवनी जीवा जीवनीया यशस्करी ॥ शाकश्रेष्ठा जीवभ
द्रा मांगल्या जीववर्धिनी ॥७९॥ जीवंती शीतला स्वादु स्निग्धा दोषत्रयापहा ॥ रसायनी बलकरी चक्षुष्या ग्राहिणी
लघुः ॥८०॥ अथ जेष्ठीमधनाम ॥ मधुयष्टी क्लीतनकं यष्टीमधु मधूलिका ॥ यष्ट्याह्वा मधुकं यष्टीमधुकं जलजं नाम
धा ॥८१॥ मधुयष्टी गुरुः शीता बल्या तृट्छर्दिजित ॥ अथ माषपर्णी मुद्गपर्णीनाम ॥ माषपर्णी कृष्णवृंता कांबोजी हय
पुच्छिका ॥ मांसमाषा सिंहमुखी स्वादुमाषा महासहा ॥८२॥ मुद्गपर्णी क्षुद्रसहा सूर्यपर्णी कुरंगिणी ॥ वनजा रिंगि
णी सिवी सिंही मार्जारिगंधिका ॥८३॥ माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलावहा ॥ मधुरा ग्राहिणी शोथवातपि

तज्ज्वरास्त्रनुत ॥२४॥ तद्द्वयं मुद्गपर्णी त्रिदोषघ्नी हिमा लघुः ॥२५॥ अथ जीवनीयगणः ॥ जीवन्ती स्वर्णपर्णी युक्ता काको
ल्यौ जीवकर्षभौ ॥ मेदायष्टीति मधुरो जीवनीयो गणो गुरुः ॥२६॥ शुक्रकृत् बृंहणः शीतः स्तन्यगर्भकफप्रदः ॥ रक्तपित्त
तृषाशोषज्वरदाहक्षतापहः ॥२७॥ अथैरण्डः रक्तैरण्डनाम ॥ एरण्डो दीर्घदण्डः स्यात्तरुणो वर्धमानकः ॥ चित्रः पञ्चाङ्गुलो
व्याघ्रपुच्छो गन्धर्वहस्तकः ॥२८॥ रक्तैरण्डो हस्तिकर्णो व्याघ्रो व्याघ्रतरो रुबुः ॥ उत्तानपत्रः रुबुर्वातवैरी चञ्चे चलः ॥२९
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ॥ शूलशोफकटीबस्तिशिरःपीडोदरज्वरान् ॥३०॥ ब्रध्नश्वासकफानाहका
सकुष्ठाममारुतान् ॥ तत्फले भेदने स्वादुः क्षारमुष्णं समीरजित् ॥३१॥ अथ सारिवाकृष्णसारिवानाम ॥ सारिवा शार
दा स्फोता गोपकन्या प्रतानिका ॥ गोपाङ्गना गोपवल्ली लता स्फोता कृष्णसारिवा ॥३२॥ सारिवान्या कृष्णमूला भद्रचन्द
न सारिवा ॥ सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ॥३३॥ दोषत्रयास्रप्रदरज्वरातीसारनाशनं ॥ अथ यवा
सधमासनाम ॥ यासो मरुद्भवोऽनन्तो दीर्घमूलो यवासकः ॥ बालपत्रः समुद्रान्तो दूरमूलोऽतिकण्टकः ॥३४॥ धन्वया
सस्ताम्रमूलो दुःस्पर्शी स्याद् दुरालभाः ॥ यासकः कटुरातास्रमूलो धन्वयवासकः ॥३५॥ यासः स्वादुः सरस्तिक्तो
हिमः पित्तहरो लघुः ॥ हन्ति रक्तकफश्रान्ती तत्तद्वत् धन्वयवासकः ॥३६॥ अथ — गोरखमुण्डीनाम ॥ मुण्डी भिक्षुः ।

॥श्रीगुरुः॥

॥५॥

॥म.वि.नि.॥ परिव्राजी श्रावणी स्यात्तपोधना ॥ श्रावणी श्रीमती मुंडीतिक्ता श्रावणशीर्षकाः ॥९७॥ मुंडी तिक्ता कटुः पाके वीर्यो
ष्णा मधुरा लघुः ॥ मेध्या गंडापचीकृच्छ्रकृमियोन्यर्तिपांडुनुत् ॥९८॥ अथ वडीमुंडीनाम ॥ महामुंडी लोमनीया छि
न्नाग्रंथिनिका स्मृता ॥ भूतघ्नः कुलहलोऽलंबुषो भूकदंबकः ॥९९॥ कदंबपुष्पी मुंडी च कुरो भूमिकदं
बकः ॥१००॥ अथ [चिचि] औंगानाम ॥ अपामार्गस्तु शिखरी किणिही खरमंजरी ॥ अधःशल्यः शेखरिकः प्रत्यक्पु
ष्पी मयूरकः ॥१०१॥ अपामार्गः सरस्तीक्ष्णो दीपनः कफवातनुत् ॥ निहंति दद्रुसिध्मार्शःकंडूशूलोदरापचीः ॥
१०२ ॥ अथ रक्तऔंगानाम ॥ अन्यो रक्तो रक्तफलो वशिरः कपिपिप्पली ॥ अपामार्गो रुणो वातविष्टंभी कफनाश
नः ॥१०३॥ अन्यस्तूनः पूर्वगुणो रूक्षं तत्फलं रक्तपित्तनुत् ॥ अथ कबीलानाम ॥ कंपिल्लो रोचनो रक्तचूर्णको व्रणशोधनः
लोहितो रक्तशमनो रेची रंजनको मतः ॥१०४॥ कंपिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् ॥ हंति रेची कटू
ष्णश्च तत्फलं ग्राहि शीतलं ॥१०५॥ अथ [दंतीनाम] जमालगोटाकी जड ॥ दंती गुणप्रिया नागदंती शीघ्रानुकूलकः ॥ उप
चित्रानुकुंभी स्याद्विशल्योडुंबरच्छदाः ॥१०६॥ आखुपर्णी वृषेरंडाऽडवंती शंबरी मता ॥ मुषकाह्वा सुतश्रोणी प्रत्य
क्श्रेणी च पंजिका ॥१०७॥ दंतीद्वयं सरं पाके रसयोः कटु दीपनं ॥ तीक्ष्णोष्णं हंति पित्तास्रकफशोफोदरकृमीन् ॥ ॥राम.॥

कामलापित्तं कफशोथोदरापहं तीक्ष्णोष्णं

॥५॥

रसे पाके च मधुरो वल्यो वृष्यश्च बृंहणः ॥ निहं
न्यनिलदाहास्रकासलक्ष्मक्षतक्षतीन् ॥ १ ॥

अथ जम्भलगोटानाम ॥ जयपालो दंतिवीजं ख्यातं तन्तितिरीफलं ॥ जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ॥ अथ स्वे
तनिसोतनाम ॥ त्रिवृत् कुंभो रुणा च्यस्त्रा मंडी कूटरवाहिनी ॥ सर्वानुभूतिस्त्रिवृता त्रिपुटा सरला शिता ॥ ११ ॥ त्रिवृत्ति
क्ता सरा रूक्षा स्वादुरुष्णा समीरजित् ॥ कपांडुके ज्वर श्लेष्म पित्तशोफोदरापहा ॥ ११ ॥ अथ कालानिसोतनाम ॥ त्रिवृ
त्काला कालमेषी कालपर्णार्धचंद्रिका ॥ सुसेणी स्यान्मालविका मसूरविदला मता ॥ १२ ॥ त्रिवृत्काला हीन
गुणा तस्याः स्तीव्रविरेचनी ॥ मूर्छा दाहमदभ्रांति कंठोत्कर्षणकारिणी ॥ १३ ॥ अथ इन्द्रवारुणीनाम ॥ इन्द्रवा
रुण्यथैंद्री स्याद्वृषभाक्षी गवादिनी ॥ ऐंद्रे द्वे वीरुः स्वडुफलादिशाले द्वी विषादिनी ॥ १४ ॥ अन्येन्द्रवारुणी चित्रा फ
ला चित्रा महत्फला ॥ आत्मरक्षा नागदंती त्रपुसी गजचिर्भटी ॥ १५ ॥ श्वेतपुष्पा मृगाक्षी च तत्र पायक्षस्वरा मता
मरूद्वाक्रमिः कुंभा त्रिदेवी च प्रकीर्तिता ॥ १६ ॥ ऐंद्रे द्वेर्वारुदयं तिक्तं कटु पाके सरं लघुः ॥ वीर्योष्णं कामला पित्त
कफश्लीहोदरापहं ॥ १७ ॥ अथ अमिलतासनाम ॥ आरग्वधो राजवृक्षः शंपाकः कृतमालकः ॥ व्याधिघातः क
र्णिकारः प्रग्रहश्चतुरंगुलः ॥ आरोग्यपर्णी स्वर्णोन्दुः कर्णी दीर्घफलो मतः ॥ कुंडली हेमपुष्पी च कलिः स्या
तोन्नपदुमः ॥ १९ ॥ वर्णाशेफालिका साच कुष्ठसूदन नामतः ॥ स्वर्णस्थल्यापि तत्प्रोक्ता स्वर्णो द्रुमप्रकीर्तितः ॥ २० ॥

आरग्वधो गुरुः स्वादुः शीतलो मृदुरेचनः ॥ ज्वरहृद्रोगपित्तास्रवातोदावर्तशूलजित् ॥१२१॥ तत्फलं वातलं ग्राहि तिक्तं पित्त
कफापहं ॥ पत्रमारग्वधस्योक्तं कफमेदोविनाशनं ॥१२२॥ विरेचौ सततं पथ्यं मलदोषसमन्विते ॥ तन्मज्जा मधुरा पाके
स्निग्धा पित्तसमीरनुत् ॥१२३॥ अथ नीलिनीनाम ४ ॥ ॥ नीलिनी नीलिका ग्राम्या श्रीफला भारवाहिनी ॥ रंजि
नी कालिका मेला पूनी गुच्छा विशोधिनी ॥१२४॥ नीलिनी रेचनी तिक्ता केश्या मोह
भ्रमापहा ॥ उष्णा हंत्युदरप्लीहवातरक्तकफानिलान् ॥१२५॥ अथ कटुकीनाम ॥ कटुका रोहिणी तिक्ता चक्रां
गी कटू रोहिणी ॥ मत्स्यपित्ता कांडरुहा ह्यस्निभेदा द्विजांगिका ॥१२६॥ असोकरोहिणी मत्स्या शकुलाशकुला
दनी ॥ कटुकी कटुका पाके तिक्ता रुक्षा सरा लघुः ॥१२७॥ हिमा हंति क्रिमिश्वासदाहपित्तकफज्वरान् ॥१२८॥ अथ
अंकोलनाम ॥ अंकोलकस्ताम्रफलः पीतसारो निकोचकः ॥ गुरुस्नेहो विरेची स्यात् दुमिता दीर्घकीलकः ॥१२९॥
अंकोलकः कटुः स्निग्धस्तीक्ष्णो स्रस्तुवरो लघुः ॥ रेचनः क्रिमिशूलामशोफश्लेष्मविषापहः ॥१३०॥ तत्फलं शीत
लं स्वादु श्लेष्मलं बृंहणं गुरुः ॥ बल्यं विरेचनं वातपित्तदाहक्षयास्रजित् ॥१३१॥ अथ सेहुंडनाम ॥ सेहुंडो वज्रतुंडः स्नु
गंडीरो वज्रकंटकः ॥ स्नुही समंतदुग्धोऽसिपत्रो वज्री महातरुः ॥१३२॥ सेहुंडो रेचनस्तीक्ष्णो दीपनः कटुको गुरुः ॥

शूलामाष्ठीलिकाध्मान गुल्मशोफोदरानिलान् ॥ हंति दूषीविषं प्लीह कुष्ठोन्मादास्मपांडुताः ॥ १३३ ॥ अथ निंब नाम
निंबो नियमनो नेता रिष्टः स्यात्पारिभद्रकः ॥ सुतिक्तः सर्वतोभद्रः पिचुमंदः प्रभद्रकः ॥ १३४ ॥ कुष्ठहा देवदत्तश्च रवि
संनिभिः सूर्यकः ॥ निंबः शीतो लघुर्ग्राही कटुपाको ग्निमांद्यकृत ॥ १३५ ॥ व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनु
त् ॥ अपक्वं पक्वयेन्निंबं पक्वं च परिशोधयेत् ॥ १३६ ॥ तत्फलं भेदनं स्निग्धमुष्णं कुष्ठहरं लघुः ॥ अथ वकाइ निना
म ॥ महानिंबो निंबवारः कार्मुको विषमुष्टिकः ॥ रम्यको गिरिको द्रेकोक्षीरं स्यात्केशमुष्टिकः ॥ १३७ ॥ महानिंबो
हिमो रूक्षस्तिक्तो ग्राही कषायकः ॥ कफपित्तभ्रमिच्छर्दिकुष्ठहृल्लासरक्तजित् ॥ १३८ ॥ अथ किरात नाम ॥ कि
राततिक्तः चैरातः तो भूनिंबो रामसेनकः ॥ किरातको न्यो नैपालो नाडीतिक्तो ज्वरांतकः ॥ १३९ ॥ कांडतिक्तो र्द्धति
क्तः स्यान्निशाहिः सन्निपातहा ॥ किरातो वातलो रूक्षः शीतलस्तिक्तको लघुः ॥ १४० ॥ सन्निपातज्वरश्वासकफपि
त्तास्रदाहनुत् ॥ कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥ १४१ ॥ अथ कुटज नाम ॥ कुटजो मल्लिकापुष्पः का
लिंगो गिरिमल्लिका ॥ वत्सकः कुटजः कोटी वृक्षकः शक्रभूरुहः ॥ १४२ ॥ तत्स्याद्वाकवरा तिक्ताः कुशाली पांडुर
द्रुमः ॥ शतद्रुमो द्रुमः कोयी नीलयष्टीश्च मल्लिका ॥ १४३ ॥ कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ॥ अर्शोतिसा

रपित्तास्रकफत्वगामकुष्ठनुत॥१४४॥तत्फलंवातलंशीतंरक्तपित्तातिसारजित॥१४५॥अथइंद्रयवनाम॥ऐन्द्रोयव
स्तस्यफलेकलिंगःकौटजोमतः॥शक्राह्वपुरुहूतश्चप्रोक्तोभद्रयवस्तथा॥१४६॥ऐंद्रोयवस्त्रिदोषघ्नःसंग्रा
हीशीतलःकटुः॥ज्वरातीसाररक्तार्शःकृमिवीसर्पकुष्ठनुत॥१४७॥दीपनोगुदकीलास्रवातास्रश्रमशूलजित
अथमदनफलनाम॥मदनश्छर्दनःपिंडीतकःपिंडीतकःफलः॥करहाटश्चतुरगःशल्यकोविषपुष्पकः॥१४८॥
मदनोवामनस्तिक्तोवीर्योष्णोभेदनोलघुः रूक्षःकुष्ठकफानाहशोफगुल्मव्रणापहः॥१४९॥अथकंकुष्ठनाम॥
कंकुष्ठंकालकंकुष्ठंरेचनंरंगनायकं॥शोधनंपुलकंहासंवरांगंकिंजुवालकं॥१५०॥कंकुष्ठंरेचनंतिक्तंकटूष्णं
वर्णकारकं॥कृमिशोफोदराध्मानगुल्मानाहकफापहं॥१५१॥अथचोकनाम॥हेमाह्वाकनकक्षीरीहैमदु
ग्धाहिमावती॥क्षीरिणीकांचनक्षीरीकटुपर्णीचकर्षिणी॥१५२॥तिक्तदुग्धाहैमवतीपीतदुग्धाचसामता॥हे
माह्वारेचनीतिक्तामदनुत्क्लेदकारिणी॥१५३॥कृमिकंडूकफानाहविषकुष्ठविनाशिनी॥१५४॥अथसातला
नाम॥सातलाविमलासारीसप्तलाबहुफेनका॥चर्मसाह्वाचर्मकसाफेनाढ्याचर्मनीलिका॥१५५॥सातला
कटुकापाकेवातलाशीतलालघुः॥तिक्ताशोफकफानाहपित्तोदावर्तरक्तजित॥१५६॥अथअश्मंतकनाम

तत्सत्तोत्पन्नं फरिशावविदृ५

॥राम॥

अस्मंतो वालुकापत्रो युग्मपत्रोम्लपत्रकः ॥ श्लक्ष्णत्वगाश्मयोनिः स्यात्कुशाली पापनाशनः ॥ १५७ ॥ अश्मंतस्तुव
रो ग्राही शीतो श्लक्ष्णः कफवातजित् ॥ निहंति गलरोगांश्च गंडमालां गलामयान् ॥ १५८ ॥ तत्फलं लेखनं ग्राहि गुरु श्लेष्मा
निलापहं ॥ अथ कचनारनाम ॥ कांचनारः कांचनकः पाकारी रक्तपुष्पकः ॥ कोविदारोस्य भेदः स्यात्कुद्दालः कुंडली
कुली ॥ १५९ ॥ आस्फोतो हालकः स्वल्पकेसरश्चमरी मतः ॥ कांचनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् ॥ १६० ॥ कृमिकु
ष्ठगुदभ्रंशगंडमालाव्रणापहः ॥ कोविदारोपि तद्वत्स्यात्पुष्पं शीतं तयोर्लघु ॥ १६१ ॥ रूक्षं संग्राहि पित्तास्रप्रदरक्षतका
सनुत् ॥ १६२ ॥ अथ सभालूनाम ॥ निर्गुंडी श्वेतकुशुमः सिंदुकः सिंदुवारकः ॥ भूतकेश्यपरो नीलः सिंदुको नीलपुष्प
कः ॥ १६३ ॥ शेफालिका शीतभीरुर्वनकोनीलमंजरी ॥ निर्गुंडी स्मृतिदा तिक्ता कषाया कटुका लघुः ॥ १६४ ॥ केश्या ।
नेत्रहिता हंतिशूलासोथाममारुतान् ॥ कृमिकुष्ठारुचिश्लेष्माव्रणान्नीलापि तद्विधा ॥ १६५ ॥ अथ मेषशृंगीनाम
मेषशृंगी मेषवल्ली सर्पदंष्ट्राजशृंगिका ॥ अन्यात्तु दक्षिणावर्ता वृश्चिकाली विषाणिका ॥ १६६ ॥ तिक्तदुग्धाक्षिभेष
ज्यापुत्रश्रेणी विषाणिका ॥ उष्ट्रलोमसपुच्छा चरविवत्सादिशृंगिका ॥ १६७ ॥ वृषघ्नीपादवृत्सा च कालीचक्षुष्य
एव च ॥ समूलयुग्दार्वेफलाक्षीराद्वत्सापि मेदिका ॥ १६८ ॥ मेषशृंगी रसे तिक्ता वातला कासनाशिनी ॥ रूक्षा पा

केकटुः पित्तव्रणश्लेष्माक्षिशूलनुत् ॥१६९॥ कासजिन्वातशमनश्वकालीविषापहः ॥१७०॥ अथ पुनर्नवानाम
पुनर्नवा श्वेतमूलः पृथ्वीको दीर्घपत्रकः ॥ विशाखो दीर्घवर्षाभूः पुनर्भूर्मण्डलच्छदः ॥१७१॥ पुनर्नवा सरा तिक्ता रूक्षो-
ष्णा मधुरा गुरुः ॥ शोफानिलव्रणश्लेष्महरा रुच्या रसायनी ॥१७२॥ अथ रक्तपुनर्नवानामः ॥ पुनर्नवा परा रक्ता र-
क्तपुष्पः कठिल्लकः ॥ क्रूरकः स्वदवर्षाभूर्वर्षकेतुः शिवाटिका ॥१७३॥ पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥१७४॥ अथ रास्नानाम ॥ रास्ना रस्या युक्तरसा रसना गंधनाकु-
ली ॥ सुगंधमूला तिरसा श्रेयसी सुवहा रसा ॥१७५॥ रास्नामपाचिनी तिक्ता गुरूष्णा श्लेष्मवातजित् ॥ शोफश्वा-
ससमीरास्रवातशूलोदरापहा ॥१७६॥ अथाश्वगंधानाम ॥ अश्वगंधा तुरंगाह्वा गोकर्णाश्वावरोहकः ॥ वा-
राहकर्णी वरदा बल्या वाजीकरी च वा ॥१७७॥ अश्वगंधानिलश्लेष्मशोफश्वित्रक्षयापहा ॥ बल्या रसायनी
तिक्ता कषायोष्णातिशुक्रला ॥१७८॥ अथ प्रसारिणीनाम ॥ प्रसारिणी राजबला चारुपर्णी प्रतानिका ॥ सरण-
सारिणी भद्रपर्णी सुप्रसरा सरा ॥१७९॥ प्रसारिणी गुरुर्वृष्या संधानबलकृत्सरा ॥ वीर्योष्णा वातनुत्तिक्ता वा-
तरक्तकफापहा ॥१८०॥ अथ शतावरीनाम ॥ शतावरी क्षिपिराञ्चुक्षिपिका धरकेटकी ॥ नारायणी शतपदी शतपा

बहुपुत्रिका ॥१५७॥ शतावरी गुरुः शीता स्वादु स्निग्धा रसायनी ॥ शुक्रस्तन्यकरी बल्या वातपित्तास्रशोफजित् ॥१५८॥ मे
दोग्निपुष्टदा तिक्ता नेत्र्या गुल्मातिसारजित् ॥ अथ महाशतावरीनाम ॥ शतावर्यं डुकं द्रान्या पीवरे दीवरी वरी ॥ अ
भीरुर्वहुपत्रा च महापुरुषदंतिका ॥१५९॥ सहस्रवीर्या वेशी स्यात्तुंगिनी सूक्ष्मपत्रिका ॥ महाशतावरी मेध्या
हृद्या वृष्या रसायनी ॥१६०॥ शीतवीर्या निहंत्यर्शोग्रहणी नयनामयान् ॥ तदंकुरस्त्रिदोषघ्नो लघुरर्शःक्षय
पहः ॥१६१॥ अथ खिरैटी नाम ॥ वला वाट्यालकः शीतपाकी गंधोदनी ह्वयः ॥ भद्रौदनी समंगा स्यात्समोशा ख
रयष्टिका ॥१६२॥ अथ सहदेवी नाम ॥ महाबला वीरपुष्पी सहदेवी च हहला ॥ वाट्यायिनी देवसहा वाट्या स्यात्
पीतपुष्पिका ॥१६३॥ अथ पिपरिणी नाम ॥ वालिकातिवला भारद्वाजी स्याद्धस्वगंधिनी ॥१६४॥ अथ गांगेरुकी
नाम ॥ गांगेरुकी नागवला विश्वदेवा गवेधुका ॥ अथ वलाचतुष्टय नाम ॥ वला चतुष्टयं शीतं मधुरं वलकां
तिकृत् ॥ स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनं १६५ आसो व्यहहलाक्तकृच्छ्रं हंति वातानुलोमनी ॥ गुर्वी ना
गवला वृष्या विशेषाद् अम्लपित्तजित् ॥१६६॥ वल्या रसायनी पुंस्त्ववर्द्धनी च हहणी तथा ॥ तस्याः फलं हिमं स्वादु स्त
भनं गुरु लेखनं ॥१६७॥ विबंधाध्मानजननं रक्तपित्तनिवर्हणं ॥१६८॥ अथ तेजवलनाम ॥ तेजस्विनी तेजवती ते

विश्वदंष्ट्रोत्पला मालाम
तागोक्षीनं डुला ४

॥श्रीगुरुः॥

॥ऽ॥

॥म॰नि॰नि॰॥

जन्यश्च प्रवल्कोला ॥ महोजसी पारिजाता शीता तिक्ता तिनेजिनी ॥ १९३ ॥ तेजस्विनी कफश्वासकासास्यामय
वातजित् ॥ पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥ १९४ ॥ अथ मालकांगुनीनाम ॥ ज्योतिष्मती स्वर्णल
ता कांगुनी कटुभी तथा ॥ ज्योतिका वाग्निभासा चलवणोक्ता च दुर्मता ॥ १९५ ॥ लवणा (लौ) किशुका वेगा काकदंती त्रि
पर्णपि ॥ पारावतपदीपीत्वा पीततैला कटुंदनी ॥ १९६ ॥ ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ॥ श्लेष्मघ्नी
कंठरोगघ्नी पित्तकृत् वह्निदीपनी ॥ १९७ ॥ अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥ अथ देवदारुनाम ॥ दे
वदारु सुराह्वं स्याद्भद्रदारु सुरद्रुमः ॥ भद्रकाष्ठं स्नेहवृक्षः किलिमं शक्रपादपश्च ॥ १९८ ॥ देवदारु कटु स्निग्धं ति
क्तोष्णं लघु नाशयेत् ॥ आध्मानज्वरशोथामहिक्काकंडुकफानिलान् ॥ १९९ ॥ अथ सरल (चीडवृक्ष) नाम ॥ सरलो नंद
नश्चीडो नमेरुर्दीपवृक्षकः ॥ पूतिदारुः पीतवृक्षो महादीर्घंकलिद्रुमः ॥ २०० ॥ सरलः कटुकः पाके रसे च
मधुरो लघुः ॥ उष्णः स्निग्धः समीराक्षिकंठकर्णामयापहः ॥ २०१ ॥ अथ पुष्करमूलनाम ॥ पौष्करं पद्मपत्रं पौ
ष्करं पुष्कराह्वयं ॥ काश्मीरं पुष्करजटा मूलं वीरं सुगंधकं ॥ २०२ ॥ पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ॥ ह
न्ति शोफारुचिश्वासान्विशेषात्पार्श्वशूलनुत् ॥ २०३ ॥ अथ कुष्ठनाम ॥ कुष्ठं रोगाह्वयं वाप्यं कौबेरं पारिभ

॥रामः॥

द्रकं ॥ पारिभद्रं पारिभाद्रमुत्पलं हरिभद्रकं ॥ २०४ ॥ कुष्टमुष्णं कटुस्वादु तिक्तं श्युक्रप्रदं लघुः । हंति वातास्रवीसर्प ।
कासकुष्टमरुत्कफान ॥ २०५ ॥ अथ कर्कटश्रृंगीनाम ॥ श्रृंगी कुलीरश्रृंगी स्यात्कर्कटश्रृंगिका ॥ कर्कटा ।
ख्यामहाघोषा श्रृंगिनाम्नी नतांग्यपि ॥ २०६ ॥ श्रृंगी कषाया तिक्तोष्णा हंत्याध्मानं वमिं ज्वरान ॥ तृष्णारुचिकफश्वा
सक्षयकासोर्द्ध्वमारुतान ॥ २०७ ॥ अथ गंधेलनाम ॥ रोहिषं कत्तृणं भूतिर्भूतिकं सरलं तृणं ॥ श्यामाकं सद्गलं पौ
रं ध्यामकं देवगंधकं ॥ २०८ ॥ रोहिषं कटुकं पाके तिक्तोष्णं तुवरं जयेत ॥ कंठहृद्रोगपित्तास्रशूलकासकफज्वरान ॥
२०९ ॥ अथ कायफलनाम ॥ कट्फलं कुमुदः कुंभी श्रीपर्णी सोमपादपः ॥ सोमवल्को महाकुंभी भद्रा भद्रवती शि
वा ॥ २१० ॥ कट्फलं तुवरं तिक्तं कटु वातकफज्वरान ॥ हंति श्वासप्रमेहार्शः कासकंठामयारुचीन ॥ २११ ॥ अथ भा
रंगीनाम ॥ भार्गी भृंगुभवा पद्मा कासघ्नी भार्गवर्वरी ॥ खरशाकं श्युक्रमाता फंजी ब्राह्मणयष्टिका ॥ २१२ ॥ भा
र्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचिनी जयेत ॥ शोथकासकफश्वासपीनसज्वरमारुतान ॥ २१३ ॥ भार्गी हंति ज्व
रछर्दिकुष्टानीसा[illegible]द्रुजः ॥ दाहकं टु विषश्वासकृमिगुल्मोदरव्रणान ॥ २१४ ॥ अथ पाषाणभेदनाम ॥ पाषाणभे
दः पाषाणोश्मरिभेदोश्मभेदकः ॥ शिलाभेदो दृषद्भेदो नागभिन्नागभेदकः ॥ २१५ ॥ पाषाणभेदस्तुवरः शीत ।

॥श्रीगुरुः॥

॥१९॥

॥म॰वि॰नि॰॥

लोबस्तिशोधनः॥सरस्तिक्तप्रमेहलर्शः कफ्कासमेदोजयेत्॥२१६॥अथनागरमोथानामः॥मुस्तंवारधरोमु
स्तामेघाख्यःकुरुविंदकः॥वराहोद्वाब्दनोभद्रमुस्तोराजकशेरुकः॥२१७॥पिंडमुस्तोविषध्वंसीनागरोन्यःप्रकी
र्तितः॥मुस्तंकटुहिमंग्राहीतिक्तंदीपनपाचनं॥२१८॥कषायंकफपित्तार्शःकफतृष्णाज्वरापहं॥अथधायके
नाम॥धातुकीकुंजरासिंधुपुष्पीप्रमदिनीमदा॥पार्वतीयानाम्रपुष्पीसुभक्ष्यामद्यवासिनी॥२१९॥धातुकी
मधुराशीतामदकृत्तुवरालघुः॥तृष्णातीसारपित्तास्रविषकृमिविसर्पजित्॥२२०॥अथमोईनाम॥माचिका।
बालिकांबष्ठासटीदंतशर्कराविका॥अंबष्ठकीसूचिमुखीकषायासाकुर्दमुखी॥२२१॥माचिकाम्लारसेपाकेक
षायाशीतलालघुः॥पक्वातीसारपित्तास्रकफकंठामयापहः॥२२२॥अथविदारीकंदनाम॥विदारिकावृक्षव
ल्लीवृष्यकंदाविदारिका॥शृंगालिकाकंदवल्लीस्वादुकंदावलासका॥२२३॥अन्याश्वक्षीरक्षीरशुक्लाक्षी
रवल्लीपयस्विनी॥इक्षुवल्लीमहाश्वेताक्षीरकंदेक्षुगंधिका॥२२४॥विदारीमधुरास्निग्धावृष्यासीस्तन्यशुक्र
दा॥गुरुःपित्तास्रपवनःदाहान्हंतिरसायनी॥२२५॥अथवाराहीकंदपृथ्वीकंदनाम॥वाराहीमाधवीग्रंथिःशौक
रीवनमालिका॥तस्याःकंदःकिटिक्रोडनामशंबरकंदकः॥२२६॥वाराहीमधुराकेंदुःकटुतिक्तातिशुक्रलाः॥

॥रामः॥

॥१९॥

पाढी

वल्यापित्तकरोवातकफमेहकमीन्हरेत॥२२७॥अथपाठीनाम॥पाठांवष्ठावृहतिपत्राप्राचीनांवष्ठकारसा॥व
रातिक्तापापचेलीश्रेयसीवृद्धकर्णिका॥२२८॥पाठोष्णाकटुकातीक्ष्णावातश्लेष्महराल्लघुः॥हंतिशूलज्वरछ
र्दिकुष्ठातीसारहृद्रुजः॥२२९॥दाहकंडूविषश्वासकृमिगुल्मोदरव्रणान॥२३०॥अथमूर्वानाम॥मूर्वादेवीमधु
रसादेवश्रेणीमधुश्रवा॥स्निग्धपर्णीपृथक्पर्णीमोरटापीलुपर्णिका॥२३१॥जालिनीतिक्तवल्लीचचंदनीचपृ
थक्त्वची॥मूर्वासरागुरुःस्वादुस्तिक्तापित्तास्रमेहनुत॥२३२॥त्रिदोषतृष्णाहृद्रोगकंडूकुष्ठज्वरापहा॥मूर्वोव
ष्यामधुरसाश्लेष्मकृत्पित्तनाशिनी॥२३३॥वायुप्रशमनीहृद्याग्राहिरोगोगुल्मनाशिनी॥अथमजीठनाम
मंजिष्ठाविजयारक्तारक्तांगीकालमेषिका॥रक्तयष्टीस्ताम्रवल्लीसमंगाच्छत्रभूषणा॥२३४॥मंजुलाविका।
सामंडीछत्रिकाज्वरनाशिनी॥मंडूकपर्णीभंडीरीभंडीयोजनवल्ल्यपि॥२३५॥मंजिष्ठामधुरातिक्ताकषायास्व
रवर्णकृत॥गुरुरूक्षाविषश्लेष्मशोफयोन्यक्षिशूलनुत॥२३६॥रक्तातीसारकुष्ठास्रविसर्पव्रणमेहजित॥तच्छ
कंदीपनेस्वादुस्निग्धंपित्तानिलापहं॥२३७॥अथहलदीनाम॥हरिद्रारजनीगौरीरंजनीवरवर्णिनी॥पिंडा।
पीतावर्णवतीनिशावर्णीविलासिनी॥२३८॥हरिद्राकटुकातिक्तारूक्षोष्णाश्लेष्मपित्तनुत॥वर्ण्यात्वग्दोषमे

हास्त्रशोफपांडुज्वरापहा ॥२३९॥ अथ दारुहरिद्रानाम ॥ दार्वी दारुहरिद्रान्या पीतद्रुः पचंपचा ॥ कटंकटेरी पीतद्रुःस्व
र्णवर्णी कटंकटिः ॥२४०॥ दार्वी तद्वद्विशेषात्तु नेत्रकर्णास्यरोगनुत् ॥ अथ तुंबुरनाम ॥ स्यात्तुंबुरुस्तीक्ष्णादलो महा
मुनिर्गंधका ॥२४१॥ तुंबुरुः कटुकस्तीक्ष्णः कफमारुतनाशनः ॥ उष्णो हंत्युदरं शूलं कृमिगुल्महृदामयान् ॥२४२॥ अ
थ पमारनाम ॥ प्रपुन्नाटस्त्वेडगजश्चक्रमर्दः प्रपुंनटः ॥ दद्रुघ्नो मर्दको मेषःकुसमः कुष्ठकृंतनः ॥२४३॥ प्रपुन्ना
टो लघुः स्वादु रूक्षः पित्तानिलापहः ॥ हृद्यो हिमः कफश्वासकुष्ठकंडूकृमीञ्जयेत् ॥२४४॥ हंत्युष्णं तत्फलं कुष्ठकंडूद
द्रुविषव्रणान् ॥ वातरक्तापहं तस्य शाकं कफहरं लघुः ॥२४५॥ अथ वाकुचीनाम ॥ वाकुची चंद्रिका सोमवल्ली पूति
फला वरा ॥ सोमराजी कृष्णफला वल्गुजा कालमेषिका ॥२४६॥ चंद्रलेखा तथा सोमा कुष्ठघ्नी साऽसिताऽपरा ॥ ॥
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥२४७॥ विष्टंभिनी हिमा रुच्या सरा हृद्या श्र पित्तजित् ॥ रूक्षा हंति कफश्वा
सकुष्ठमेहकृमीञ्ज्वरं ॥२४८॥ तत्फलं पित्तकृत्स्वेतकुष्ठवातकफापहं ॥२४९॥ अथ भृंगराजनाम ॥ भृंगराजो भेक
राजो मार्कवः केशरंजनः ॥ अंगारको भृंगराजो भृंगाह्वः सूर्यवल्लभः ॥२५०॥ भृंगराजः कटुस्तिक्तो रूक्षोष्णः कफ
वातनुत् ॥ त्वच्यो रसायनो हृच्यः कुष्ठनेत्रशिरोर्त्तिजित् ॥२५१॥ अथ पित्तपापडानाम ॥ पर्पटः कवचो रेणुः पित्तहाय ॥राम॥

केश्यः त्वच्यः कृमिश्वासकास
शोफामपांडुनुत् २ पाठांतरे

वक्रकंटकः॥ नरतिक्तः पर्पटकः पृष्टकश्चर्मकंटकः॥२५२॥ पर्पटो हंति पित्तास्रभ्रमतृष्णाकफज्वरान्॥ संग्राही शी
तलस्तिक्तो दाहनुद्वातलो लघुः॥२५३॥ शणपुष्पीनाम॥ शणपुष्पी माल्यपुष्पी धावनी शणघंटिका॥ बृहत्पुष्पी
स्वल्पघंटा घंटारावा लोहपुष्पिका॥२५४॥ शणपुष्पी कटुः पित्तश्लेष्मजित्छर्दिकारिणी॥ अथ त्रायमाणानाम॥ त्राय
माणा सुहृन्माणा त्रायंती गिरिसानुजा॥ वल्लभद्रा कृतत्राणा वार्षिका त्रायमाणका॥२५५॥ त्रायमाणा सरा पित्तश्ले
ष्मघ्ना श्लशूलजित॥२५६॥ अथ जालिनीनाम॥ महाजालिनिका चर्मरंगा स्यात्पीतकीलकाः॥ आवर्तकी विंदुकि
नी बिभांडी रक्तपुष्पिका॥२५७॥ महाजालिनिका तिक्ता स्वेचनी कफपित्तजित् हंति दाहोदरानाहशोफकुष्टकृमिज्वरा
न॥२५८॥ अथ अतिविषानाम॥ अतिविषा शुक्लकंदा विषा प्रतिविषा परा॥ प्रोक्ता श्वेतवचा चैव विरूपा घुणवल्लभा
॥२५९॥ अरुणा च तथा शेया स्मृता माद्री च शृंगिका॥ स्यामकंदा सिता शृंगी भंगुरा पिविषारिणिका॥२६०॥ विषा ह्युष्णा पा
चिनी तिक्ता श्लेष्मपित्तातिसारजित्॥ अथ काकमाचीनाम॥ काकमाची ध्वांक्षमाची काममाची जघनेफला॥ रसाय
नी वरा सर्वतिक्ता स्यात् काकिनी कटुः॥ केदुर्नेत्रहिता हि क्वाचमिह रोगनाशिनी॥ काकमाची त्रिदोषघ्नी स्निग्धोष्णा
स्वरशुक्रदा॥ हृद्या रसायनी शोफकुष्ठार्शोज्वरमेहनुत॥२६२॥ अथ काकजंघानाम॥ काकजंघा नदीकांता काक

तिक्ता सुलोमशा ॥ पारावतपदी काकाम्रस्था काकिंमीतया ॥२६३॥ काकजंघा हिमा हंति रक्तपित्तकफज्वरा
न् ॥ अथ लोध्रद्वयनाम ॥ रोध्रस्तिरीटः कानीनः स्तिल्वकः संततोद्भवः ॥ अन्योद्यनस्त्वक्सारः श्वेतलोध्रो क्षिमे
षजं ॥२६४॥ क्रमुकः प्रदिकालोध्रं सवरं स्थूलवल्कलं ॥ मधुरः पित्तशमनो रोध्रं चैव प्रशस्यते ॥२६५॥ त्वग्विका
रहरो रूक्षो बलो वर्णप्रसादनः ॥ रोध्रो विरोधनः शीतः चक्षुष्यः कफपित्तनुत् ॥२६६॥ कषायो रक्तशोफास्रकृच्छ्र
रातीसारनाशनः ॥ तत्तुष्यं मधुरं ग्राहि सुतिक्तं श्लेष्मपित्तनुत् ॥२६७॥ अथ वत्सकै■नाम ॥ वत्सदारुर्महाश्या
मा जांगलो जीर्णबालकः ॥ अंतःको■टरपुष्पी स्याद्वावेगी छागलान्यपि ॥२६८॥ वत्सदारुः कषायोष्णः सर
स्तिक्तो रसायनः ॥ वृष्यो वातामवातास्रशोफमेहकफापहेयेत् ॥२६९॥ अथ देवदालीनाम ॥ देवदाली वं
तकोशो देवतांडो गरागरी ॥ जीमूतस्तारकावेराणी जालिन्याखुविषापहा ॥२७०॥ देवदाली रसे तिक्ता कफार्श
शोफपांडुनुत् ॥ नाशयेद्धामिनी तीक्ष्णा क्षयहिध्माक्रमिज्वरान् ॥२७१॥ देवदाली कटुः पाके प्रमेहं कामलां जये
त् ॥२७२॥ अथ हंसपदीनाम ॥ हंसपादी हंसपदी रक्तपादी त्रिपादिका ॥ प्रह्लादिनी कीटमारी कीटमाता मधुस्र
वा ॥२७३॥ हंसपादी गुरुः शीता हंति रक्तविषव्रणान् ॥ विसर्पदाहातीसारलूतारोगाग्निरोहिणी ॥२७४॥ अथ पल

शुक्लारिर्वेलमेघानि स्वर
कांतिकरः स्मरः ५

थसोमवल्ली

मवल्लीनाम॥ सोमवल्ली यज्ञनेता सोमक्षीरी द्विजप्रिया॥ सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी॥ २७५॥ अ

सर्पाक्षी। उमिष्ट

थ नाकुलीनाम॥ नाकुली सुवहा सर्पगंधनी गंधनाकुली॥ नकुलेष्टा मता सर्पनेत्रा चीरितपत्रिका॥ २७६॥ नाकुली तुव

रा तिक्ता कटुकोष्णा विनाशयेत॥ विषं लूतावृश्चिकाखुसर्पाणां च क्रमिव्रणान॥ २७७॥ अथ वटपत्रीनाम॥ वटपत्री

मोहनी स्याद्दीपनी रेचनी मता॥ वटपत्री योनिगदान्कषायोष्णा विनाशयेत॥ २७८॥ तत्स्थलं स्तंभनं शीतं वातश्लेष्मकफपित्तजि

त॥ अथ लज्जालुनाम॥ लज्जालु मोहिनी स्पृक्का स्वादिरी गंधकारिणी॥ नमस्कारी शमीपत्रा समंगा रक्तपादिका॥ ल

ज्जालुः शीतला तिक्ता कषाया श्लेष्मपित्तजित॥ रक्तपित्तमतीसारयोनिदोषं च नाशयेत॥ २८०॥ अथ मुशलीनाम॥ मु

शली खलिनी तालपत्री कांचनपुष्पिका॥ महावृष्या च वृष्या च केदारखर्जूरी तालमूलिका॥ २८१॥ मुशली मधुरा वृष्या

वीर्योष्णा बृंहणी गुरुः॥ तिक्ता रसायनी हंति अर्शांस्यनिलेतथा॥ २८२॥ अथ केवांछुनाम॥ कपिकच्छुः स्वयंगु

प्ता कंडुला गुह्यविग्रहा॥ चंडा त्वमृगमाला गलनी मर्कटी स्याज्जडा रसिगी॥ २८३॥ अथ पुत्रजीवानाम॥ पुत्रजीवो ग

र्भकरो यष्टिपुष्पोर्थसाधनः॥ पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातजित॥ २८४॥ सृष्टमूत्रमलो रूक्षो हिमः

वांझखेकसा

स्वादुः कटुः पटुः॥ २८५॥ अथ कर्कोटानाम॥ वंध्याकर्कोटकी देवी कुमारी विषनाशनी॥ मनोज्ञा नागदमनी वं

कपिकच्छुः परं वृष्या मधुरा बृंहणी गुरुः ३

तद्वीजं वातशमनं वाजीकरणमुत्तमम् ३

ध्यायोगे स्त्रीनया॥२८६॥ वंध्या कर्कोटकी लघ्वी कफनुद्व्रणशोधनी॥ सर्पदर्पहरा तीक्ष्णा विसर्पविषनाशनी॥२८७॥
अथ विष्णुक्रांतानाम [अपराजिता]॥ विष्णुक्रांता नीलपुष्पी जया वश्यापराजिता॥ विष्णुक्रांता कटुर्मेध्या कृमि[illegible]व्रणकफाञ्जयेत॥२८८॥
अथ शंखाहूलीनाम॥ शंखपुष्पी शंखनाम्नी किरीटी कंबुमालिनी॥ कंबुपुष्पी स्मृता हिता मेध्या वनविशालिनी॥२८९॥
शंखपुष्पी सरा मेध्या हिता चेतोविकारिणी॥ रसायनी कषायोष्णा स्मृतिदा मेहनाशिनी॥२९०॥ अथ दुध्धीना।
म॥ दुग्धिका मधुपर्णी स्यात्क्षीरिणी स्वादुपुष्पिका॥ दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी॥२९१॥ स्वादु [illegible]
[illegible] विष्टंभिनी वृष्या कफकुष्ठकृमीञ्जयेत॥२९२॥ अथ आकाहुलीनाम॥ अर्कपुष्पी क्रूरकर्मा जलका
मा भिरंडिका॥ अर्कपुष्पी कृमिश्लेष्मामेहचेतोविकारजित॥२९३॥ अथ भेल्लातकनाम॥ भल्लातकोनलो भ
ल्ली वीरवृक्षोग्निवक्त्रकः॥ आरुष्करस्तथारुष्कस्तपनोग्निमुखी धनुः॥२९४॥ भल्लातकः कषायोष्णः शुक्रा
लो मधुरो लघुः॥ वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान॥२९५॥ हति गुल्मज्वरश्वित्रवह्निमां[illegible]द्यक्रमिव्रणा
न॥ अथ चिरपोटीनाम॥ चिरपोटी दीर्घपत्रा कुंतलीतिक्तकामता॥ चिरपोटी हिमा रूक्षा भेदनी श्वासकासजि
त॥२९६॥ अथ दिनहुलीनाम [गुम्मा]॥ द्रोणपुष्पी गुरू रूक्षा स्वादू स्वा वा वातपित्तकृत॥ भेदनी कामलाशोफकफक्रमिहराक

द्रोणपुष्पी स्वमनका या लिंदी कुंभयोनिका छत्राति
छत्रिका द्रोणी कौंडिन्यो वृसमावकः १ [illegible]

ब्रह्मदंडीतिप्रसिद्धः

अथब्राह्मीनाम १

दुः॥२९६॥ब्राह्मीसरस्वतीसोमासत्याब्रह्मचारिणी॥मंडूकपर्णीमांडूकीत्वाष्ट्रीदिव्यामहौषधी॥२९७॥कपोतवं
कामुनिकाल्लावन्योसोमवल्लरी॥ब्राह्मीहिमासरास्वादुर्लघुर्मेध्यारसायनी॥२९८॥स्वर्यास्मृतिप्रदाकुष्ठपांडुमेहा
स्रकासजित॥विषशोथज्वरहरातद्वन्मंडूकपर्ण्यपि॥३००॥अथ [illegible]र्चमु सुवर्चलार्ककांतास्यात्सूर्यभक्तास्त
खोद्भवा॥सूर्यावर्तारविप्रीतात्वन्याब्रह्मसुवर्चला॥३०१॥सुवर्चलागुरूःशीतामूत्रलाकफवातजित॥अन्योलाकुष्ठ
मेहाश्मकृच्छ्रज्वरहरालघुः॥३०२॥अथमीनाक्षीनाम॥मत्स्याक्षीवाह्लिकामत्स्यागंधामत्स्यादनीतिच॥मत्स्या
क्षीग्राहिणीशीताकुष्ठपित्तकफास्रनुत॥३०४॥अथजलपिप्पलीनाम॥तोयपिप्पल्यंडुवल्लीपित्तरकेचदंत
या॥जलपिप्पलिकाहृद्याचक्षुष्याशुक्रलालघुः॥३०५॥संग्राहिणीहिमारूक्षारक्तदाहव्रणापहा॥३०६॥अथ
गोभीनाम॥गोजिह्वागोभिकागोभीदार्वीकाखरपर्णिनी॥गोजिह्वावातलाशीताग्राहिणीकफपित्तनुत
॥३०७॥हृद्याप्रमेहकासास्रव्रणज्वरहरालघुः॥अथनागदमनानाम॥नागाह्वादमनीनामगंधाभुजगप
र्णिनी॥स्यान्नागदमनीवर्ण्याभूतसर्पविषापहा॥३०८॥अथगुंजाद्वयनाम॥गुंजाशिखंडिकाताम्रारक्ति।
काचकसांतिका॥श्वेतान्याचक्रिकाचूडादुर्मुखाकाकपीलुका॥३०९॥गुंजाकेश्यावल्लकराऋष्यापित्तकफा

पहा॥ नेत्रामयहरा वृष्या हन्ति कंडूग्रहव्रणान्॥३१०॥ क्रमीन्कुष्ठकृशानिलं त्वेतापि शस्यते॥ अथ घोरबोलानाम॥
गुराल्लः॥ वेल्लंतरो दीर्घपत्रो वीरद्रुर्वेल्लपत्रकः॥ वेल्लंतरोऽश्मवातघ्नो हिक्काकफकृच्छ्रानिलार्तिजित्॥३११॥ अथ वंदा–नामः
वंदाकं स्याद्वृक्षरुहासि–खरीकामपुष्पकः॥ वृक्षादनी कामतरुः काममन्यापादरोहिणी॥३१२॥ वंदाकः कफवातास्र-
क्षोरव्रणविषापहः॥३१३॥ अथ पिंडारूनामः॥ पिंडारुः करहाटः स्यात्तीक्ष्णाकीलकुरंगकः॥ पिंडारो मधुरः शीतोशोषा-
पित्तकफापहः॥३१४॥ अथ छिक्किनीनामः॥ छिक्किकाक्षवकः क्रूरो नासासंवेदनः पटुः॥ छिक्किका पित्तला कुष्ठकृमि-
वातकफापहा॥३१५॥ अथ रोहीनामः॥ (अफीय) रोहितो दाडिमीपुष्पी रोहीतः कूटशाल्मलिः॥ प्लीहघ्नो रोहितको रोहिरक्तो ध्नः पार-
जातकः॥३१६॥ रोहीतकः सरोगुल्मयकृत्प्लीहोदरापहः॥ अथ मोचरसनामः॥ मोचकः स्यान्मोचरसः शाल्मलीवेष्ट-
कास्तथा॥ मोचा निर्यासकापिच्छो मोचश्रावो ब्रह्मवेष्टकः॥३१७॥ मोचकः शीतलो ग्राही गुरुर्वृष्यातिसारजित्॥ प्रवा-
हिकामपित्तास्रकफदाहनिवर्हणः॥३१८॥ अथ (केवडी) थवा वई नामः॥ अजगंधा वस्तगंधा वक्त्रपूतिर्व(मर्क)र्वरी॥ अजगंधा लघु-
रुक्षा कटुः स्यादस्रकृत्कफवातनुत्॥३१९॥ अथ (करसरईयोक्षी) कंटाशेलीउनामः॥ सैरेयकः सहचरः सैरेयः किंकिरातकः॥ दासी सहचरी
सिं – धीसूर्वक्रोमदुकेरकः॥३२०॥ रक्तपुष्पो कुरवकः पीतो सैरेयकुरंटकः॥ नीलश्चार्त्तगलः प्रोक्तो पर्णी दंडनवा

कपिः ॥ ३२१ ॥ शैरेयकः कुष्ठवातास्रकफपांडुविषापहः ॥ तिक्तो सोमधुरः केश्यः स्निग्धः केशरंजनः ॥ ३२२ ॥ अथ श्वेति

कोडलनामः ॥ श्वेतस्पंदा श्वेतपुष्पी कटभी गिरिकर्णिका ॥ सिता पराजिता श्वेता विषघ्नी मेहनाशनी ॥ ३२३ ॥ नीला

स्पंदा व्यक्तगंधा नीलपुष्पा गवादिनी ॥ श्वेतस्पंदा हृद्यं शीतं ग्रहघ्नं दृष्टिकंठकृत ॥ ३२४ ॥ कुष्ठशूलत्रिदोषामशोफव्र

णविषापहः ॥ ३२५ ॥ अथ अहिषहनामः ॥ इक्षुरः क्षुरकोक्ष्यंडः कोकिलाक्षः क्षुरः स्मृतः ॥ तैलकंटो भिक्षुरिक्षुवा

लिका चेक्षुगंधिका ॥ ३२६ ॥ इक्षुरः शीतलो वृष्यो गुरुर्वातकफास्रजित् ॥ अथ कर्पासनामः ॥ कर्पासपटदस्तूलछा

दनो वादरः पिचुः ॥ कर्पासको लघुः कोष्णो मधुरो वातनाशनः ॥ ३२७ ॥ तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरुः ॥ ३

२८ ॥ अथ आरामशीतलानामः ॥ आरामशीतला देवगंधा कुक्कुरमर्दकः ॥ आरामशीतला शीतकटुः पित्तकफास्रजि

त ॥ ३२९ ॥ अथ कुकुरदुंनामः ॥ कुकुरदुल्लाम्रचूडः सूक्ष्मपत्रो मृदुच्छदः ॥ कुकुरदुः कटुस्तिक्तो ज्वररक्तकफापहा

॥ ३३० ॥ अथ चामिनामः ॥ चामीशोखचराचारिआ स्त्रीचहिलमोचिका ॥ चामीशोथहरा कुष्ठपित्तश्लेष्महरामता ॥ ३३१ ॥

अथ बालामोटनामः ॥ बालामोटा जया सूक्ष्मापत्रा जैयापराजिता ॥ बालामोटा विषश्लेष्मा कफघ्नु द्विजयप्रदा ॥ ३३२ ॥

अथ सरपुंखनामः ॥ शरपुंखा कालशाकं प्लीहारिः कलिकामता ॥ शरपुंखा यकृत्प्लीहदुष्टव्रणविषापहा ॥ ३३३ ॥ ति

क्ता कषायका साश्वस्वासज्वरघ्नज्ञालघुः॥ अथ मयूरशिखानाम॥ मयूराख्या शिखा ज्ञेया सहस्री मधुकच्छदा
मयूराख्या शिखा लघ्वी पित्तश्लेष्मातिसारजित॥३३४॥ निहंति प्लीहगुल्मार्शोयकृच्छ्लेष्मोदरकृमीन्॥३३५॥ अ
थ लक्ष्मणानाम॥ लक्ष्मणा पुत्रदा रक्तविंदुपत्रा च नागिनी॥ लक्ष्मणा गर्भदा शीता सरा वृष्या त्रिदोषजित॥३३६
चमकी
अथ मांसरोहिणीनाम॥ मांसरोहिण्यतिरुहा वृत्ता चर्मकषा कषा॥ स्यान्मांसरोहिणी वृष्या सरा दोषत्रयाप
हडजोर
हा॥३३७॥ अथ हडसंकलनाम॥ अस्थिसंहारकोज्ञेयावज्रवल्ली त्रिकोणकुंटिका॥ वज्रांगी ग्रंथिमान्वज्री पीतकास्याद
स्थिशृंखिला॥३३८॥ अस्थिसंहारकः शीतो वृष्यो वातहरोऽस्थियुक्॥ अथ अर्कनाम॥ [illegible] अ
र्कः सूर्याह्वयः क्षीरी सदापुष्पो वकीरणः॥ मंदारो वसुकोन्योर्को राजार्को दीर्घपुष्पकः॥ अर्कद्वयं सरं वातकु
कनइल
ष्ठकंडूविषव्रणान्॥ निहंति प्लीहगुल्मार्शोयकृच्छ्लेष्मोदरकृमीन्॥३४०॥ अथ करवीरद्वयनाम॥ करवी
रो महाश्वेतपुष्पं स्यात्सतकुंभकः॥ रक्तपुष्पो परश्चंडो लगुडः करवीरकः॥३४१॥ करवीरद्वयं नेत्रशोपकुष्ठ
व्रणापहं॥ लघूष्णं कृमिकंडूघ्नं भक्षितं विषवन्मतं॥३४२॥ अथ धत्तूरनाम॥ धत्तूरः कितवो धूर्तो देवता मदनः
शिवा॥ उन्मत्तो मातुलः स्वल्लीतरलः कनकाह्वयः॥३४३॥ धत्तूरो मदवर्णाग्निवांतिकृत्ज्वरकुष्ठजित॥ उ

लोगुरुव्रणश्लेष्मार्कंडूकृमिविषापहः॥३४४॥ अथ कलिहारीनाम॥ कलिहारी वह्निमुखी लांगली गर्भपा
तनी॥ विशल्या हलिनी शारी प्रमाता शक्रपुष्पिका॥३४५॥ विद्युज्ज्वालाग्निजिह्वा च कथिता पुष्पसंभरा॥ वह्निःशि
खाग्निकास्तेयानलपूरंध्रिका स्मृता॥३४६॥ कलिहारी शरा कुष्ठशोफार्शोव्रणशूलजित्॥ तीक्ष्णोष्णा क्रमिनु
ग्वारपाठा घिउकुमार
ल्लघ्वी पित्तला गर्भपातिनी॥३४७॥ कुमारीनाम॥ कुमारी मंडला माता गृहकन्याति पिच्छला॥ कुमारी भेद
नी शीता यकृत्प्लीहकफज्वरान्॥३४८॥ निहंति वह्निविस्फोटपित्तरक्तत्वगामयान्॥ अथ भांगनाम॥ भंगा गो।
जा मातुलानी मोहनी विजया जया॥ भंगा कफहरा तिक्ता ग्राहिणी दीपनी लघुः॥३४९॥ तीक्ष्णोष्णा पित्तला मो
ह मद वाग्वह्निवर्धनी॥३५०॥ अथ पीरीभांगनाम॥ कोचिनी शोणफलिनी काकापुष्पा कवल्लरी॥ कांचनीस्त
वि ष
न्यदा मर्धव्यथा दोषत्रयापहा॥३५१॥ अथ दूर्वानाम॥ दूर्वा सष्टा शीतकरी गोलोमी शतपर्विका॥ अन्या श्वेता श्वे
तदूर्वा दंडिनी भार्गवी रुहा॥३५२॥ दूर्वा हिमा विसर्पास्रतृट्पित्तकफदाहजित्॥३५३॥ अथ गांडरदूर्वानाम॥ गंडदू
र्वा मत्स्यगंधा मत्स्याक्षी सकलादिनी॥ गंडदूर्वा हिमा लोहद्रावणी ग्राहिणी लघुः॥३५४॥ दाहतृष्णाबलासास्रकु
ष्ठपित्तज्वरापहा॥ अथ कासनाम॥ कासः सकांडः कोसेक्षुरिषीकः श्वेतचामरः॥ कासः कृच्छ्राश्मदाहास्रपि

॥श्रीगुरुः॥

॥१९॥

॥म॰वि॰नि॰॥

न्नस्य यहरो हिमः ॥३५५॥ अथ डाभनाम ॥ दर्भो वर्हिः कुशस्तीक्ष्णः सूच्यग्रो यज्ञभूषणः ॥ दर्भः कषायमधुरस्तृट्पित्त।
वस्तिरुक्कफरक्तजित् ॥३५६॥ अथ नलनाम (नरसल नरकट) ॥ नलो रंध्री पुष्पमत्स्यधर्मनोनर्तकः पिचुः ॥ नलो मूत्रार्तिदाहास्रक
फपित्तविसर्पजित् ॥३५७॥ अथ मुंजनाम ॥ मुंजः स्यूः स्थूलदर्भो वाणाह्वो ब्रह्ममेखलः ॥ मुंजो रुक्षो विस्त
र्पोस्रमूत्रवस्त्यक्षिरोगजित् ॥३५८॥ अथ वांसनाम ॥ वंशो वेणुः कीचकः स्यात्कर्मारस्त्वचिसारकः ॥
वंशः सरो हिमः पित्तकफदाहास्रमोहजित् ॥३५९॥ तत्करीरो गुरुर्भेदी श्लेष्मलो वातपित्तजित् ॥ तद्वीजो भेद
कोष्णः कफघ्नो वातपित्तकृत् ॥ अथ खुरासानीयवानीनाम ॥ जवानी यावनी तीव्रा तुरुष्का मदकारिणी
जवानी पाचनी रुक्षा ग्राहिणी मदिनी गुरुः ॥३६१॥ अथ खसनाम ॥ तिलभेदः खसतिलः शुभ्रपुष्पो लसत्फलः ॥
वृष्यो वल्यः खसतिलः श्लेष्मलो वातजिद्गुरुः ॥३६२॥ अथ अफीमनाम ॥ आफूकं तद्रसोद्भूतमहिफेनमफे
नकं ॥ आफूकं शोषणं ग्राही श्लेष्मघ्नं वातपित्तलं ॥३६३॥ अथ छिलहटानाम ॥ छिक्किरीटो हिमहा मूलपाताल
गरुडाह्वयः ॥ छिक्किरिटिः परं वृष्यः श्लेष्मणः पवनापहः ॥३६४॥ योरातो मुख्य तिलकं कह्लारमल्लस्तेन श्रीम
दननृपेण निर्मितोत्र ॥ ग्रंथेभून्मदनविनोदनाम्नि पूर्णो वर्गोयं ललितपदांकितो भयादिः ॥ ॥ ३६५ ॥ ॥

वल्कलः स्तत्फलोद्भूतो रुक्षो ग्राही विशोषणः ४

॥राम॥

॥छ॥इतिमदनपालविरचितेमदनविनोदनिघंटौअभयादिवर्गःप्रथमः॥छ॥तत्रविराजतिमध्यमदवज्जश्री
हचिरंपरमस्सरमेकं॥श्रीमदनक्षितिनाथसतातेविस्नुपदंविपदंविनिहंतु॥१॥अथत्र्यषवाचीसोठिनाम॥शुं
ठीविश्वौषधंविश्वंकटुभद्रंकटूत्कटं॥महौषधंशृंगवेरंनागरंविश्वभेषजं॥२॥शुंठीरूक्ष्यामवातघ्नीपाचनीकटु
कालघुः॥स्निग्धोष्णामधुरापाकेकफवातविवंधनुत्॥३॥वृष्यास्वर्याविमिश्वासकासशूलहृदामयान्॥हंतिश्ली
पदशोफार्शआनाहोदरमारुतान्॥४॥अथआर्द्रीनाम॥आर्द्रकंशृंगवेरंतत्कंदौषधमुदाहृतं॥आर्द्रकंना
गरगुणंभेदनंदीपनंगुरुः॥५॥अथमरिचनाम॥मरिचंवल्लिजंतीक्ष्णंमलिनंश्यामभूषणं॥मरिचंकटुकं
तीक्ष्णंदीपनंकफवातनुत्॥६॥उष्णंपित्तकरंरूक्षंश्वासशूलकृमीन्नयेत्॥तदार्द्रंमधुरंपाकेनात्युष्णंकफपि
त्तजित्॥७॥किंचित्तीक्ष्णगुणंश्लेष्मविशेषात्स्यादपित्तलं॥अथपीपरिनाम॥पिप्पलीचपलाकृष्णामागधी
मगधाकणा॥विश्वोपकुल्यावैदेहीशौंडीस्यात्तीक्ष्णतंडुला॥८॥पिप्पलीदीपनीवृष्यास्वादुपाकारसायनी॥अनु
ष्णाकटुकास्निग्धाकफवातहरालघुः॥९॥पित्तलारेचनीहंतिश्वासकासोदरज्वरान्॥गुल्मप्रमेहकुष्टार्शःप्लीहशू
लाममारुतान्॥१०॥आर्द्रीकफप्रदास्निग्धाशीतलामधुरागुरुः॥११॥अथऊषणचतुरूषणनाम॥विश्वोपकु

ल्यामरिचैस्त्र्यूषणं कटुकं कटुः॥ व्योषं कटुत्रयं तत्स्यात्सग्रंथि चतुरूषणं॥१२॥ त्र्यूषणं दीपनं हंति श्वासका
सत्वगामयान्॥ गुल्ममेहकफस्थौल्यमेदश्लीपदपीनसान्॥१३॥ अथ पिपरामूलनाम॥ कणामूलं कटुग्रं
थि पिप्पलीमूलमूषणं॥ षड्ग्रंथि ग्रंथिकं मूलं मागधं चटिकाशिरः॥१४॥ दीपनं पिप्पलीमूलं कटूष्णं पाचनं ल
घुः॥ रूक्षं पित्तकरं भेदि कफवातोदरापहं॥१५॥ अथ चव्यनाम॥ चव्यं चव्यनमुद्दिष्टं चविका कोलवल्लिका॥ पि
प्पलीमूलवत्तत्स्याद्विशेषाद्गुदजापहं॥१६॥ अथ गजपीपरिनाम॥ तत्फलं श्रेयसी हस्तिमागधी गजपिप्प
ली॥ गजकृष्णा कटुर्वातश्लेष्मघ्नी वह्निवर्धिनी॥१७॥ उल्लानि हंत्यतीसारश्वासकुष्टामयान्कृमीन्॥ अथ चित्र
कनाम॥ चित्रको हुतभुग्व्यालो दारुणो दहनो रुणः॥ अग्निर्वल्ली हविःपाठी वह्निनामा विशेषतः॥१८॥ चित्रकः
कटुकः पाके वह्निकृत्पाचनो लघुः॥ रूक्षोष्णो ग्रहणीकुष्ठशोफार्शःकृमिकासजित्॥१९॥ श्लेष्मानिलहरो ग्रा
ही तच्छावकं श्लेष्मपित्तजित्॥२०॥ अथ पंचकोलनाम॥ पिप्पलीमागधीमूलचव्यनागरचित्रकैः॥ पंचको
लं कफानाहगुल्मशूलारुचिर्जयेत्॥२१॥ सस्विंनप्रतं तत्तु षडूषणमुदीरितं॥ अथ सौफ वडी सौफ नाम॥ श
तपुष्पा शिफा घोषा शताह्वा कारवी मिशिः॥ अवाक्पुष्पी त्वतिछत्रा श्वेतिका मागधी परा॥२२॥ शातपुष्पाल्प

घुस्तीक्ष्णापित्तकृद्दीपनीकटुः ॥ उष्णाज्वरानिलश्लेष्मव्रणशूलाक्षिरोगजित ॥२३॥ श्वेतिकातद्गुणाप्रोक्ता
विशेषाद्योनिशूलजित ॥२४॥ अथसोयानाम ॥ मिश्रेयामिशिशालीनाशालीशीतशिवामता ॥ मिश्रेयादी
पनीहृद्याबद्धविट्कृमिशुक्रनुत ॥२५॥ रूक्षोष्णातत्फलंकासवमिश्लेष्मानिलाञ्जयेत ॥ अथमेथीवनमेथी
नाम ॥ मेथिकावल्लिकास्नेलरहित्योवनमेथिका ॥ मेथिकादीपनीहृद्याविट्कृमीशुक्रशूलहत ॥२६॥ गुल्मशू
लानिलहराश्लेष्मरोगनाशिनीपरा ॥ अहित्योल्पगुणस्तस्माद्वाजिनांसत्तुपूजितः ॥२७॥ अथअजमोदाज
वानीनाम ॥ अजमोदात्वुग्रगंधामोदाहस्तिमयूरकः खराश्वाकारवीवल्लीवस्तमोदाचकर्कटः ॥२८॥ अजमो
दाकटुस्तीक्ष्णादीपनीकफवातनुत ॥ उष्णाविदाहिनीहृद्यावृष्याबद्धमलालघुः ॥२९॥ नेत्रामयकृमिछर्दिहिध्मा
वस्तिरुजोजयेत ॥३०॥ अथश्वेतजीरास्यामजीरानाम ॥ जीरकंदीर्घकंशुक्लमजाजीकरणजीरकं ॥ जीरकंजर
णोक्षस्त्वेवर्षकालीसुगंधकं ॥३१॥ कालिकावाष्पिकाकुंचीकारवीचोपकुंचिका ॥ पृथ्वीकासुखवीपृथ्वीस्थूला
जाज्युपकालिका ॥३२॥ जीरकत्रितयंरूक्षंकटूष्णंदीपनंलघुः ॥ संग्राहीपित्तलंमेध्यंगर्भाशयविशुद्धिकृत ॥३३॥ चक्षु
ष्यंपवनाध्मानगुल्मछर्दिरवलासजित ॥ कारवीश्लेष्मपित्तघ्नीतद्वच्चैवोपकुंचिका ॥३४॥ अथयवानीनाम ॥ यवा

नीदीपकोरीव्योदीपनीयायवानिका॥जवासाह्योग्रगंधास्याज्जवालत्वाभूकदंवकः॥३५॥यवानीदीपनीरुच्याती
क्ष्णोष्णाकटुकालघुः॥वातश्लेष्मोदरानाहगुल्मशूलक्रिमीञ्जयेत॥३६॥अथखोरीअजुवापन॥जवानीया
वनीस्याखोरासानीजंतुनाशनः॥चोहारस्तकुणग्राहीक्तोविशेषात्क्रिमिनाशनः॥३७॥अथवोबईनाम॥अजगं
धापूतिगंधाववैरीपूतिवर्वरः॥कारवीखरपुष्पाचतुंगीपूतिमयूरकः॥३८॥अजगंधाकटुस्तीक्ष्णारूक्षाहृद्या
ग्निवर्धनी॥दृष्टिमेदघ्रकीलघ्नीशूलवातकफापहा॥३९॥अथवचनाम॥वचोग्रगंधागोलोमीषड्ग्रंथाजटि
लातथा॥जटिलाशतपर्वीन्यालोमशाहैमवत्यपि॥४०॥वचोष्णाकटुकातिक्तावामनीस्वरवह्निकृत॥अप
स्मारकफोन्मादभूतशूलानिलाञ्जयेत॥४१॥अथहोवेरनाम॥हपुषाविशपावित्राविगंधीविस्रगंधिका॥
अन्यास्वेतफलाध्वांक्षनाशनीमत्स्यगंधिका॥४२॥हपुषादीपनीतिक्ताम्रदूष्णातुवरागुरुः॥पित्तोदरसमीरा
र्शोग्रहणीगुल्मशूलजित॥४३॥अथवाइविडंगनाम॥विडंगजंतुहननंक्रिमिघ्नंस्तरतंडुलः॥मृतघ्नीनंदु
लाघोषाकरालामरगामिनी॥४४॥विडंगंकटुतिक्तोष्णंरूक्षंवह्निकरंलघुः॥शूलाध्मानोदरश्लेष्मक्रिमिवा
तविवंधनुत॥४५॥अथधनिआनाम॥धान्यकंधान्यकाधान्यंधानेयंचवितुन्नकं॥कुस्तुंबरुस्तदाईनुधा

नीधानेयकाः छत्रका ॥४६॥ धान्यकं तुवरं स्निग्धमवृष्यं मूत्रलं लघुः ॥ हृद्यं रुच्यं वह्निवृद्धं स्वादु पाके त्रिदोषनुत ॥४७
पाचनं श्वासकासाश्मान्त्रवामशोः कृमी जयेत ॥ आर्द्रिका तद्गुणा स्वादु विशेषात्पित्तनाशनी ॥४८॥ अथ हिंगुपत्री ।
नाम ॥ हिंगुपत्री पृथ्वी तन्वी पृथ्वीका चारुपत्रिका ॥ बाष्पिका कारवी तंडीलिका दीर्घिका तथा ॥४९॥ हिंगुपत्र्यपरा
वेणुपत्री हिंगुशिवाटिका ॥ जंतुका रामठी नाडी पिंडा हिंगुफला मता ॥५०॥ हिंगुपत्री हृद्यं हृद्यं तीक्ष्णोष्णं पाचनं कटुः
हृद्वस्तिरुग्विबंधार्शः श्लेष्मगुल्मानिलापहं ॥५१॥ अथ हींग नाम ॥ हिंगु बाह्लीकमत्युग्रं रामठं भूतनाशनं ॥ अगू
ढगंधं जरणं जंतुकं सूपधूपनं ॥५२॥ हिंगूष्णं पाचनं रुच्यं तीक्ष्णोष्णं कफवातनुत ॥ शूलगुल्मोदरानाहकृमिजि
त्पित्तवर्धनं ॥५३॥ अथ वंशलोचननाम ॥ वंशजा वै [illegible] रा वी क्षीरी त्वक्क्षीरी वंशरोचना ॥ तुगाक्षीरी तुगा वैशी वंश
क्षीरी शुभ्रा सिता ॥५४॥ वंशजा बृंहणी वृष्या शीतला मधुरा जयेत ॥ तृष्णाक्षयज्वरश्वासकासपित्तास्रकामला ॥५५॥
अथ सैंधवनाम ॥ सैंधवं सिंधुजं सिंधु मणिमंथं पटूत्तमं ॥ सैंधवं मधुरं हृद्यं दीपनं शीतलं लघुः ॥५६॥ चक्षुष्यं पाच
नं स्निग्धं वृष्यं दोषत्रयापहं ॥ अथ सोचरनाम ॥ सौवर्चलं सुगंधाख्यं रुचकं हृद्यगंधकं ॥ सौवर्चलं वह्निकरं क
टूष्णं विशदं लघुः ॥५७॥ उद्गारशुद्धिदं सूक्ष्मं विबंधानाहशूलजित ॥५८॥ अथ विडलोननाम ॥ विडं कृत्रिमकं पाक्यं

धूर्तैर्द्राविडमासुरं ॥ विडं लघूष्णं विशदं सशूलहृद्गौरवारुचीः ॥५९॥ हंत्यानाहकफौ सूक्ष्ममधोवातानुलोमनं ॥ अथ सामु-
द्रलवणनाम ॥ सामुद्रं वारिसंभूतं समक्षिं वंशिरं तथा ॥ सामुद्रं दीपनं स्वादु नात्युष्णं भेदनं कटुः ॥६०॥ श्लेष्मलं वातनु-
द्विन्नं मरुस्थे नातिपित्तलं ॥६१॥ अथ औद्भिदं मानैलवणं (औपिर नामक पंजाबीय) ॥ औद्भिदं भूमिजं भौमं पार्थिवं पृथिवीभवं ॥ औद्भिदं रक्तलं ससूक्ष्मं ल-
घु वातानुलोमनं ॥६२॥ अथ सांभरिनाम ॥ गाडरव्यं रोमलवणं रोमशाकंभरीभवं ॥ गाडरव्यं लघु वातघ्नमत्युष्णं भेदि
मूत्रलं ॥६३॥ अथ खारीनाम ॥ क्षारं पांशुभवं त्वौषमौषरं पांशवं वसु ॥ क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनं ॥
६४॥ अथ कचलवण ॥ काचं त्रिकूटं यत्क्षारं लवणं काचसंभवं ॥ काचं दीपनमत्युष्णं रक्तपित्तविवर्द्धनं ॥६५॥ अथ यवा-
खारसज्जीखारनाम ॥ यवक्षारः शूकपाक्यो यवशूको यवाग्रजः ॥ सर्जिकास्वर्जिकापाक्यः सुखवर्चः सुवर्चिका ॥६६॥
यवक्षारोऽग्निकृद्वातश्लेष्मश्वासगलामयान् ॥ आमार्शोग्रहणीगुल्मयकृत्प्लीहरुजो जयेत् ॥६७॥ स्वर्जिकाल्पगु-
णा तस्माद्विशेषाद्गुल्मशूलजित् ॥६८॥ अथ सुहागानाम ॥ टंकणो मालतीजातो द्रावी लोहविशुद्धिदः ॥ टंकणो-
ऽग्निकृद्रूक्षः कफघ्नो वातपित्तकृत् ॥६९॥ अथ चूनानाम ॥ सुधा मृता हृयः सौधमस्मषणो करशर्करा ॥ सुधा ।
स्रारोग्निसंकाशः पाकीक्रूरी विग्रहणः ॥७०॥ अथ सर्वक्षारनाम ॥ पलाशतिलनैलीनस्पंदं भ्रकदलीभवाः ॥

अपामार्गोर्कसेहुंडमोक्षकादिसमुद्भवाः ॥७१॥ क्षारा वह्निसमाः सर्वे पाचना भेदिदारणाः ॥ लघवः क्लेदिनस्तीक्ष्णाः
शुक्रौजोदृष्टिनाशनाः ॥ रक्तपित्तज्वरघ्नेति विबंधानाहपीनसान् ॥ पक्वग्रीहवलासामगुल्मार्शोग्रहणीकृमीन्
॥७३॥ योराज्ञोमुख्यतिलकः कद्दारमल्लस्तेनश्रीमदनन्पेणनिर्मितेत्र ॥ ग्रंथे यो भून्मदनविनोदनाम्निपूर्णःशुं
ठ्यादिःखलुभिषजोहितायवर्गः ॥७४॥ ॥ इति मदनपालविरचिते मदनविनोदनिघंटौ शुंठ्यादिवर्गो द्वितीयः
॥ आरोप्य पाणौ नववल्लवीभिर्वीलेविनोदात्परिचुम्बितास्यं ॥ श्रोणौ पिबंतं पतिवद्विदंतं साश्चर्यमुन्नं हृदि
माश्रयामि ॥ अथ कर्पूरनामः ॥ कर्पूरः स्फटिकश्चंद्रः सिताभ्रो हिमवालुकः ॥ हिमोपलः शीतरजो मृतिकस्तु
हिनाह्वयः ॥१॥ कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः ॥ कफरा हास्य वैरस्यमेदशोषविषापहः ॥२॥ अथ
कस्तूरीनाम ॥ कस्तूरिका मृगमदो वेधमुख्या मृगांडजा ॥ मृगनाभिरथान्यास्याल्लताकस्तूरिकामदः ॥३॥ क
स्तूरी शुक्रला गुर्वी कटुका कफशीतजित ॥ उष्णा इति कफच्छर्दिशोषदोर्गंध्यमारुतान् ॥४॥ लताकस्तूरिका त
विलाईकस्तूरी
द्वत्स्याशीतालघुस्तथा ॥ अथ जवादिकानाम ॥ मार्जारीपूतकवचः कवचस्याद्गंधचेलिका ॥ मार्जारीकोति
माधने चक्षुष्या वातपित्तजितः ॥६॥ अथ श्वेतचंदननाम ॥ चंदनं तिलपर्णी स्यान्महार्हं श्वेतचंदनं ॥ भद्रश्रियं

लताकस्तूरिका ज्ञेया कटुर्दक्षिणदेशजाः लताकस्तूरिका
लिका स्वाद्वी वृष्या हिमा लघुः । चक्षुष्या छेदिनी श्ले
ष्मतृष्णावस्यास्यरोगजित् इति लताकस्तूरीनामः ॥
लोके मुष्कदाना ।

मलयजं गोशीर्षं गंधसारकं ॥७॥ चंदनं शीतलं रूक्षं तिक्तमाह्लादनं लघु । हृद्यं वर्ण्यं विषश्लेष्मतृष्णापित्तास्र
दाहजित् ॥८॥ अथ रक्तचंदननाम ॥ रक्तचंदनमुद्दिष्टं लोहितं क्षुद्रचंदनं ॥ ताम्रसारं रक्तसारं ज्योतिःसोमं
चंदनं ॥९॥ रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तजित् ॥ तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहं ॥१०॥ अथ पी-
तचंदननाम ॥ कालीयकं पीतसारं पीतं नारायणप्रियं ॥ मलयस्यात्पीतकाष्ठं चवक्ष्ये पीतचंदनं ॥११॥ का-
लीयकं रक्तगुणं विशेषात् व्यंगनाशनं ॥१२॥ अथ कृष्णागुरुनाम ॥ कृष्णागुरु स्यादगुरु राजार्हं विश्वरूपकं
जोंगलं शीतमलिनं कृमिजं गंधमनार्यकं ॥१३॥ कृष्णागुरुस्नेकर्णाक्षिरोगनुत्पित्तलं लघुः ॥ अथ केसरि-
नाम ॥ कुंकुमं चारु बाह्लीकं वर्ण्यमग्निशिखं वरं ॥ काश्मीरी पीतमस्रार्हं संकोचं पिशितोदकं ॥१४॥ कुंकु-
मं कटुकं स्निग्धं शिरोरुग्व्रणजंतुजित् ॥ उष्णं हास्यकरं वर्ण्यं व्यंगदोषत्रयापहं ॥१५॥ अथ शिलाजतुनाम
सिल्हकः कपिलो धूम्रस्तुरुष्कं पिंडितः कपिः ॥ सिल्हकः कुष्ठकेद्वघ्नः स्निग्धोष्णः शुक्रकांतिकृत् ॥१६॥ अ-
थ वालनाम ॥ एलवालुकमेल्वालुवालकं हरिवालुकं ॥ एल्वालु शीतलं हंति कंडूकुष्ठकफकृमीन् ॥१७॥
तृट्छर्दिकफपित्तास्रहृन्मूत्रगदजिल्लघु ॥१८॥ अथ जायफलनाम ॥ जातीफलं जातिसस्यं शालूकं माल ॥राम॥

तीसृतं॥ जातीफलं लघु स्वर्यं हृद्यं दीपनपाचनं॥ १९॥ उष्णं कफानिलछर्दिकृमिपीनसकासजित्॥ अथ जावत्रीनाम॥
जातिपत्री जातिकोषी मालती पत्रिका तथा॥ जातिपत्री लघुः स्वादुः स्यात् कफकृमिविषापहा॥ २०॥ अथ लवंगनाम॥ ल
वंगं शिखरं दिव्यं लवं चंदनपुष्पकं॥ श्रीपुष्पं देवकुसुमं भृंगारं वारिसंभवं॥ २१॥ लवंगं लघु चक्षुष्यं हृद्यं दीपनपाच
नं॥ शूलानाहकफश्वासकासछर्दिक्षयापहं॥ २२॥ अथ कंकोलनाम॥ कंकोलं कटुकं कोलं मारीचं माधवोचितं॥ कं
कोलमुष्णं हृद्रोगकफवाताग्निमांद्यजित्॥ २३॥ स्वमक्रमविबंधघ्नं लिखास्वासतषापहं॥ २४॥ अथ छोटी इलाय
चीनाम॥ एला त्रुटिश्च बहुला बहुलानिष्कुटिर्द्विषा॥ कपोतवर्णा सूक्ष्मैला कोरंगी द्राविडी सखी॥ २५॥ एला सूक्ष्मा क
फश्वासकासार्शोमूत्रकृच्छ्रहृत्॥ अथ वडी इलायचीनाम॥ स्थूलैला त्रिपुटा कन्या भद्रैला त्रिदिवोद्भवा॥ स्थू
लैला रोचनी तीक्ष्णा लघूष्णा कफपित्तजित्॥ २६॥ हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत्॥ अथ दालचीनी॥
त्वचं लघु स्वं कटुकं विशदं स्वादु पित्तलं॥ २७॥ हृत्कृत्तिरोगवातार्शःपीनसक्ष
मिशुक्रहृत्॥ २८॥ अथ पत्रजनाम॥ पत्रं दलान्तु छदनं तमालं रोमरोमसं॥ सुगंधं सुकुमारं च तथा रामं सुवर्णकं॥
तमालपत्रं विशदं कषायं वातनाशनं॥ पत्रमुष्णं लघु श्लेष्महृल्लासार्शोनिलापहं॥ ३०॥ गंधपत्रं च हृद्यं च वक्त्रदो

त्वचं वर्णं पंसकलं त्वक् चोचं तनुकं वरं॥ ला ८
वर्णं वनं भृंगं गुरत्वक् स्वर्णभूमिकं॥ ३३॥ ःः

गंध्यपित्तनुत्॥३१॥ अथ नागकेसरनाम॥ नागकेसरकं नागं चांपेयं केशरंजनं॥ नागपुष्पं च किंजल्कं कनकं हेमकांचनं॥३२॥
नागकेसरकं रूक्षमुष्णं लघ्वामपाचनं॥ दौर्गंध्यकुष्टवीसर्पकफपित्तविषापहं॥३३॥ अथ त्रिजातचातुर्जातनाम॥ एला
दित्रिभिरुद्दिष्टं त्रिजातं त्रिसुगंधिकं॥ चातुर्जातं सनागं तद्वयं वातकफापहं॥३४॥ अथ तालीसपत्रनाम॥ तालीसपत्रं
तालीसं धात्रीपत्रीं शुकोदरी॥ अपरं ग्रंथिकापत्रं पत्राढ्यं तलसीछदं॥३५॥ तालीसं लघु तीक्ष्णोष्णं श्वासकासकफा
निलान्॥ निहंत्यरुच्यं गुल्मामवह्निमांद्यक्षयामयान्॥३६॥ अथ चीडनाम॥ सरलो मदनश्चीडो नमेरुः पीतवृक्षकः
सरलः कर्णिके हास्ति गदघ्नो स्नेहलो लघुः कटुः॥३७॥ अथ श्रीवासनाम॥ श्रीवासो वेष्टको दासी श्रीनिवासः कलि
द्रुमः॥ श्रीवासः कफमूर्धाक्षिरोगवातहरः सरः॥३८॥ अथ नेत्रवालानाम॥ वालकं वारि ह्रीवेरं पिंगमाचमनं कचं॥
उदीच्यं वज्रमेघाह्वं वरिष्टं गंधमूलकं॥३९॥ वालकं शीतलं रूक्षं लघु दीपनपाचनं॥ रक्तपित्तज्वरश्लेष्मदाहतृ
ष्णाव्रणापहं॥४०॥ अथ जटामासीनाम॥ मांसी जटा भूतकेशी क्रव्यादी नलदं शिका॥ कृष्णान्या पूतना केशी गं
धमांसी पिसाचिका॥४१॥ मांसी हिमा त्रिदोषास्रदाहवीसर्पकुष्टजित्॥ अथ उशीरनाम॥ उशीरमभयं सेव्यं।
वीरं वीरणमूलकं॥ नदेववहुमूलं च वरूपं मज्जालकं॥४२॥ रणप्रियं प्रियं शीतमूलं निगधजोरकं॥ उशीरं पाच

रक्तोपमोषरणगंधिपुत्रीन्द्रीहि आतथा हीराकाशिशिर
पप्रीमहेला कोमलीतथा २

गौरीपुष्करवध्रीचतथा गंधफलीमता ३

मुखकांतिप्रजननं गात्रदौर्गंध्य
नाशनं ३

सभालूकाबीज १

नेशीतं तत्स्तंभनं कफपित्तजित् ॥४३॥ तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहं ॥४४॥ अथ रेणुकानाम ॥ रेणुका
फूल प्रियंग
कपिला कौंती पांडुपत्री हरेणुका ॥ रेणुका पित्तला मेध्या वह्निकृद्गर्भपातिनी ॥४५॥ अथ प्रियंगुनाम ॥ प्रि
गरोठा
यंगुः फलिनी श्यामा कांता ह्लादनंदिनी लता ॥ प्रियंगुः शीतला वातदाहपित्तज्वरास्रजित् ॥४६॥ अथ परिपेलव
सेला जीरे नाम
नाम ॥ परिपेलं प्लवं कैवर्त्यं सुकाकं परिपेलकं ॥ परिपेलं हिमं कंडुकुष्ठास्रकफपित्तजित् ॥४७॥ अथ छरीलाना
लोके काई
म ॥ शैलेयं स्थविरं वृद्धं शिलापुष्पं शिलोद्भवं ॥ शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ॥४८॥ अथ लामज्जकना
म ॥ लामज्जकं जलाधारं दीर्घमूलं जलाशयं ॥ इषिका पथ्यकं शीघ्रं अमृणालं सुनालकं ॥४९॥ लामज्जकं हि
कुंदरुगोंद
मं कृच्छ्रदाहदोषत्रयास्रजित् ॥ अथ कुंदुरुनाम ॥ कुंदुरुर्मैचकः कुंदुः कर्पूरो भीषणो बली ॥ कुंदुरुः स्वेदपव
नश्लेष्मश्लेष्मज्वरापहः ॥५०॥ अथ गुग्गुलनाम ॥ गुग्गुलः शालनिर्यासो महिषाक्षः पलंकषः ॥ जटायुः कौशि
कटुकः
को दुर्गो देवधूपः शिवःपुरः ॥५१॥ गुग्गुलो विशदस्तिक्तो वीर्योष्णो मधुरः सरः ॥ भग्नसंधानकृद्वृष्यः सूक्ष्मः स्वा
र्यो रसायनः ॥५२॥ दीपनः पिच्छिलो बल्यः कफवातव्रणापहः ॥ मेदोमेहाश्मवातास्रक्लेदकुष्ठाममारुतान् ॥५३॥ पिडि
काग्रंथिशोफार्शोग्रंथिगंडकृमीञ्जयेत् ॥ स्वनवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः ॥५४॥ स्वादो ससारमधु

इति प्रशादि नंह थे वातपित्तत्रयापहं ४

रोमघ्नो मधुरः पिच्छिलः ॥ महिषाख्यश्च शोफघ्नः पित्तकफविनाशनः ॥ ५५ ॥ वातश्लेष्मप्रशमनः कुष्ठरोगहरः सरः ॥ भद्रा ।
श्रेयो भूतघ्नो ग्रहघ्नो डाकिनीमदनापहः ॥ ५६ ॥ धूपमात्रेण नश्यंति कूष्मांडाद्याश्च राक्षसाः ॥ ५७ ॥ अथ रालनाम ॥ रा
लो सर्जरसो यक्षधूपः सर्जोग्निवल्लभः ॥ क्षणकः शालनिर्यासो लाक्षास्या च्छवर्णोरकः ॥ ५८ ॥ रालो हिमो गुरुस्ति
क्तः कषायो ग्रहरोगी जयेत् ॥ स्राहास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ॥ ५९ ॥ अथ थयणोरनाम ॥ स्थौणेयकं वर्हि
चूडं शुकवर्णं शुकच्छदं ॥ स्थौणेयं शीतलं वृष्यं मेध्यं दोषत्रयास्रजित् ॥ ६० ॥ अथ चोरकनाम ॥ चोरकः कितवश्च
डेंडुः पुत्रः शंकितो रिपुः ॥ चोरः स्वादु लघुः शीतः कुष्ठवातकफास्रजित् ॥ ६१ ॥ अथ मुर[illegible]नाम ॥ मुरा गंधवती दैत्या ।
गंधाढ्या सुरभिः कुटिः ॥ मुरा शीता लघुः कुष्ठग्रहपित्तानिलास्रजित् ॥ ६२ ॥ अथ कचूरनाम ॥ कर्चूरो द्राविडो गंध ।
मूलको दुर्लभः सठी ॥ कर्चूरो दीपनो रुच्यः कुष्ठार्शोव्रणकासजित् ॥ ६३ ॥ उष्णो लघुर्जयेच्छ्वासगुल्मवातकफ
मीन् ॥ अथ मातकचूरभेद ॥ शठी पलाशी षड्ग्रंथा सुव्रता गंधमूलिनी ॥ सठी शीता ज्वरामास्रकासजिद्ग्राहि ।
णी लघुः ॥ ६४ ॥ अथ [illegible] नाम ॥ स्पृक्का स्पृक् ब्राह्मणी देवी निर्माल्या कुटिला वधूः ॥ स्पृक्का स्वाद्वी हिमा वृष्या कु
ष्ठालक्ष्मी त्रिदोषजुत् ॥ ६५ ॥ अथ गठिवननाम ॥ ग्रंथिपर्णं नीलपुष्पं शुकपुष्पं विवर्णकं ॥ ग्रंथिपर्णो लघुस्तिक्तो ह

कालानुसार्यमगुजं कुलितप्रियवत्सकं ६ उहस्ती सकुटिलं धन्वं तगरपादिकं ५

द्वितीयं — वातपित्तघ्नं
विस्फोटकविनाशनं पिंडी
तगरनामगुणाः ६

नारीशाक कुगंधविशेषोपि

व्योषाः कफवातजित ॥६६॥ अथ नालीनाम ॥ नलिका नर्त्तकी शून्या निर्मध्या धमनी नटी ॥ नाली पित्तास्रजित् क्षीव
चक्षुष्या कुष्ठकृच्छ्रजित ॥६७॥ अथ पद्मकनाम ॥ पद्मकं मलयश्चारुः पीतरक्तश्च सुप्रभः ॥ पद्मकं दाहविस्फोटकुष्ठ
श्लेष्मास्रपित्तजित ॥६८॥ गर्भसंस्थापनं शीतं तत्स्रावी सर्पदाहजित ॥ अथ श्वेतपुंडरीकनाम ॥ प्रपौंडरीकं पुंड्राह्वं शत
पुष्पं सुपुष्पकं ॥ पुंड्राह्वं मधुरं तिक्तं शीतं चक्षुष्यं श्लेष्मपित्तजित ॥६९॥ अथ तगरनाम ॥ तगरं बर्हिणं जिह्मं चक्रं दीन
कुषेनतं ॥ अपरं पिंडतगरं दीपनं कटु महोदरं ॥७०॥ तगरं मधुरं स्निग्धं तिक्तोष्णं लघु भूतजित ॥ विषापस्मारमूर्धा
क्षिरोगदोषत्रयापहं ॥७१॥ अथ गोरोचननाम ॥ गोरोचना रुचिर्गौरी रोचना पिंगला मता ॥ मंगल्या गोमती मेध्या
वंध्या गोपित्तसंभवा ॥७२॥ रोचना शीतला वश्या गर्भस्रावग्रहास्रजित ॥७३॥ अथ नखद्रव्यनाम ॥ नखोऽल्पो नख
रः शिल्पी हनुर्नीगहनुः खुरः ॥ शुक्तिः शंखो व्याघ्रनखमन्यद्व्याघ्रतलं पदं ॥७४॥ नखद्रव्यं ग्रहश्लेष्मवातास्रज्वरकु
ष्ठजित ॥ लघूष्णं शुक्रलं वर्ण्यं ▪ धे स्वादु विषापहं ॥७५॥ अथ पतंगनाम ॥ पतंगं पटरागं स्याद्रक्तकं सुरंगं चंदनं
सुरंगकं जघन्यारक्तं पत्तूरं पटरंजनं ॥७६॥ पतंगं मधुरं शीतं पित्तश्लेष्मव्रणास्रजित ॥ अथ लाक्षानाम ॥ लाक्षा नि
▪ मर्तसनोरक्ता द्रुमव्याधि पलंकषा ॥ कृमिजा तंतुरी मालका जावकोलक्तको मतः ॥७७॥ लाक्षा स्याद्वर्ण्या हिमा बल्या

स्निग्धा श्लेष्मास्रपित्तजित्॥ अरोरःक्षतक्षीणसर्पकृमिकुष्ठव्रणापहा॥७८॥ अलक्तको गुणैलक्तद्विशेषाङ्गरागनाशनः॥७९॥ अथ पर्पटीनाम॥ पर्पटी रंजनी कृष्णा जतुका जननी जनी॥ पर्पटी वर्णदा शीता कफपित्तास्रकुष्ठनुत्॥८०॥ अथ पद्मिनीनाम॥ पद्मिनी बिसिनी ज्ञेया नलिनी सूर्यवल्लभा॥ कुमुद्वती कैरविणी कुमुदिन्युडुपप्रिया॥८१॥ पद्मिनी शीतला गुर्वी पित्तश्लेष्मविषास्रजित्॥ तद्वद्विशेषं भिनी स्वादुस्तद्वत्कुमुदिनी मता॥८२॥ अथ पद्मचारिणीनाम॥ पद्मचारिण्यतिचरा पद्मा स्वाचारटी मता॥ पद्मातिमा लघुः श्लेष्मकृच्छ्रजित्तनदाठ्रकृत्॥८३॥ अथ श्वेतकमलनाम॥ कमलं श्वेतमंभोजं सारसं सरसीरुहं॥ सहस्रपत्रं श्रीगेहं शतपत्रं कुशेशयं॥८४॥ पंकेरुहं तामरसं राजीवं पुष्कराह्वयं॥ अब्जमंभोभवं पद्मं पुंडरीकं च पंकजं॥८५॥ नलसरोजं नलिनमरविंदं महोत्पलं॥ अथ रक्तकमलनाम॥ रक्तोत्पलं कोकनदं हल्लकं रक्तसंधिकं॥८६॥ अथ नीलकमलनाम॥ नीलोत्पलं कुवलयं भद्रं मिंदीवरं मतं॥ एतदेव सितं किंचित्कुमुदं कैरवं मतं॥८७॥ अथ कमलनाम॥ कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित्॥ तृष्णा दाहास्रविस्फोटविषवीसर्पनाशनं॥८८॥ तस्मादल्पगुणो किंचिदन्यद्रक्तोत्पलादिकं॥ अथ कल्हारनाम॥ कल्हारं कुसुपाथोजं सौम्यं सौगंधिकं मतं॥ कल्हारं ग्राहि विष्टंभि रूक्षं गुरु सुशीतलं॥८९॥ अथ कमलकेसरनाम॥ किंजा।

त्वकः केसरं गौरमापीतं कांचनाह्वये ॥ किंजल्कः शीतलो ग्राही रक्तार्शः कफपित्तजित् ॥८०॥ अथ कमलगटानाम ॥
पद्मबीजे तु गालोड्यं पद्माक्षं पद्मकर्कटी ॥ पद्मबीजं हिमं स्वादु गर्भसंस्थापनं गुरु ॥८१॥ कफवातकरं बल्यं ग्राहि
पित्तास्रदाहजित् ॥ अथ कमलनालनाम ॥ मृणालं बिसमंभोजनालं च नलिनीरुहं ॥ पद्मादिमूले शालूकं शाली
नं करहाटकः ॥८२॥ मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरुः ॥ संग्राहि मधुरं रूक्षं शालूकं स्वपितद्गुणं ॥८३॥ अथ चा
मेलीपीतचमेलीनाम ॥ जातीप्रियंवदा राजीमालती सुमना मता ॥ पीतजात्यपरा पीतपुष्पा कांचनपुष्पिका ॥८४॥
जाती लघुस्तथा मूर्धाक्षिदंतार्तिव्रणरक्तजित् ॥८५॥ अथ मल्लीनाम ॥ मल्लिका मोदिनी शुक्ला वेधना मदयंतिका ॥
मल्लिकोष्णा लघुर्वृष्या वातपित्तास्ररोगजित् ॥८६॥ अथ जूहीपीतजुहीनाम ॥ यूथिका हरिणी बालापुष्पाय गं
धाशिखंडिनी ॥ स्वर्णयूथ्यपरा पीता गणिका स्वर्णपुष्पिका ॥८७॥ यूथिकाः हिमास्रमूर्धाक्षिरोगजित्कफवातकृत् ॥
अथ सेवतीगुलाबनाम ॥ कुब्जकोऽभद्रतरुणी बहुसुष्या महासहा ॥ शतपत्री तरुण्युक्ता कर्णिका चारुकेसरा ॥ श्वे
त्कापरा रक्तपुष्पी लाक्षापुष्पा निर्मंजुला ॥ शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ॥८८॥ दोषत्रयास्रजिद्व
र्ण्या कुब्जकोऽपि च तद्गुणः ॥८९॥ अथ केतकीस्वर्णकेतकीनाम ॥ केतकी सूचिकापुष्पो जंबुकः क्रकचच्छदः ॥ सु

वर्णा केतकी चान्या लघुपुष्पा सुगंधिनी ॥८१॥ केतकी कटुका स्वादी लघ्वी तिक्ता कफापहा ॥ अथ नेवारी सप्तला वसंतनाम ॥ वासंती सरणी कुंदप्रहसंती वसंतजा ॥ वासंती शीतला लघ्वी तिक्ता दोषत्रयापहा ॥८२॥ अथ नेवारी त्रिपुरा नाम ॥ नेमाली ग्रैष्मकी लूता म्लायनी वनमालिका ॥ वार्षिकी त्रिपुरा चान्या श्रीमती षट्पदप्रिया ॥८३॥ नेमाली शीतला तिक्ता लघ्वी दोषत्रयापहा ॥ कर्णाक्षिमुखरोगघ्नी नद्गुणी वार्षिकी मता ॥८४॥ अथ माधुरी नाम ॥ माधवी

माधवीलता पश्चिमदेशे प्रसिद्धः

मंडपः कामी पुष्पेंद्रो भीष्टगंधकः ॥ माधवी मधुरा शीता तिक्ता दोषत्रयापहा ॥८५॥ अथ चंपा नाम ॥ चंपकः कांचनो रम्य चांपेयः सुरभिः स्मृतः ॥ चंपकः शीतलः कटुः कफपित्तास्रवातजित् ॥८६॥ अथ पुंनाग नाम ॥ पुंनागः पाटलीपुष्पः केसरः षट्पदालयः ॥ पुंनागो मधुरः शीतो रक्तपित्तकफापहा ॥८७॥ अथ मौलसिरी नाम ॥ बकुलः केसरो मद्यगंधः सिंहो विसारदः ॥ बकुलः शीतलः श्लेष्मपित्तदंतगदापहः ॥८८॥ तत्फलं वातलं ग्राहि कफपित्तहरं हिमं ॥ अथ बगहल नाम ॥ बुको बकः स्थूलपुष्पो वसुकः शिवशेखरः ॥ बुकः शीतो विषश्लेष्मशिरोरुग्विषपित्त-

गुलबगली

जित् ॥८९॥ अथ मुचकुंद नाम ॥ मुचकुंदः सैत्रवृक्षः स्थिंवुकः प्रतिविष्टकः ॥ मुचकुंदः शिरः पीडापित्तास्रविषनाशनः ॥९०॥ अथ चाल नाम ॥ भूमंडली विचकिलो द्विपदाषपदीन था ॥ शीतो लघुर्विचकिलः कफपित्तविषापहः ॥ रामः॥

वेदल कर्बलि तन्त्र राय वेल सिद्धः

कुंदः स्मृतः सदापुष्पो भंगवधुर्मनोरमः कुंदः शीतो लघुः श्लेष्मशिरोरुग्विषपित्तजित् २ रतिकुंद नामः

कुरसोनकपत्रास्या नागमाता सुमंजरी नामान्येतानि व्यक्तानि निर्दिष्टोतु हरिप्रिया १

(तुरा)

अथ तिलकनाम॥ तिलकः क्षुरकः श्रीमान्विचित्रो मुखमंडनः॥ तिलकः कफनुत्कुष्ठहरोत्युष्णो रसायनं॥११२॥ अथ गणिकायारिनाम॥ गणोरुका कणिकारा कणिकाग्नगणकारिका॥ गणोरुः शोथिनी शोफश्लेष्मास्रव्रणकुष्ठजित॥११३॥ अथ दुपहरिआनाम॥ बंधुजीवः शारत्पुष्पो बंधु बंधूकरक्तकाः॥ बंधूकः कफकृद्ग्राही वातपित्तहरो लघुः॥११४॥ अथ (गुडहरे ति पश्चिमे प्रसिद्धः) जास्योन त्रिसंधियानाम॥ जयापुष्पं जयारक्तं त्रिसंध्या त्वरुणासिता॥ जयासंग्राहिणी केश्या त्रिसंध्या कफवातजित॥११५॥ अथ (महासोहागिनि) सिंदूरीनाम॥ सिंदूरी रक्तबीजा स्याद्रक्तपुष्पा सुकोमला॥ सिंदूरी विषपित्तास्रतृष्णावांतिहरा हिमा॥११६॥ अथ तुलसीनाम॥ तुलसी सुरसा गौरी भूतघ्नी बहुमंजरी॥ अपेता राक्षसी ग्राम्या सुलभा देवदुंदुभिः॥ तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत॥ दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित॥११८॥ अथ मरुवानाम॥ मरुन्मरुवकस्तीक्ष्णः खरपत्रः फणिज्झकः॥ मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः॥११९॥ वृश्चिकादिविषश्लेष्मावातकुष्ठकृमीञ्जयेत॥ रूक्षकादिभवं शोथं नाशयेत्तत्प्रलेपनात॥१२०॥ अथ दमनानाम॥ दमनो

दमोर

मदनो दांतो मुनिपुत्रो मुनिः॥ गंधोत्कटो दमनको विनीतः कुलपुत्रकः॥१२१॥ दमनो विषकुष्ठास्रक्लेदकंडूत्रिदोषजित॥ अथ वनतुलसीनाम॥ बर्बरी तुंगी कः कुठेरकः स्यात्कुठेरकः॥ कपित्थो जंबक उत्यन्यो वटपत्रः कठिंजरः॥१२२॥

कल्माजकः कालसारकरालः कृष्णमल्लिका ॥ बर्बरीत्रितयं रूक्षं शीतं कटु विदाहि च ॥ १२३ ॥ पित्तलं कफवातास्रदद्रूकृ
मिविषापहं ॥ १२४ ॥ योगराजो मुख्यतिलकः कह्लारमल्लस्तेन श्रीमदनन्पेण निर्मिते ॥ ग्रंथेस्मिन्मदनविनोदना
म्नि पूर्णः कर्पूरप्रभृतिरयं सुगंधिवर्गः ॥ १२५ ॥ ःः ॥ इति मदनपालवि ॥ रचिते मदनविनोदनिघंटौ कर्पूरादिवर्ग
स्तृतीयः ॥ ३ ॥ यद्वांछया विश्वकृतोपि देवा ब्रह्मादयो यांति मुहुर्भवंति ॥ अचिंत्यकृत्यं पुरुषं पुराणं गोपालमाश्रित
मुपाश्रयामि ॥ १ ॥ अथ सुवर्णनाम ॥ सुवर्णं कनकं हेमहाटकं गार्भ कांचनं ॥ चामीकरं शातकुंभं तपनीयं च रुक्म
कं ॥ २ ॥ जांबूनदं हिरण्यं च स्वर्णं जातरूपकं ॥ सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनं ॥ ३ ॥ कांतिकारी विषोन्मादत्रि
दोषज्वरशोषजित् ॥ कषायं तिक्तमधुरं सुवर्णं गुरु लेखनं ॥ ४ ॥ अथ रूप्यनाम ॥ रूप्यकं रजतं कुप्यं तारं श्वेतं च सू
तमं ॥ स्वभ्रं सौधं शिने जातं रुचिरं तत्प्ररूपकं ॥ ५ ॥ रूप्यं शीतं सरं वातपित्तहृत् च रसायनं ॥ लेखनं च कषायाम्लं विपाके
मधुरं सरं ॥ ६ ॥ वयसः स्थापनं स्निग्धं धातूनां हितं बुद्धिमान् ॥ अथ ताम्रनाम ॥ ताम्रं म्लेच्छमुखं स्लवं नेपालं रवि
नामकं ॥ ताम्रं सरं लघु स्वादु शीतं पित्तकफापहं ॥ ७ ॥ रोपणं पांडुकुष्ठार्शःश्वासाश्वपथुकासजित् ॥ ८ ॥ अथ कां
स्यनाम ॥ कांस्यं लोहं निजं घोषं पंचलोहं प्रकाशकं ॥ कांस्यं गुरूष्णं चक्षुष्यं कफपित्तहरं सरं ॥ ९ ॥ अथ पीतलि

उडुंबरं स्वर्णपर्याय रक्तजं रक्तधातुकी २

पीतलोहं हिमं रूक्षं कटूष्णं कफपित्तनुद् १

ग कंतार

नाम॥ पीतलोहं सिंहलकं कपिलं सैक्यमारकं॥ वर्तलोहं त्रिलोहं च राजरीतिर्महेश्वरी॥१०॥ अथ रागनाम॥ रंगं
कथीरकं वंगं त्रपुस्यात्करटीघनं॥ रंगं लघुसरं रूक्षं शीतं मेहकफक्रमीन॥११॥ निहंति पांडुसस्वासे हृद्यं मीषत्तु पित्त
लं॥ अथ सीसानाम॥ सीसं धातुमलं नागं स्तुरंगं परिपिष्टकं॥ सीसं रंगगुणं ज्ञेयं विशेषान्मेहनाशनं॥१२॥ अथ
लोहनाम॥ लोहं शस्त्रमयं कृष्णं पिंडं पारावतेघनं॥ कालायसं तन्मलं किट्टं मंडूरं लोहजं रजः॥१३॥ लोहं सरं गुरु रू
स्वादु कषायं कफपित्तनुत॥ शीतं नेत्रहितं रूक्षं बलदं वातलं सरं॥१४॥ शोफकुष्ठप्रमेहार्शो गुरु पांडु क्रमी जयेत॥
तत्किट्टं तद्गुणं ज्ञेयं विशेषात्पांडुनाशनं॥१५॥ अथ पारानाम॥ पारदश्चपलो हेमनिधिः सूतो रसो नमः॥ त्रि
नेत्रो रोषणः स्वामी हरबीजं रसप्रभुः॥१६॥ पारदः क्रमिकुष्ठघ्नः चक्षुष्यो ज्ञो रसायनं॥१७॥ अथ अभ्रकनाम
म॥ अभ्रकं स्वच्छमाकाशं पटलं वरपीतकं॥ अभ्रं गुरु हिमं बल्यं कुष्ठमेहत्रिदोषजुत॥१८॥ अथ गंधकनाम॥ गं
धः सौगंधिको लेली गंधाश्मा पीतगंधकः॥ लेलीतको बलिवसा वैगंधो गंधको बलिः॥१९॥ गंधकः कटुकः पाके
वीर्योष्णः पित्तलः सरः॥ हंति कुष्ठक्षयप्लीहकफवातरसायनं॥२०॥ अथ सोनामुखीनाम॥ माक्षिकं धातुमा
क्षीकं ताप्यं तापीजमुच्यते॥ माक्षिकं तु वरं वृष्यं स्वर्यं लघुरसायनं॥२१॥ चक्षुष्यं कुष्ठशोफार्शोमेहवस्त्यर्ति

पांडुताः॥व्यवायिकटुकंहंतिरक्षोदरविषक्षयान्॥२२॥अथमनःशिलनाम॰॥मनःशिलाशिलागोलानैपाली
कुनटीकुली॥दिव्यौषधिर्नागमातामनोगुप्तामनाह्विका॥२३॥मनःशिलागुरुर्वर्ण्यासरोष्णालेखनीकटुः॥तिक्ता
स्निग्धाविषश्वासकासभूतकफास्रनुत्॥२४॥अथहरितालनाम॰॥हरितालमलंतालंगोदंतंनटभूषणं॥हरि
तालंकटुस्निग्धंकषायोष्णंविषंजयेत्॥२५॥कंडूकुष्ठास्यरोगास्रकफपित्तकचव्रणान्॥अथगेरुनाम॥गैरिकंर
क्तपाषाणोगिरिमृच्चागवेरुकं॥स्वर्णवर्णंपरंस्वर्णंमंडनंस्वर्णगैरिकं॥२६॥गैरिकंदाहपित्तास्रकफहिक्काविषापहं
चक्षुष्यमन्यत्तद्वच्चविशेषात्कांतिनाशनं॥२७॥अथनीलाथोथानाम॰॥तुत्थंखर्परिकातुत्थममृतासंगमुच्य
ते॥मयूरग्रीवकंचान्यच्छिखिकंठंचतुत्थकं॥२८॥तुत्थकंलेखनंभेदिकंडूकुष्ठविषापहं॥कफक्रिमिहरंत
द्दन्यच्चक्षुष्यमुत्तमं॥२९॥अथकासीसनाम॰॥कासीसंधातुकासीसंखेचरंतमलोमशं॥अपरंपुष्पका
सीसंतुवरंवस्त्ररागकृत॥३०॥कासीसद्वयमम्लोष्णंतिक्तंकेश्यंदृशोर्हितं॥हंतिकंडूविषश्वित्रमूत्रकृच्छ्रक
फानिलान्॥३१॥अथहिंगुलनाम॰॥हिंगुलंदरदंम्लेच्छंसैकतंचूर्णपारदं॥हिंगुलंपित्तकफनुच्चक्षुष्यंवि
षकुष्ठनुत॥३२॥अथसिंदूरनाम॰॥सिंदूरंनागजंरक्तंश्रीमत्शृंगारभूषणं॥वसंतमंडनंनागगर्भंरक्तर

जस्तथा ॥ ३३ ॥ सिंदूरमुष्णं वीसर्पकुष्ठकंडूविषापहं । भग्नसंधानजननं व्रणशोधनरोपणं ॥ ३४ ॥ अथ स्रोतसुर
मा कृष्णसुरमा नाम ॥ सौवीरमंजनं कृष्णं कालं नीलं सुवीरजं । श्वेतांजनं तु स्रोतोजं नदीजं यामुनं वरं ॥ ३५ ॥ सौवी
रं ग्राहि मधुरं चक्षुष्यं कफपित्तजित् ॥ हिध्माक्षयास्रनुच्छीतं स्रोतोंजनमपीदृशं ॥ ३६ ॥ अथ रसोत नाम ॥ रसांज
नं रसोद्भूतं तार्क्ष्यं शैलं च तार्क्ष्यजं ॥ रसाग्रं कृत्रिमं तार्क्ष्यं दार्व्यं दार्वीरसोद्भवं ॥ ३७ ॥ रसांजनं कटु श्लेष्ममुखने
त्रविकारजित् ॥ उष्णं रसायनं तिक्तं छेदनं व्रणदोषजित् ॥ ३८ ॥ अथ सपेदा नाम ॥ पुष्पांजनं पुष्पकेतु रीतिजं कु
सुमांजनं ॥ पुष्पांजनं क्षारमुष्णं काचार्मपटलापहं ॥ ३९ ॥ अथ शिलाजित नाम ॥ शिलाजित्वश्मजं शैलनि
र्यासो गिरिजाह्वयं ॥ शिलाह्वं गिरिजं शैलं गैरेयं गिरिजत्वपि ॥ ४० ॥ शिलाजतूष्णं कटुकं योगवाहि रसायनं
छर्दिप्रमेहवातार्शःकुष्ठाश्मोदरपांडुताः ॥ ४१ ॥ हंति श्वासक्षयोन्मादरक्तशोफकृमीञ्जयेत् ॥ अथ बोल नाम ॥
बोलं गंधरसं पौरं निर्लोहं वर्वरं चलं । बोलं रक्तहरं शीतं मेध्यं पाचनदीपनं ॥ ४२ ॥ कटुकं मधुरं तिक्तं ग्रहस्वेद
त्रिदोषनुत् ॥ ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशोधनं ॥ ४३ ॥ अथ फिटिकिरी नाम ॥ स्फटिकाख्याम्लता
कांक्षी सौराष्ट्रसंभवा निच ॥ आढकी तु वरी त्वन्या मृत्तिका सुरमृत्तिका ॥ ४४ ॥ स्फटिकाख्या कषायोष्णा क

कफपित्तविषघ्रणान्॥ निहंति छिन्न वीसर्पास्तु वरी तद्गुणा मता॥ ४५॥ अथ समुद्रफेननाम॥ समुद्रफेनो डिंडीरः फेनो।
वारिकफो ऽब्धिजः॥ समुद्रफेनश्चक्षुष्यो लेखनः शीतलः सरः॥ ४६॥ अथ प्रवालनाम॥ प्रवालं विद्रुमं स्निग्धं लताग्रं
रक्तवर्णकं॥ ४७॥ अथ मोतीनाम॥ मौक्तिकं शौक्तिकं मुक्ताफलं मुक्ता च शुक्तिजं॥ अथ पद्मरागनाम॥ माणिक्यं
पद्मरागः स्याद्रसरत्नं सुरत्नकं॥ ४८॥ अथ सूर्यकांतनाम॥ सूर्यकांतः सूर्यमणिः सूर्याख्यो दहनोपलः॥ अथ
चंद्रकांतनाम॥ चंद्रकांतश्चंद्रमणिः स्फटिकः स्फटिकोपलः॥ ४९॥ अथ गोमेदनाम॥ गोमेदः सुंदरं पीतरत्नं।
तृणचरं तथा॥ अथ हीरानाम॥ हीरकं भिदुरं वज्रं सूचीवक्त्रं वरांगकं॥ ५०॥ अथ नीलवैडूर्यमणिनाम॥ रत्नं नीलं
नीलमणिर्वैडूर्यं वालवायजं॥ अथ मरकतनाम॥ गारुत्मकं मरकतं दश्मगर्भं हरिन्मणिः॥ ५१॥ अथ मोती
सीपनाम॥ मुक्तास्फोटो ऽब्धिमंडूकी शुक्तिं मौक्तिकमंदिरं॥ अथ प्रवालादयः॥ प्रवालमुक्तामाणिक्यसू-
र्यशीतकरोपलाः॥ गोमेदवज्रवैडूर्यनीलगारुत्मतादयः॥ ५२॥ चक्षुष्या लेखनाः शीताः कषाया मधुराः
सराः॥ मंगल्या धारणाद्दश्रीदृष्ट्यग्रहविषापहः॥ ५३॥ अथ शंखनाम॥ शंखः कंबुर्जलचरो वारिजो दीर्घनिस्व-
नः॥ शंखो नेत्रहितः शीतो लघुः पित्तकफास्रजित्॥ ५४॥ अथ छोटीशंखनाम॥ शंखो लघुः शंखनखः शंबुका

वारिशुक्तयः॥ कपर्दाः स्युस्त्रिकास्तेयाश्चराश्चरवराटकाः॥५५॥ लघुशंखादयः शीता नेत्ररुक्स्फोटनाशनाः॥ अ
खेतखटी
थ खटीपरेवा खटीनाम॥ खडी मकोल्कः खटिनी श्वेता नागो तरंगकः॥ तद्भेदो गौडपाषाणः क्षारपाक उदाहृ।
तः॥५६॥ खडी दाहास्रनुच्छ्वित्रागो उष्णा वोपित्तकृत्कफः॥५७॥ अथ कीचवालूनाम॥ पंकः कर्दमको ज्ञेयो वालुका
सिकतास्तथा॥ पंको दाहास्रपित्तार्तिशोथघ्नः शीतलः सरः॥५८॥ वालुका लेखनी शीता व्रणोरःक्षतनाशिनी
अथ तुम्बकपाषाणनाम॥ चुंबकः कांतपाषाणोयस्कांतो लोहकर्षणः॥ चुंबको लेखनः शीतो मेदोविषगरा
पहः॥५९॥ अथ काचनाम॥ काचः कृत्रिमरत्नं स्यात्पिंगलः कचभाजनं॥ काचो विदाररोगो व्रणश्चक्षुष्यो लेख
नो लघुः॥६०॥ योगज्ञो मुख्यतिलकः कट्टारमल्लस्तेन श्रीमदननृपेण निर्मितेत्र॥ ग्रंथेभून्मदनविनोदना
म्नि पूर्णः श्विचो यं ललितपदैः स्वर्णवर्गः॥ ॥ इति मदनपालविरचिते मदनविनोदनिघंटौ स्वर्णादिधातु
वर्गश्चतुर्थः॥ ॥ करेणासंगरसकुचो महिष्याः पयपिवंते पुरुषं पुराणं॥ विचित्रलीले परिशुद्धशीले तमालनी
लेशिशुमाश्रयामि॥१॥ अथ वटनाम॥ वटो रक्तफलः क्षीरी बहुपादो वनस्पतिः॥ यक्षवासः पादरोही न्यग्रो
धः स्कंधजो ध्रुवः॥२॥ वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः॥ अथ पीपरनाम॥ पिप्पलः श्यामलोश्वत्थः क्षी

रक्तदोषगदाशनः॥ हरिवासश्चलदलो मंगल्यो बोधिपादपः॥३॥ पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्र-
पारसपीपर
जित्॥४॥ अथ पारीसपीपरनाम॥ पारिशोन्यः पलाशः स्यात्कपिचूतः कपीतनः॥ पारिशाश्वत्थको वृष्यः स्नि-
ग्धः श्लेष्मकृमिप्रदः॥५॥ अथ गूलरिनाम॥ उदुंबरः क्षीरवृक्षो जंतुवृक्षः सदाफलः॥ हेमदुग्धः कृमिफलो य-
कठूमर
ज्ञांगः शीतवल्कलः॥६॥ उदुंबरो हिमो व्रणरोपी गुरुः पित्तकफास्रजित्॥ अथ कठूमरिनाम॥ काकोदुंबरिका फ-
ल्गुर्मलयूः श्वित्रभेषजं॥ काकोदुंबरिका तद्वद्विशेषात् श्वित्रनाशिनी॥७॥ अथ पिलखनिनाम॥ प्लक्षः।
प्लवक्षीरवृक्षः स्यात्पार्श्वो गर्धभांडकः॥ वटीकमंडलुः पूतः पिप्पलिः स्याद्दृढदर्शनः॥८॥ प्लक्षः शीतो व्रणश्ले-
ष्मपित्तशोथविसर्पजित्॥९॥ अथ पंचवल्कलपंचक्षीरवृक्षाः॥ न्यग्रोधोदुंबराश्वत्थपारिशप्लक्षपादपाः॥
पंचैते क्षीरिणः प्रोक्तास्तेषां त्वक्पंचवल्कलं॥१०॥ त्वक्पंचकं हिमं ग्राहि विसर्पशोथविसर्पजित्॥ केचित्तु पारिश-
स्थाने शिरीषं वेतसं परे॥११॥ क्षीरवृक्षा हिमा वर्ण्या योनिदोषव्रणापहाः॥ शोथपित्तकफास्रघ्नाः स्तन्या
भग्नास्थियोगदाः॥१२॥ तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघु॥ फलं विष्टंभि संग्राहि रक्तपित्तकफापहं॥
जलपीपर
१३॥ अथ पनरी वृक्षनाम॥ नदीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः॥ नदीवृक्षोऽश्वत्थगुणो लघुर्योगरत्न

॥राम॥

तु नः ॥१४॥ अथ कदंबनाम ॥ कदंबो गंधमत्स्यष्टः प्रावृषेण्यो महोन्नतः ॥ अन्यो धूलिकदंबः स्यान्नीपो राज
कदंबकः ॥१५॥ कदंबः शीतलः श्लेष्मपित्तरक्तगदापहः ॥ अथ कोहनाम ॥ ककुभोर्जुननामा स्यान्नदीसर्जः स
ककुभः ॥ ककुभः शीतलो भग्नसंधानक्षयविषास्रजित् ॥१६॥ अथ शिरीषनाम ॥ शिरीषः पुष्पवर्गो विश्रः शुकवृक्षको
पीतनः ॥ मृदुपुष्पः श्यामवर्णो भंडीरः शंखिनीफलः ॥१७॥ शिरीषः शीतलो वृष्यो विषवीसर्पदोषहृत् ॥१८॥
अथ आर्तगलनाम ॥ आर्गटः स्यादार्तगलो बहुकंटः प्रवर्षणः ॥ आर्गटस्तु वरः शीतो व्रणशोधनरोपणः ॥१९॥
अथ – वेतनाम ॥ वेतसो वंजुलो नम्रो वानीरो दीर्घपत्रकः ॥ नादेयो मेघपुष्पोन्यस्तोयकामो निकुंजकः ॥२०॥ अथ जलवेतनाम ॥ जलौकासंवृतौ भोज्जो निचुलो जलवेतसः ॥२१॥ अथ इज्जलनाम ॥ इज्जलो हि
ज्जलो गुच्छफलः स्यात्कछपोलिका ॥ अथ वेतस जलवेतसनाम ॥ वेतसः शीतलो दाहशोफार्शोयोनिरुग्व्र
णान् ॥ हंति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् ॥ जलजो वेतसः शीतः संग्राही वातकोपनः ॥ इज्जलस्तु गुणैः
प्रोक्तो विशेषाद्विषनाशनः ॥२३॥ अथ लसोरानाम ॥ श्लेष्मांतकः कर्बुदारः पिच्छिलो भूतपादपः ॥ सेलुः सेलू
श्च सेलूकः सेलकोद्विजकुत्सितः ॥२४॥ श्लेष्मातको विषस्फोटव्रणवीसर्पकुष्ठजित् ॥ केश्योम्लस्तत्फलं च

ष्यं वातपित्तक्षयास्रजित ॥२५॥ अथ पीलुनाम ॥ पीलुः शीतसहस्रंसी गीनीस्वादुः करभप्रियः ॥ सहस्रांशी गुरुढफ
लस्तत्फलं पीलु पीलुजं ॥२६॥ पीलुः स्रंसी दीपनं भेदि रक्तपित्त — करं लघुः ॥ गुल्मार्शःप्लीहवाताश्मकफहारी र
सायनं ॥२७॥ अथ शाकोनाम ॥ शाकः खरच्छदो भूमीसहो दीर्घच्छदो मतः ॥ शाकः स्रंसो निलास्रगघ्नो गर्भसंधा
नदो हिमः ॥२८॥ अथ सालनाम ॥ शालः सर्जरसः सर्जश्चाश्वकर्णश्च पत्रकः ॥ शालो ग्राही व्रणश्लेष्मदग्धरुग
विषनुद्धिमः ॥२९॥ अथ तमालनाम ॥ तमाल उक्तस्तापिच्छः कालस्कंधोऽसितद्रुमः ॥ तमालस्तद्गुणः शोथदाह
विस्फोटहृत्तुनः ॥३०॥ अथ खयरनाम ॥ खदिरो रक्तसारः स्याद्गायत्री बालपत्रकः ॥ खदिरः श्वेतसारोऽन्यः
कार्मुकः कुष्ठकंटकः ॥३१॥ खदिरः शीतलो दंत्यकृमिमेहज्वरव्रणान ॥ चित्रशोथाममित्तास्रपांडुकुष्ठकफाञ्ज
येत ॥३२॥ निर्यासस्तस्य मधुरो बल्यः शुक्रविवर्धनः ॥ सारस्तु विशदो व्रणो मुखरोगकफास्रजित ॥३३॥ अथ
रेवजनाम ॥ इरिमेदो विट्खदिरो गोधास्कंधोऽरिमेदकः ॥ इरिमेदः कषायोष्णो मुखदंतगतास्रनुत ॥३४॥ हंति
कंडूविषश्लेष्मकृमिकुष्ठग्रहव्रणान ॥ अथ वंबूलनाम ॥ वंबूलः किंकिरातः स्यात्पीतकः पीतपुष्पकः ॥ वंबू
लः कफवद्ग्राही कुष्ठकृमिविषापहः ॥३५॥ अथ विजयसारनाम ॥ बीजकोऽशनकः शौरिप्रियकाम्पोलकप्रि

श्लो
अथ धवनाम॰ धवो नंदितरुर्गौरः स कषायो धुरंधरः धवः
शीतप्रमेहार्शः पांडुपित्तकफापहः १ अटि॰ १ १ १॥

यः॥ बीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रमीन् ॥३६॥ हंति श्लेष्मास्रपित्तानि त्वच्यः केश्यो रसायनं ॥३७॥ अथ ति।
निशनाम॥ तिनिशः स्यंदनो नेमी सर्ववसारो रथगर्भकः॥ तिनिशः श्लेष्मपित्तास्रमेदकुष्ठप्रमेहजित् ॥३८॥ अथ
भोजपत्रनाम॰॥ भूर्जो भुजो बहुपटो मृदुत्वक् लिख्यपत्रकः॥ भूर्जो भूतग्रहश्लेष्मकर्णरुक्पित्तरक्तजित्॥ अथ
पलाशनाम॰॥ पलाशः किंशुकः कर्मीयाख्तको ब्रह्मपादपः॥ क्षारश्रेष्ठो रक्तपुष्पस्त्रिवृंतः समिद्वरमः॥४०॥ पा।
लाशो दीपनो वृष्यः सरो स्नाव्रणगुल्मजित्॥ भग्नसंधानकृद्दोषग्रहण्यर्शः क्रमीन्हरेत्॥४१॥ तत्पुष्पं कफपि।
त्ताम्लकृच्छ्रजिद्ग्राहि शीतलं॥ फलं लघूष्णं मेहार्शः — क्रिमिवातकफापहं॥४२॥ अथ धन्वयासनि नाम॰॥ धन्वनो।
गोत्रविटपी धर्मणो गोत्रपुष्पकः॥ धन्वनः कफपित्तास्रकासजिज्ज्वरोल्बणः॥४३॥ अथ सर्जनाम॰॥ सर्जो
जकर्णः स्त्रिद धूपोलताव्हः संकुदेहकः॥ सर्जो वर्णाः कफस्वेदमलपित्तक्रमीञ्जयेत्॥४४॥ अथ सिधौराना
म॰॥ सारवोदस्यात्पीतपुष्पस्त्वगोक्षीरविनाशनः॥ सारवो दोषवातरक्तार्शः कफवातातिसारजित्॥४५॥ अथ
वरणावृक्ष विशेषः २
वरुणनाम॰॥ वरुणो वारुणः सेतुः श्वाकव्हसः कुमारकः॥ वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान्॥४६॥ निहं
ति गुल्मवातास्रक्रमीन् स्नो ग्निदीपनः॥ अथ जिंगिणीनाम॰॥ जिंगिणी भिंगिणी जिंगी सुनियासाच मोदकी

कुंदुरुकस्यविरोक

जिंगिनीव्रणहृद्रोगवाता॥तीसारजित्कटुः॥४७॥उक्तस्तस्यास्तुनिर्यासस्तस्माद्गुणव्यापहः॥४८॥अथसालनाम॥
सल्लकीवल्लकीमोचागजभक्ष्यामहारुहा॥गंधवीराकुंदुरुकीसुरभीवल्लकर्णिका॥४९॥सल्लकीग्राहिणीतिक्ता
श्लेष्मपित्तातिसारजित्॥ अथहिंगोटनाम॥इंगुदीमल्लकोवृक्षःकंटकस्तापसद्रुमः॥इंगुदीकुष्ठभूतादिग्रहव्रण।
विषकृमीन्॥५०॥हंत्युष्णंश्वित्रशूलघ्नंतत्फलंकफवातजित्॥५१॥अथकरहेटीनाम॥कटंभरश्चारुशुंठीकटभीतृण
शौंडिकः॥कटंभरःप्रमेहास्रनाडीव्रणविषकृमीन्॥५२॥हंत्युष्णःकफकुष्ठघ्नस्तत्फलंकफशुक्रकृत्॥निर्यासोस्यगु
रुर्वृष्योबलकृद्वातनाशनः॥५३॥अथमोखनाम॥मुष्ककोमोक्षकोघंटासिखरीक्षुद्रपाटलः॥मोक्षकःकफवा
तघ्नोग्राहीगुल्मविषकृमीन्॥५४॥हंत्युष्णोवस्तिरुक्छेदीतत्पुष्पंकफपित्तजित्॥निर्यासोस्यपरंवृष्यःशोषपित्तानि
लापहः॥५५॥अथफरासनाम॥ (पश्चिमेप्रसिद्धः) पारिभद्रोनिंबवृक्षोरक्तपुष्पप्रभद्रकः॥कंटकीपारिजातःस्यान्मंदारःकंटकिंशुकः
॥५६॥पारिभद्रःकृमिश्लेष्ममेदःशोथानिलापहः॥५७॥अथसेमरिनाम॥शाल्मलीतूलिनीमोचाकुक्कुटीरक्त
पुष्पिका॥कंटकाढ्यास्थूलफलापिच्छिलाचिरजीवनी॥५८॥शाल्मलीशीतलावृष्याबृंहणीरक्तपित्तजित्॥
निर्यासोस्यपरंवृष्यःसोषपित्तानिलापहः॥५९॥रसायिनीवराहस्निग्धातत्पुष्पंस्यात्हिपुष्पजित्॥अथश्वेततुराणनाम॥

म्हत्र लोके कुकुरमुना

तुणिः कुबेरश्चापीतस्तुन्नको देतिपादपः॥ तुणिस्त्यो हिमो वृष्यो व्रणाकुष्ठास्रपित्तजित्॥१०॥ अथ सप्तपर्णनाम॥
सप्तपर्णो गुच्छपुष्पः छत्री शाल्मलिपत्रकः॥ सप्तपर्णो व्रणश्लेष्मवातकुष्ठहरः सरः॥११॥ अथ हरिद्रुनाम॥ हारि-
द्रुकः पीतवर्णोऽम्ली मान्योरदुमो वरः॥ हारिद्रुकः कफहरो व्रणशोधनरोपणः॥१२॥ अथ करंजनाम॥ करंजो नक्त-
मालः स्यान्नक्ताह्वो ध्वजपर्णकः॥ पूतिकोऽन्यः पूतिवर्णः प्रकीर्णश्चिरबिल्वकः॥१३॥ करंजः कटुकस्तीक्ष्णो वी-
र्योष्णो योनिदोषजित्॥ कुष्ठोदावर्तगुल्मार्शो व्रणक्रिमिकफापहः॥१४॥ तत्फलं कफवातघ्नं मेहार्शःक्रिमिकुष्ठजि-
त्॥ तत्पत्रं कफवातार्शःक्रिमिकुष्ठप्रमेहजित्॥१५॥ अथ करंजीनाम॥ करंजिका काकतिक्ता वायुघ्नांगारवल्ल-
री॥ करंजिकोष्णा वातार्शःक्रिमिकुष्ठप्रमेहजित्॥१६॥ अथ तिरिगिसीनाम॥ तिरिगिछिर्वल्लीः कंकरं करंजः श्वारि-
णीक्षिपः॥ तिरिगिछिर्वल्लासास्रपित्तशोषक्षमीष्क्रयेत॥१७॥ अथ शमीकरनाम॥ शमी तुंगा शंकुफला पवित्रा केश-
हृत्फला॥ लक्ष्मी शिवान्या। श्वेसमीभ्र शमीशंकराह्वया॥१८॥ शमी शीता लघुः श्वासकुष्ठार्शःकफहृत्सरा॥ त-
त्फलं पित्तलं रूक्षं मेध्यं केशविनाशनं॥१९॥ अथ ठिंठिरणीनाम॥ शिरीषिका ठिंठिणिका दुर्वल्लो गुशिरीषिका॥
ठिंठिणीकफकुष्ठार्शःसंनिपातविषापहा॥२०॥ अथ रीठानाम॥ अरिष्टको गर्भपाती कुंभवीर्यश्चापे नि-

अरिष्टकास्त्रिदोषघ्ना उल्सोगर्भग्रहापहः १

लः ॥ रक्षावीजो रक्तवीजः पीतफेनो —— र्थसाधनः ॥ ७१ ॥ अथ सीसवनाम ॥ शिंशिपा कपिला ब्रह्मसारा मं
डलपत्रिका ॥ अन्या कृष्णशिंशिपो भस्मपिंगला स्याच्छ्यामादनी ॥ ७२ ॥ शिंशिपोष्णा हरेन्मेदःकुष्ठश्वित्रवमिक्रिमी।
न् ॥ वस्तिरुग्व्रणदाहास्रशोफस्त्रीगर्भपातनी ॥ ७३ ॥ अथ अगस्त्यनाम ॥ अगस्त्यो हीवंगसेनो मधुसिसुा
मुनिद्रुमः ॥ अगस्त्यः पित्तकफजिच्चातुर्थकहरो हिमः ॥ ७४ ॥ तत्पुष्पं पीनसश्लेष्मपित्तनक्तांध्यनाशनं ॥ ७५ ॥
योराज्ञो मुख्यतिलकः कदारमल्लस्तेन श्रीमदनन्पेण निर्मिते त्र ॥ ग्रंथे श्रीमदनविनोदनाम्नि पूर्णोश्वि
त्रो यं ललितपदे वटादिवर्गः ॥ ७६ ॥ ॥ इति मदनपालविरचिते मदनविनोदनिघंटौ वटादिवर्गः पं
चमः ॥ ॥ भ्रमो घ्रलह्ववेरिकाग्रपिच्छं मंदस्मितं वेणुनिनादरक्तं ॥ गोपालिकानां करतालिकाभिर्नृत्यं
न्महस्तन्य रमं स्मरामि ॥ १ ॥ अथ द्राक्षानाम ॥ द्राक्षा मधुफला स्वाद्वी हारहूरा फलोत्तमा ॥ मृद्वीका मधुयोनि ।
निश्चरसाला गोस्तनी गुडा ॥ २ ॥ द्राक्षा पक्का सरा शीता चक्षुष्या बृंहणी गुरुः ॥ हंति तृष्णाज्वरश्वासवातवाता
स्रकामलाः ॥ ३ ॥ कृच्छ्राम्लपित्तसंमोहदाहशोषमदात्ययान् ॥ आमा साल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृ
त् ॥ ४ ॥ निर्बीजान्या लघुर्द्राक्षा गोस्तनी सदृशा गुणैः ॥ द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत् ॥ ५ ॥

पित्तहा वातकृद्धालं पित्तलं बहुकेशरं ५

अथ आम्रनाम॰॥ आम्रो वनो द्रुवस्तूतः सहकारोतिसौरभः॥ माकंदः पिकवंधुः स्याद्रसालः कामवल्लभः॥ गु
ह्यापुष्पं प्रियाद्रुश्च संस्त्रष्टो मदनाशकः॥ तथा वसंतदूतश्च परपुष्टमहोत्सवः॥ ७॥ मनोधिवासः समदेरः मन्म
थोमन्मथालयः॥ आम्रो ग्राही प्रमेहास्रकफपित्तव्रणाञ्जयेत॥ ८॥ तत्फलं बालमत्युम्लं रूक्षं दोषत्रयास्रकृत
पक्वं तु मधुरं वृष्यं स्निग्धं हृद्यं बलप्रदं॥ ९॥ गुरुर्वातहरं रुच्यं च वर्ण्यं शीतमपित्तलं॥ रसस्तस्य सरः स्निग्धो रोचने
बलवर्णकृत॥ १०॥ वातपित्तास्रकृद्बालमपक्वं पित्तवर्द्धनं॥ सहकारं तु वातघ्नं पित्तश्लेष्मविनाशनं॥ ११॥ पक्वाम्रं ज
नयेद्वायुं मांसशुक्रबलप्रदं॥ मधुरं यो गुरुः स्निग्धं विशेषानु बलप्रदं॥ १२॥ स्त्वक्कमाम्रं कषायाम्लं स्केदनं कफवा
तजित॥ अथ जाम्बुनिरायजाम्बुनि नाम॰॥ महाजंबू राजजंबूर्महास्कंधा च हस्तफला॥ क्षुद्रजंबूर्वीरपत्रा मेधा
भा काकवल्लभा॥ १३॥ नादेयी स्यात्क्षुद्रफला तत्फलं जंबुजं ववं॥ जंबूः संग्राहिणी रूक्षा कफपित्तव्रणास्रजि
त॥ १४॥ राजजंबूफलं स्वादु विष्टंभि गुरु रोचनं॥ क्षुद्रजंबूफलं तु द्विशेषाद्दाहनाशनं॥ १५॥ अथ नारिकेरना
म॥ नालिकेरस्तु गावक्षोल्वनावक्षो महाफलः॥ तृणराजस्तृपस्सफलो लांगली दृढबीजकः॥ १६॥ नालिके
लफलं शीतं दुर्जरं वस्तिशोधनं॥ विष्टंभि बृंहणं बल्यं वातपित्तास्रदाहजित॥ १७॥ तस्यांभः शीतलं हृद्यं दीप

खर्जूरी

नेत्रशुक्रलेलघु॥ तत्स्यादपशिरो मत्स्याशुक्रलो वातपित्तजित ॥१४॥ अथ छोहारानाम ॥ वृहत् खर्जूरिकाश्रेणीषु
फलाढीयसंभवा॥ पिंडखर्जूरिका खर्जू द्रुःप्रधर्षास्तवकंटका ॥१९॥ अन्यास्कंधफला स्वाढीङ्गारोहा मृदु
छदा॥ भूमिखर्जूरिका कोकें — काककर्कटी ॥२०॥ खर्जूरिकाफलं शीतं स्वादु स्निग्धं क्षतास्त्रजित॥ बल्यं
हंति मरुत्पित्तमदमूर्छामदात्ययान् ॥२१॥ तस्मादल्पगुणोज्ञेयमन्यत् खर्जूरिकाफलं॥ तन्मस्तका मूर्धजः शी
तो वृष्यः पित्तास्त्रदाहजित ॥२२॥ अथ सिलेमानीखजूरनाम॥ सिलेमानीफला लोकेमदुलानिर्वली फला सि
लेमानीश्रमभ्रांतिदाहमूर्छास्त्रपित्तनुत ॥२३॥ अथ केरानाम॥ कदली ग्रंथिनी मोचा रंभा वीराय तछदा॥
कदलीयो निदोषा स्वरक्तपित्तहरा हिमा॥२४॥ तत्कंदः शीतलो बल्यः केश्यः पित्तकफास्त्रजित॥ तत्फलं मधु
रं शीतं विष्टंभि कफकृद्गुरुः॥२५॥ स्निग्धं पित्तास्त्रतृड्दाहक्षतक्षयसमीरजित॥ अथ अनारनाम॥ दाडिमी
रक्तकुसुमा दंतवीजा शुकप्रिया॥ दाडिमं ह्रीपनं हृद्यं रोचनं नातिपित्तलं॥२६॥ कषायानुरसग्राही द्विधा स्वा॥
द्वम्लभेदितत॥ तयोः स्वादुत्रिदोषघ्नमम्लं वातवलावहं॥२७॥ शुक्राम्लं दाडिमीसारं कंदं तु पित्तवातकृत॥२८॥
अथ वैरिनाम॥ वदरी कर्कंधू घोंटा कोलं कोयुग्मकेरिका॥ अन्या स्निग्धछदा कोशफला सौवीरिका परा॥ ॥रामः॥

गो

री

हस्तिकोलिः परा त्वन्या लघ्वी कर्कंधुर्धोधुका ॥ बदर्यः शीतला स्निग्धा हृद्याः पित्तकफापहा ॥ ३० ॥ अथ बेरिभेद
बदरं त्वपरं कोलं फेनिलं कुवलं कुहं ॥ कर्कंधुः स्वबदरं बदरं केरकंधुके ॥ ३१ ॥ पक्वमामं च मधुरं मतं सौवीरकं
महत् ॥ बदरं लघु संग्राहि रुच्यमुष्णं समीरजित् ॥ ३२ ॥ कफपित्तकरं तद्वत्कोलं गुरु सरं स्मृतं ॥ सौवीरं बदरं शीतं
भेदनं गुरु शुक्रलं ॥ ३३ ॥ बृंहणं पित्तवातास्रक्षयतृष्णानिलापहं ॥ कर्कंधु मधुरं स्निग्धं गुरु पित्तानिलापहं
॥ ३४ ॥ शुष्कं भेद्यग्निकृत्सर्वं लघु तृष्णाक्लमास्रजित् ॥ मरुत्पित्तहरं तस्य मज्जा वृष्यो बलप्रदः ॥ ३५ ॥ अथ
खिरिणीनाम॰ ॥ क्षीरी क्षत्रिय राजा स्याद्राजादन्यफलाशिनः ॥ राजन्यस्तस्य भेदोन्यः श्विरवुको मुचितिंदुकः
॥ ३६ ॥ क्षीरवृक्षफलं शीतं स्निग्धं गुरु बलप्रदं ॥ तृष्णामूर्छामदभ्रांतिक्षयदोषत्रयास्रजित् ॥ ३७ ॥ अथ चिरौ
जीनाम॰ ॥ चारो धनुःपटः शीलः प्रियालो मुनिवल्लभः ॥ चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ॥ ३८ ॥ स्नि
ग्धं सरं मरुत्पित्तदाहतृष्णाश्रमापहं ॥ तन्मज्जा मधुरो वृष्यः शुक्रलं पित्तवातजित् ॥ ३९ ॥ अथ फालसानाम॰
परूषकोल्पदुफलः परुषो रोपणाः परः ॥ परूषकं कषायाम्लमामं पित्तकरं लघु ॥ ४० ॥ पक्वं तु मधुरं पाके शीतं
विष्टंभि बृंहणं ॥ हृद्यं तृट्पित्तदाहास्रक्षतक्षयसमीरजित् ॥ ४१ ॥ अथ तेंदुपतेंदूनाम॰ ॥ तिंदुकः स्पेरनकः स्फू

जःकालसारश्चरावणाः॥काकपीलुःकुपीलुःस्यादपरोविषतिंदुकः॥४२॥तिंदुकोव्रणवातघ्नस्तत्सारंश्वित्र
कुष्टजित॥आममस्यफलंप्राहिवातलंशीतलंलघुः॥४३॥पक्वंपित्तप्रमेहार्शःश्लेष्मघ्नंविशदंगुरुः॥विषतिंदु
कमप्येवंविशेषाद्ग्राहिशीतलं॥४४॥अथकाकोनीम॥किंकिरणीग्रंथिलोव्याघ्रपादोदेवनरुर्वरः॥किंकिरा
णीज्वरातिघ्नापित्तश्लेष्महराहिमा॥४५॥तत्फलंवातलंत्वामंपक्वंस्वादुत्रिदोषजित॥अथआरुनाम॥आरु
कंवीरसेनेत्यन्ज्ञातिभेदाश्चतुर्विधः॥आरुकंजारकंवातमेहार्शःकफनाशनं॥४६॥अथमधूकानाम॥मधूकोम
धुकस्तीक्ष्णाःसारश्चमधुपुष्पकः॥गौलाफलोमधुष्ठीलोमधुकोष्ठोमधुद्रुमः॥४७॥मधूकोन्योजलरुहफलोम
ध्वंगोदीर्घपत्रकः॥मधूकःकफवातघ्नःकषायोव्रणरोपणः॥४८॥तस्यपुष्पंमधुरंबल्यंशीतलंगुरुबृंहणं॥फ
लंशीतंगुरुस्वादुशुक्रलंवातपित्तजित॥४९॥स्वैहृद्येहंतितृष्णास्रदाहश्वासक्षतक्षयान्॥आमंतदेवविष्टं
भिवातलंतुवरंगुरुः॥५०॥अथकटहरनाम॥पनसःकंटकिफलोस्यात्सयोगर्भकंटकः॥पनसंशीतलंपक्वं
स्निग्धंपित्तानिलापहं॥५१॥बल्यंशुक्रप्रदंहंतिरक्तपित्तक्षतक्षयान्॥आमंतदेवविष्टंभिवातलंतुवरंगुरुः॥
५२॥अथबडहरनाम॥लकुचःस्यात्अपनसोलिकुचोग्रंथिमत्फलः॥लकुचंगुरुविष्टंभिस्वादम्लंरक्तपि

नकृत ॥५३॥ श्लेष्मकारी समीरघ्नमुत्स्नं शुक्राग्निनाशनं ॥५४॥ अथ ताडनाम ॥ तालो ध्वजो द्रुराजो हस्त - राजो मा
हाद्रुमः ॥ तालः शीतो मरुत्पित्त व्रणाजिन्मदशुक्रकृत ॥५५॥ तत्फलं शीतलं बल्यं स्निग्धं स्वादुतरं गुरु ॥ विष्टंभि वात
पित्तास्रक्षतदाहक्षयापहं ॥५६॥ बीजं मूत्रकरं वृष्यं वातपित्तहरं हिमं ॥ अथ खर्जूरनाम ॥ खर्जूरफलराजे स्याद
मृताह्वं स्वांगुलं ॥ खर्जूरं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ॥५७॥ स्निग्धं स्वादुरसं शीतं वृष्यं पित्तानिलापहं ॥ प
क्वं तु साम्लं समस्तारं मूत्रकृच्छ्रहरं परं ॥५८॥ अथ सेवनाम ॥ सृष्टिप्रमाणी वदरं सेवं सिवितिकाफलं ॥ फलं सिवि
तिकापूर्वं वातपित्तहरं गुरु ॥५९॥ बृंहणं कफकृद्वृष्यं स्वादुपाकरसं हिमं ॥६०॥ अथ आबीसेवं आंबिलीतिनाम ॥
अन्यदंभःफलं चापो मन्त्रिविविचितिकाफलं ॥ अंभःफलं सेविगुणं विशेषात्तुवरं हिमं ॥६१॥ अथ अमृतफलनाम ॥
अमृताह्वं रुचिफलं लघुविल्वफलाकृति ॥ अमृतं गुरु वातघ्नं स्वाद्वम्लं रुचिशुक्रकृत ॥६२॥ अथ वदामनाम ॥
वातामं स्यात्फलं वातवैरिनेत्रोपमं मतं ॥ वातामं मुत्स्नं सुस्निग्धं वातघ्नं गुरु शुक्रकृत ॥६३॥ अथ पिस्तानाम ॥ निकोच
के दारुफले अंकोट - हंजल गोजकं ॥ पिस्तं मकूलकं रेयं ———— दंतीफलसमाकृति ॥६४॥ नि
कोचकं गुरु स्निग्धं वृष्योष्णं स्वादु वृंहणं ॥ रक्तप्रसादनं बल्यं वातघ्नं कफपित्तकृत ॥६५॥ तद्वन्मकूलकं रेयं वि

बीहीदाने सीमर्क ... अमरूत नाम
अमरूता सरवानीजप

रत्वानकुत्रविश्रतिः

रोचनं रूक्षं दुर्जरं ॥ अथ डुलायची ॥ एतानमामं वातघ्नमम्लो रूक्षं रेचनं गुरु ॥ पक्वं स्वादु हिमं बल्यं वातपित्तवि
नाशनं ॥ ६६॥ अथ श्रीडुंनाम ॥ अम्लकं भल्लमम्लकं रालं रक्तफलं तथा ॥ अम्लकं रसतः शीतं स्वादु कफं वा
तपित्तहृत् ॥ ६७॥ अथ अंजीर ॥ अंजीरं मंजुलं गोहकाकोडुंबरिका फलं ॥ अंजीरं शीतलं स्वादु गुरु ल्मपित्तास्र
वातजित् ॥ ६८॥ तस्मादल्पगुणोस्ते यं मंजीरं लघु तद्गुणैः ॥ ६९॥ अथ अखरोट ॥ अ—क्षोटकोवृत्तफलः
कंदरालः पृथुच्छदः ॥ अक्षोटं मधुरं बल्यं गुरु स्निग्धं वातहृत्सरं ॥ ७०॥ अथ पालेवक माणवक नाम ॥ पा
लेवतं सितं पुष्पं स्निग्धं स्वाद्वम्लं भफलं मतं ॥ तद्वन्माणवकं ज्ञेयं महापालेवतं तथा ॥ ७१॥ पालेवतं हिमं स्वादु गु
रु स्निग्धं वह्निवातजित् ॥ तद्वन्माणवकं हृद्यं तृष्णाघ्नं मिष्टमस्तकं ॥ ७२॥ अथ तूत ॥ तूतं तूदं ब्रह्मकाष्ठं बहु
लपं ब्रह्मचारु च ॥ तूतं गुरु हिमं पक्वं स्वादु पित्तानिलापहं ॥ ७३॥ अथ गांगेरुकौ तद्भेदः ॥ गांगेरुकं कर्कटकं
कर्क[illegible]रं स्मृगलेंजिकं ॥ नोरनं क्षेरनं चान्यन्मृगविट् सदृशं तथा ॥ ७४॥ गांगेरु रोचनं पक्वं गुरु वातास्रपित्तजि
त् ॥ नोरनं याहि मधुरं वातपित्तहरं लघु ॥ ७५॥ अथ तद्भेदः ॥ तत्ता द्विविध्रितये सामलमुक्तमामं तु पित्तलं ॥ कषा
यवत्फलैः पत्रैर्के रामैः समुद्भवः ॥ ७६॥ अथ तुवरक ॥ वृक्षस्तुवरको ज्ञेयो भल्लातकसमो गुणैः ॥ तोवरंकफा

जित्याकेकटुस्नेब्रणामेहहृत ।।७७।। अथ बिजौरा ।। बीजपूरो मातुलुंगः केसरी फलपूरकः ।। बीजपूरलपूरुच्यं र।
सेम्लं दीपनं लघुः ।।७८।। रक्तपित्तहरं कंठजिह्वाहृच्छोधनं परं ।। त्वक्तस्यतिक्ता गुर्वी स्यात्क्रिमिवातकफापहा ।।७९।।
तन्मांसं बृंहणं शीतं गुरुपित्तसमीरजित् केसरं लघु संग्राहि शूलगुल्मोदरापहं ।।८०।। बीजमुस्नंक्रमिश्लेष्म
वातजिद्गर्भदं गुरु ।। तत्तुष्यंशीतलं ग्राहि रक्तपित्तहरं लघुः ।।८१।। शूलाजीर्णविबंधेषु मंदाग्नौ कफमारुते ।। अ
रुचिश्वासकासेषु रसस्तस्याः प्रदीयते ।।८२।। अथ मीठाकाकरी ।। मधुकर्कटिका स्वादुलुंगी घंटालिका व
टा ।। मधुकर्कटिका शीता रक्तपित्तहरा गुरुः ।।८३।। अथ नारंगी ।। नारंगको नागरंगो गोरक्षो योगसारकः ।।।
नारंगमम्लमत्युष्णं रुच्यं वातहरं सरं ।।८४।। स्वाद्वम्लमपरं हृद्यं ——— दुर्जरं वातनाशनं ।। अथ
जंबीरी ।। जंबीरको दंतशठो जंभीलो जंभलो मतः ।। जंबीरमुष्णं शूलघ्नं गुर्वम्लं कफवातजित् ।।८५।। आस्यवै
ठार्ति हृत्पीडा वह्निमांद्य क्रमीन् हरेत ।।८६।। अथ अमिलवेत ।। अम्लोम्लवेतसः चुक्रो शुक्रो वेतसभेदकः ।। अ
म्लवेतसमत्यम्लं भेदनं लघुदीपनं ।।८७।। हृद्रोग शूल गुल्मघ्नं पित्तार्शः कफदूषणं ।। अथ अमिलवेती ।। सा
राम्लकः सारफलो रसाम्लः सारपादपः ।। साराम्लमम्लं वातघ्नं गुरुपित्तकफप्रदं ।।८८।। अथ निंबूक ।। नि

हृत्पीडा

साराम्लनाम

एकं निंबुकं राजनिंबूकमपरं स्मृते ॥ निंबूकमम्लं वातघ्नं पाचनं दीपनं लघुः ॥८९॥ राजनिंबूफलं स्वादु
गुरु पित्तसमीरजित ॥९०॥ अथ कमरख ॥ कर्मरंगं रामफलं मध्ये पिच्छिलबीजकं ॥ कर्मरंगो हिमं ग्राही स्वा-
द्वम्लं कफपित्तजित ॥९१॥ अथ आमिली ॥ अम्लिका चुक्रिका चिंचा तिंतिणी सूक्ष्मचंडिका ॥ अम्लिकाम्ला गु-
रुर्वातहरा पित्तकफास्रकृते ॥९२॥ पक्वा तद्वत्सरा हृद्या वह्निबस्तिविशुद्धिकृत ॥ शुष्का हृद्या श्रमभ्रांतितृ-
ष्णाघ्नी मधुरा लघुः ॥९३॥ अथ तिंतिडीक ॥ तिंतिडीकं तु वृक्षाम्लमम्लशाको म्लपादपः ॥ तिंतिडीकं समीरघ्न-
मामं मुख्यं परं गुरु ॥९४॥ तत्पक्वं लघु संग्राहि ग्रहणी कफवातजित ॥ अथ करौदा ॥ करमर्दी सुखेणः स्याद्वन्या
कृष्णफला पमा ॥ करमर्दं गुरु स्वाम्लं रक्तपित्तकफप्रदं ॥९५॥ तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित ॥ शु-
ष्कं पक्वं वदर्याभं पक्वमप्याईमामवत ॥९६॥ अथ कैत ॥ कपित्थकोदधिफलो रघित्थः सुरभिच्छदः ॥ कपि-
त्थमामं संग्राहि लघु दोषत्रयापहं ॥९७॥ पक्वं गुरु तृषा हिक्काशमनं वातपित्तजित ॥ स्वाद्वम्लं तुवरं कंठशो-
धनं ग्राहि दुर्जरं ॥९८॥ अथ कैतपत्री ॥ कपित्थपत्री फाणिजा कुलजा तुंवपत्रिका ॥ कपित्थपत्री तीक्ष्णोष्णा
कफमेहविषापहा ॥९९॥ आमरूत ॥ आम्रातकः स्वाम्रवाटः फलेशो दुःफलः कपिः ॥ आम्रातमामं वातघ्नं गु-

मधु ४

रुच्यं रुचिकृत्सरं ॥ पक्वं स्वादु हिमं वृष्यं मरुत्पित्तक्षतास्रजित् ॥ १०१ ॥ अथ राजाम्रः ॥ राजाम्रष्टंकाम्राम्रातः कामाङ्को
राजपुत्रकः ॥ राजाम्रं मधुरं शीतं ग्राहि पित्तकफापहं ॥ १०२ ॥ अथ चतुरम्ल पंचाम्लः ॥ वृक्षाम्लदाडिमीचिंचाकपित्थैश्चतु
रम्लकं ॥ अम्लवेतसवृक्षाम्लदाडिमीवदरैः क्वचित् ॥ १०३ ॥ वीजपूरयुतैरेतैः पंचाम्लमुदितं बुधैः ॥ अम्लिपिञ्चानामांतरे
णा कोशाम्रः ॥ कोशाम्रको घनस्कंधो जंतुवृक्षः सकोशकः ॥ कोशाम्रः कुष्ठशोथास्रपित्तव्रणविषापहः ॥ १०४ ॥ तत्फ
लं ग्राहि वातघ्नमम्लोष्णं गुरु रुचिकृन्नले ॥ मज्जापित्तसमीरघ्नः स्वादुर्बल्योऽग्निदीपनः ॥ १०५ ॥ अथ सोपारी ॥ क्रमुकंचिक्कचि
क्कं पूगं पूगीफलमुदाहृतं ॥ पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ॥ १०६ ॥ मोहनं दीपनं रुच्यमास्यवैरस्यनाशनं ॥ आ
र्द्रं तद्गुर्वभिष्यंदि वह्निदृष्टिहरं परं ॥ १०७ ॥ स्विन्नं त्रिदोषहृत्सर्वोत्तमं ज्ञेयं रक्तदृढादिशेत ॥ १०८ ॥ अथ ताम्बूलं ॥ ताम्बूल
वल्ली ताम्बूली नागिनी नागवल्लरी ॥ ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरं ॥ १०९ ॥ तिक्तं क्षारोषणं कामरक्तपित्तकरं
लघुः ॥ वश्यं श्लेष्मास्यदौर्गंध्यमलवातश्रमापहं ॥ ११० ॥ अथ हरफारेवडी ॥ घनस्निग्धमरुत्स्त्रांशुप्रपुन्नाटसमच्छदा ॥
सुगंधमूला लवली पांडुकोमलवल्कला ॥ १११ ॥ लवल्याः फलमुद्दिष्टं श्यामं ज्योत्स्नाफलं तथा ॥ लवलीफलमस्रा
र्शोवातपित्तहरं लघु ॥ ११२ ॥ इति लवली ॥ फलतुल्यगुणां सर्वं मज्ञानमपि निर्दिशेत् ॥ फले हिमाम्निदुर्वीतव्यालकी

दाहिदूषितं ॥१९३॥ अकालजातेनाम्रीयात्याकातीतमम्लमिर्त्तं ॥ आमंदोषकरं प्रायः फलं बिल्वं विनाखिलं ॥१९४॥
यो राज्ञां मुकुटस्य तिलकः कर्पूरमल्लस्तेन श्रीमदनन्नपेण निर्मिते ग्रंथेस्मिन्मदनविनोदनाम्नि पूर्णो द्राक्षादिर्लेलि
तपदैः श्लोकैर्विचित्रः ॥१९५॥ ॥ इति मदनपा विरचिते मदनविनोदनिघंटौ द्राक्षादिवर्गः षष्ठः ॥ ॥ राधापदाब्जे नि
पतन्ति नोदीमानापन्नं त्वेजगादेकबंधुः ॥ केनापि कामेन सगोपरूपी पायादपायात्पुरुषः पुराणः ॥१॥ अथ कूष्मांडना
मगुणाः ॥ सर्वशाकेषु जीवंती श्रेष्ठानिंद्यस्तु सार्षपः ॥ कुष्मांडं चतुर्धीनस्तुष्पच्छद्रकोदफलैः स्मृतं ॥२॥ कूष्मांडकी पु
ष्पफला सोमकांतमहाफला ॥ कर्कारुरपरालघ्वी स्यादेहराजकर्कटी ॥३॥ कूष्मांडं बृंहणं शीतं गुरुपित्तास्रवातन
जित् ॥ बाले पित्तापहं शीतं मध्यमं कफकारकं ॥४॥ पक्वं नातिहिमं स्वादु सक्षारं दीपनं लघुः बस्तिशुद्धिकरं चेतो रो
गदोषत्रयापहं ॥ कूष्मांडी नातिमधुरा वामाश्मरिकफापहा ॥ तन्मज्ञापि तनुदृष्टा मधुरो बस्तिशोधनः ॥६॥ अ
थ कर्कारुः ॥ सीरकं त्रपुसं ज्ञेयमिर्वारुः कर्कटी मता ॥ कर्कारुः कर्कारवकं शीर्ताणुत्र नकर्वुरं ॥७॥ त्रिपुषैर्वीरुकादीनि
कफवातकराणि च ॥ स्पष्टमूत्रप्रदीपाणि रक्तपित्तहराणि च ॥८॥ कर्कारुः शीतलो ग्राही रक्तपित्तहरो गुरुः ॥ पक्वो पित्ताग्नि
जननं सक्षारं श्लेष्मवातजित् ॥९॥ अकोरीरनाम ॥ कालिंगं कलमवीजं स्यात्कालिंदं फलवर्तुलं ॥ कालिंगं ग्राहि हृद्

नगनाथी को हग ३

पित्तशुक्राहृच्छीतलं गुरुः ॥१०॥ पक्वं तु सोष्णं सक्षारं पित्तलं कफवातजित् ॥ अथ मिष्टतुंबी ॥ तुंबी मिष्टा महातुं।
बी राजालाबुरलांबुनी ॥ मिष्टतुंबीफलं रुच्यं कफपित्तहरं गुरुः ॥११॥ अथ कटुतुंबी ॥ कटुतुंबी पिंडफला राजपुत्री
च हृग्धिनी ॥ कटुतुंबी हिमा हृद्या पित्तकासविषापहा ॥१२॥ अथ काकरी ॥ कर्कटी लोमशी व्यालपत्रैर्वारुर्वृहत्त
ला ॥ कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ॥१३॥ सुधावासो परः कंठो रुच्या पित्तहरा समा ॥ पक्वोष्णा पित्तला
ग्राहिसा मा स्निग्धानुवह्निकृत ॥१४॥ अथ वालमखीरा ॥ त्रपुसं कंटकिलता सुधावासोपरः कटुः ॥ छर्दियिनी मूत्र
फला स्यात्तिर्क्तिहस्ति पर्णिनी ॥१५॥ बालं सनीलं त्रपुसं तेषां पित्तहरं सरं ॥ तत्पांडु कफकृज्जीर्णम म्लं वातकफापहं ॥१६॥
त्रपुसं मूत्रलं शीतं रूक्षं रुहे पित्ताश्मकृच्छ्रजित् ॥ तत्पक्वमुष्णमम्लं स्यात्पित्तलं कफवातजित् ॥१७॥ अथ चिर्भटी ॥ चि
र्भटं धेनुदुग्धं तु ड्डयं गोरक्षकर्कटी ॥ चिर्भिटं मधुरं रूक्षं गुरु पित्तकफापहं ॥१८॥ शीतं विष्टंभि सं ग्राहि पक्वमुष्णं।
तु पित्तलं ॥१९॥ अथ वालुक ॥ वालुकं कांडकं वालुतच्छीतं मधुरं गुरु ॥ रक्तपित्तहरं मेदि लक्ष्यं पक्वमग्निकृत ।
॥२०॥ अथ सेक्षिक चरिया ॥ शीर्णवृंतं चित्रफलं विचित्रं पीतवर्णकं ॥ शीर्णवृंतं लघु सादु मेध्युष्णं वह्निपित्तकृत ॥
॥२१॥ अथ कटुतरोई ॥ कोशातकी कृतच्छिद्रा जालिनी कृतिवेधनी ॥ मृदंगफलिका क्ष्वेडा घोंटाली कर्कशा छ

दा॥२२॥ कोशातकी लघुस्तिक्ता रूक्षामाशयशोधनी॥ शोफपांडूदरप्लीहकुष्ठार्शःकफपित्तजित्॥२३॥ तत्फलं भेदनं शी
तं लघु मेहत्रिदोषजित्॥ अथ मीठी तरोई॥ राजकोशातकी मिष्टा महाजालिः सपीतका॥ राजकोसातकी शीता ज्व
रघ्नी कफवातला॥२४॥ अथ घीआतरोई॥ महाकोशातकी त्वन्या हस्तिघोषा महत्फला॥ महाकोशातकी स्निग्धा
सरा पित्तानिलापहा॥२५॥ अथ वैंगणनाम॥ वृंताकी वार्तिका वृंत्ता भंटाकी भंटिका मता॥ वृंताकं स्वादु तीक्ष्णो
ष्णं कटुपाकमपित्तलं॥२६॥ कफवातहरं हृद्यं दीपनं शुक्रलं लघु॥ ज्वरारोचककासघ्नं पक्वं तत्पित्तलं गुरुः॥२७॥ वृं
ताकं कोमलं स्थूलं भर्जितं वह्निना पुनः॥ हिंगुसैंधवतीक्ष्णं च वातपित्तकफापहं॥२८॥ बलासकासक्षयहृद्वातकं
च वृंताकभ्राक्गुणसंप्रकंच॥ वृंताकं कोमलं पथ्यं कूष्मांडं कोमलं विषं॥२९॥ अथ स्वेतवैंगण॥ अपरः श्वेत
वार्ताकः कुक्कुटांडफलो मतः॥ तस्माद्धीनगुणः किंचिदर्शसां च हितः स्मृतः॥३०॥ अथ कंदूरी नाम॥ बिंबी रक्त
फला गोल्हा तुंडी दंतछदोपमा॥ बिंबी वांतिप्रदा हंति रक्तपित्तास्रकामलाः॥३१॥ तत्फलं शीतलं स्वादु गुरु पित्तास्र
दाहजित्॥ स्तंभनं लेखनं वातविबंधाध्मानकारकं॥३२॥ अथ करेला॥ कारवेल्लं कठिल्लं स्यादुग्रकांडं सुकांड
कं॥ कारवल्ली वारिवल्ली बृहद्वल्ल्यपरा स्मृता॥३३॥ कारवेल्लं हिमं भेदि लघु तिक्तमवातलं॥ पित्तास्रकामलापां ॥राम॥

मेर (margin)   रेवकस (margin)

डुकफपित्तकृमीन्जयेत् ॥ ३४ ॥ अथ कर्कोटः ॥ तद्वत्कर्कोटके कुष्ठं किलासारुचिनाशनं ॥ अथ वांध्यककोटी ॥ वं
ध्याकर्कोटकी देवी नागारिर्विशाकंरका ॥ वंध्याकर्कोटकी तिक्ता विसर्वीसर्पकासजित् ॥ ३५ ॥ अथ डोडी ॥ डोडिका वि
षमुष्टिः स्याद्विषमुष्टिः समुष्टिका ॥ डोडिका कफपित्तार्शः कृमिगुल्मविषापहा ॥ ३६ ॥ ढिंढिसनाम ॥ ढिंढिशो रो
मशफलो स्निग्धो दिशो मुनिनिर्मितः ॥ ढिंढिशो वातलो रूक्षो मूत्रलो श्मरिभेदकः ॥ ३७ ॥ अथ वडा सेम ॥ कोलसिंबिः
कृष्णफला खड्गाश्शूकरपादिका ॥ कोलसिंबिः समीरघ्नी गुर्व्युष्णा कफपित्तजित् ॥ ३८ ॥ अथ छोटी सेमि ॥ सिंबिः
कुसिंबिः कुत्सा च सिंबी वल्लकसिंबिका ॥ सिंबिः शीता गुरुर्बल्या श्लेष्मला वातपित्तजित् ॥ ३९ ॥ अथ वथुवा ॥
वास्तुकः क्षारपत्रः स्याच्छाकवीरः प्रसादकः ॥ वास्तुकः पाचनो रुच्यो लघुः शुक्रबलप्रदः ॥ ४० ॥ सरः प्लीहास्रपित्ता
र्शः कृमिदोषत्रयापहः ॥ ४१ ॥ अथ चंदनवथुवा ॥ चल्ली महद्दला रक्ता खल्लिकी गौडवास्तुकः ॥ चल्ली सरा लघुः
शीता रुच्या मेधाग्निदीपनी ॥ ४२ ॥ वल्या रुच्या हरेत्प्लीहा रक्तदोषत्रयापहा ॥ अथ चिल्लीनाम ॥ चिल्ली महद्दला रक्ता
चिल्लिका गौडवास्तुकः ॥ चिल्ली सरा लघुः शीता रुच्या मेध्याग्निदीपनी ॥ ४३ ॥ वल्या रुच्या हरेत्प्लीहरक्तदोषत्रय
कृमीन् ॥ ४४ ॥ अथ कालशाक (मटर) कुवेर ॥ कालशाकं कालिका स्याच्चंचुका चंचुकोमतः ॥ कालशाकं सरं रुच्यं वात

अथ रक्तवथुवानाम० सर्वशाकमचक्षुष्यमपा...मपोरुषं विनापटोलवास्तू
ककाकमाचीपुनर्नवा जीवंतुरक्तवास्तूकइत्येके ३
जीवंतकः शाकवीरो रक्तनालश्च तालपक जीवंतो वलकृत्स्वादुः स्याद्दुपाक स्निग्ध दोषहृत् कुंठेलु १८२

॥श्री गुरुः॥

मार्षिको रेचकः शीतो रक्तपित्तकफापहः मनोहरो
वल्लको गुरुर्मेहग्निदोषजित ३

॥३८॥

॥म॰वि॰नि॰॥

लं कफशोथजित ॥४५॥ चंचुः शीतासरा रूक्षा स्वादुर्दोषत्रयापहा ॥ पिच्छं पवित्रमायुष्यं नातिपित्तप्रकोपनं ॥४६॥ रूच्याऽशी
ता सरा रूक्षा स्वाद्वी दोषत्रयापहा ॥ अथ चौलाई ॥ तंदुलीयो मेघनादः कंडिलस्तंडुलेरकः ॥ विषघ्नः कंधरोन्यः स्या
न्मारिषो मार्षिकस्तथा ॥४७॥ तंडुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित ॥ सृष्टमूत्रमलो रूच्यो दीपनो रक्तपित्तहा
॥४८॥ मारिषो रेचकः शीतो गुरुर्मेहग्निदोषजित ॥४९॥ फोगो ॥ फोगो मरुरुहो ग्रंथी सूक्ष्मपत्रः प्रसादनः ॥ फोगोति
ग्राहकः शीतो रक्तपित्तकफापहः ॥५०॥ अथ परवर ॥ पटोलः पांडुको जाली कूलकः कर्कशच्छदः ॥ राजीफलःपां
डुफलो राजिमानमृतफलः ॥५१॥ तिक्तोत्तमा बीजगर्भो परारा जिपटोलका ॥ पटोलं पाचनं हृद्यं वृष्यं लघ्व
ग्निदीपनं ॥५२॥ स्निग्धोष्णं हंति कासास्रज्वरदोषत्रयक्रमीन ॥ पत्रं पित्तहरं शीतं तस्य वल्ली कफापहा ॥५३॥
मूलं विरेचनं प्रोक्तं फलं दोषत्रयापहं ॥ अथ वन परवर ॥ अपरं वनजं प्रोक्तं पटोलं लघु दीपनं ॥ वनजोल
वणो हृद्यो वह्निकृज्ज्वरनाशनः ॥५४॥ अथ चिचिंडा नाम ॥ चेंचूडो वेश्मकूलो न्यो श्वेतराजि व्रहत्स्थूलः ॥
किंचिन्न्यूनगुणास्तस्माद्विशेषाद्दोषिरोहिता ॥५५॥ अथ पालक ॥ पालक्या वास्तुकाकारा छुरिका ची
रितच्छदा ॥ पालक्या वातला शीता भेदिनी श्लेष्मला गुरुः ॥५६॥ विष्टंभिनी मदश्वासरक्तपित्तविषापहा ॥

॥रामः॥

॥३८॥

तक्या स्नी

अथ स्वेतकुसुमपोई॰॥ पोदकुमोदिका प्रोक्ता मत्स्यकाली सुरंगिका॥ पोतकी शीतला स्निग्धा श्लेष्मला वातपि
त्तजित॥५९॥ अकंठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तनुत्॥ अथ लोणिया॥ कुडिरु मोमरु फंनीनाम॰॥ लोणि
कोक्ता बृहत्न घोंटा कुटिर कुटिंजरः॥ मुंमुरु स्यात् मंमुरुत्कः पंजी पंजीतकस्तथा॥ पल॥ लोणी रूक्षा गु
रुः शीता सरा विष्टंभिनी पटुः॥ दोषघ्ना मधुरा पाके तद्वत्कुटिरमुंमुरु॥६०॥ पुंज्यघ्ना वातला श्वासकासश्लेष्म
विषापहः॥६१॥ अथ सुरवारी शाक॰॥ सुनिषण्णः स्वस्तिकः स्यात् दरस्तिलपर्णिका॥ सुनिषण्णो हिमो ग्रा
ही मेहदोषत्रयापहः॥६२॥ तिलपर्णी हिमा हृद्या ग्राहिणी कफपित्तजित॥ अथ नारीशाक॰॥ सितिवारः
कुरंटी स्यान्नाडी तु नलिका मता सितिवारः सरो वृष्यः शोथघ्नो वातपित्तलः॥६३॥ नाडी सरा लघुः शीता
पित्तनुत्कफवातला॥६४॥ अथ सरिसो वरिड शाक॰॥ सार्षपं सर्षपोद्भूतं कौसुंभं तु कुसुंभजं॥ सार्षपं बहु
विण्मूत्रं गुरु रूक्षं च त्रिदोषकृत॥६५॥ कौसुंभं स्वादु रूक्षोष्णं कफजित्पित्तलं लघुः॥ अथ चणाकशाक॰॥ चणाकं
शाकमुद्दिष्टं दुर्जरं कफवातजित॥ अथ मटर॰॥ कलायकं शाकं भेदि स्यात् लघु पित्तकफापहं॥६६॥ अथ चंगे
री॰॥ चांगेरी त्वम्लिका तु क्षुद्राम्लीका चतुष्पदा॥ चांगेरी दीपनी रुच्या लघूष्णा कफवातजित॥६७॥ पित्तला

म्ला ग्रहण्यर्शःकुष्ठघ्नी सास्नानाशनी ॥ ६९ ॥ अथ कासमर्दशाकः ॥ कासमर्दः कर्कशः स्यात्कंजनो गजरस्तथा ॥ कासम
र्दो लघुः केऽप्यः कासदोषविषास्रजित् ॥ ७० ॥ गंजनः कटुकस्तीक्ष्णस्तिक्तोऽष्णो दीपनो लघुः ॥ संग्राही रक्तपित्तार्शोग्रह
णीकफवातजित् ॥ ७१ ॥ अथ मल्लीनाम ॥ मूलकं हस्तिकंदं तद्धालं मल्लकपोतिका ॥ मल्लकं बालकं हृद्यं [illegible] पा
चनं लघुः ॥ ७२ ॥ हंति त्रिदोषसश्वासगलाक्षिगदपीनसान् ॥ महत्तदेव गुर्वुष्णं रूक्षं दोषत्रयप्रदं ॥ ७३ ॥ स्निग्धं सिद्धं
तदेव स्याद्दोषत्रयविनाशनं ॥ शुष्कं तु विषशोषघ्नं लघु दोषत्रयापहं ॥ ७४ ॥ तत्पुष्पं श्लेष्मपित्तघ्नं फलं वातकफाप
हं ॥ अथ करीरः ॥ करीरकोऽगूढपत्रः क्रकचो ग्रंथिलो मतः ॥ करीरः कटुकोऽष्णो भेदी तीक्ष्णो रूक्षः कफवातजित् ॥ ७५ ॥ व्र
णशोथविषार्शोघ्नस्तत्पुष्पं कफपित्तजित् ॥ फलं ग्राहि कषायोष्णं मधुरं श्लेष्मपित्तहृत् ॥ ७६ ॥ अथ सहिंजनः ॥
शिग्रुः शोभांजनः कृष्णगंधः स्यात्तु लघुच्छदः ॥ रक्तोऽन्यो मधुशिग्रुस्तु श्वेतोऽन्यो हरितच्छदः ॥ ७७ ॥ तद्बीजं श्वेतमरिचं
ती[illegible] क्ष्णोष्णं चक्षुषोर्हितं ॥ शिग्रुस्तीक्ष्णो लघुर्ग्राही वह्निदः कफवातजित् ॥ ७८ ॥ तिक्तोष्णो विद्रधिप्लीहव्रणगुल्मघ्नो
- रक्तपित्तकृत् ॥ मधुशिग्रुर्गुणैस्तद्वद्विशेषाद्दीपनः सरः ॥ ७९ ॥ तत्पुष्पं गुरु संग्राहि वानलं कफशोथजित् ॥ ८० ॥ अथ
यलहसननाम ॥ लसुनः स्यादुग्रगंधो यवनेष्टो रसोनकः ॥ गंजनोऽन्यो महाकंदो जजेरी दीर्घपत्रकः ॥ ८१ ॥ ल

शुनोवृंहणोवृष्यः स्निग्धोष्णः पाचनःसरः॥भग्नसंधानकृत्कंठ्योगुरुःपित्तास्रवृद्धिदः॥८१॥रसायनंक
फश्वासकासगुल्मज्वरारुचिः॥हंतिशोफप्रमेहार्शःकुष्ठशूलानिलकृमीन्॥८२॥तत्पत्रंमधुरंक्षारंनालोम
धुरपिच्छिलः॥अथप्याजः॥पलांडुस्तद्गुणोस्तुल्पःकफकृन्नातिपित्तलः॥अनुष्णःकेवलंवातोस्वादुपाकेरसो।
जयेत्॥८३॥अथसलगमः॥गृंजनःपित्तलोग्राहीतीक्ष्णोर्शोरोगनाशनः॥गंधाकृतिरसैस्तुल्योसूक्ष्म
नालःपलांडुना॥८४॥अथसूरणः॥सूरणःकंदलःकंदोगुदामयहरःपरः॥वज्रकंदःसुरेन्द्रःस्यादन्योन्य
श्वित्रकंदकः॥८५॥सूरणोदीपनोरूक्षःकफार्शःकृंतनोलघुः॥नरुद्धन्योवज्रकंदःकफघ्नःपित्तरक्तकृ
त॥८६॥अथअस्थिसंहारशाकः॥अस्थिसंशृंखलिकावज्रीगंधीमानस्थिसंहृतिः॥अस्थिशृंखलिका
वृष्याश्लेष्मलामधुराहिमा॥८७॥अस्थिसंहौ[illegible]नरूक्षल्पापित्तरक्तानिलापहा॥८८॥वाराहीकंदः॥वारा
हीमागधीगृष्टीस्तत्कंदोसौकरःकिटिः॥सौकरःपित्तलोवर्ण्यःस्वादुस्तिक्तोरसायनः॥८९॥आयुःशुक्रा
ग्निकृन्मेदकफकुष्ठानिलापहः॥अथमुसली॥मुसलीतालपत्रीस्याद्दुलिनीतालमूलिका॥मुशली।
वृंहणीवृष्यावीर्योष्णार्शोनिलापहा॥९०॥अथकंचुकी॥कंचुकापीलुनीपिलुःपेचुकादलशालिनी॥

केचुकं वातलं ग्राहि हिडिपनं कफपित्तनुत् ॥९१॥ अथ भूछत्रा ॥ भूछत्रं पृथिवीकंदः शिलींध्रं चलकं मतं ॥ भूछ-
त्रं शीतलं वल्यं गुरु स्निग्धं त्रिदोषकृत् ॥९२॥ अथ स्थूलकंदमानकंदः ॥ स्थूलकंदो ग्रामकंदो माणको न्योग्र-
हकंदः ॥ स्थूलकंदो गुरुः श्लेष्मवातलः पित्तशो[थ]जित् ॥९३॥ माणकः शीतलः स्वादुः पित्तरक्तहरो गुरुः ॥९४
अथ कसेरु सिंघाडा ॥ कसेरुकं स्वल्पकंदं वृहद्राजकसेरुकं ॥ शृंगाटो जलकंदः स्यात्त्रिकोणस्त्रिकटस्त्रि-
कः ॥९५॥ कसेरुकं हिमं स्वादु गुरु पित्तास्रदाहजित् ॥ ग्राहि शुक्रानिलश्लेष्मप्रदं शृंगाटकं तथा ॥९६॥ अ-
थ पिंडालु मध्वालु ॥ शंखालु ॥ काष्ठालु ॥ हस्त्यालु ॥ रतालु ॥ पिंडालुकं च स्याद्गोधा मध्वालुः स्यान्नरोमशं
शंखालु शंखसंकाशं काष्ठालु स्वल्पकाष्ठकं ॥९७॥ हस्त्यालुकं महत्काष्ठं रक्तालु चारक्तकंदकं ॥ आलुकं
शीतलं सर्वं विष्टंभि मधुरं सरं ॥९८॥ सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत् ॥ कफानिलकरं वल्यं वृष्यं स्त-
न्यविवर्द्धनं ॥९९॥ पिंडालुकमभिष्यंदि तिक्तोष्णं दोषलं गुरु ॥ मध्वालुकं पित्तकरं कटु पाके कफापहं ॥१००॥
अथ केलूटं ॥ केलूटं स्वल्पविटपं कंदुकः स्वादुकंदुकः ॥ केलूटं शीतलं ग्राहि पित्तघ्नं कफवातजित् ॥१०१॥
अतिजीर्णमकालोत्थं रूक्षं सिद्धमभूमिजं ॥ जठरं कोमलं चातिशीतव्यालादिदूषितं ॥१०२॥ शुष्कं शाकं

चसकलेनाप्यमीयान्मलवं विना ॥ योगज्ञांसुख्यतिलकः काद्वारमल्लस्तेन श्रीमदनन्टपेणानिर्मितेत्र ॥ ग्रं
थेस्मिन्मदनविनोदनाम्नि पूर्णः कूष्मांडप्रभृतिरयं च शाकवर्गः ॥ १०२ ॥ ❀ ॥ इति मदनविनोदनिघंटौ
शाकवर्गः सप्तमः ॥ ❀ ॥ करेणसंगृह्य करीकपोले मात्रांगुलीभिर्मृदुनाऽपमानं ॥ मुकुंदतया जानुवलेन यांतं
नमो भवेशे नवनीतचौरं ॥ १ ॥ पानीयं जीवनं नीरं कीलालममृतं जलं ॥ आपोंभस्तोयमुदकं पाथो वुस
लिलं पयः ॥ २ ॥ पानीयं शीतलं हृद्यं रं तिपित्तविषभ्रमान ॥ दाहाजीर्णश्रमच्छर्दिमदमूर्छा मदात्ययान ॥ ३ ॥
शीतं नत्तिमिते कोष्ठे गलरोगे नवज्वरे ॥ ग्रहण्यां पीनसाध्मानहिक्कागुल्मेषु विद्धवे ॥ ४ ॥ कासे मेहारुचि श्वा
सपांडुवातामयेषु च ॥ पार्श्वशूले स्नेहपीते सद्यः शुद्धे न शस्यते ॥ ५ ॥ दिव्यं तु धारजं धारं कारं हैममिति स्मृ
तं ॥ चतुर्विधं वरं धारं लघु धारं पुनर्द्विधा ॥ ६ ॥ गांगं समुद्रं चेति गांगं श्रेष्ठतमं नयोः ॥ आश्विने मासि सामुद्रं गा
गांगवद्दाख्रोत ॥ ७ ॥ स्थापितं हेमजे पात्रे राजते मृन्मये पि वा ॥ शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णी ।
व तत् ॥ ८ ॥ तद्गांगं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ॥ सक्षारलवणं विस्त्रं शुक्रदृष्टिवलापहं ॥ ९ ॥ दिव्यं त
निर्देश्यरसं जीवनं तर्पणं लघु ॥ रसायनं तत्पाममूर्छीनिद्रादाहक्लमापहं ॥ १० ॥ सौम्यं रसायनं वल्यं मदनि

द्रात्रिदोषनुत ॥ आश्वासजननं मूर्छाश्रमभ्रमनिबृड्ढिकृत ॥ ११ ॥ तदेवभूमिपतितं भौममित्यभिधीयते
दिव्याभावे तु तत्पेयं प्रविचार्य गुणागुणान ॥ १२ ॥ कौपं श्लेष्महरं क्षारं पित्तलं दीपनं लघुः ॥ नद्यास्तु दीप
नं रूक्षं वातलं लघु लेखनं ॥ १३ ॥ सारसं मधुरं बल्यं तृष्णाघ्नं तु वरं लघुः ॥ तडागं वातलं स्वादु तुवरं कटु पा
कि च ॥ १४ ॥ वाप्यं पित्तकरं क्षारं कटु वातकफापहं ॥ नैर्झरं लेखनं हृद्यं कफघ्नं दीपनं लघुः ॥ १५ ॥ औद्भिदं ल
घु पित्तघ्नमविदाहाग्निदीपनं ॥ चौंड्यमग्निप्रदं रूक्षं स्वादु श्लेष्मकरं न च ॥ १६ ॥ केदारं स्वादु भिष्यंदि विपाके
गुरु दोषलं ॥ पाल्वलं तद्वदुद्दिष्टं विशेषात्सर्वदोषकृत ॥ १७ ॥ तौषारं वातलं शीतं रूक्षं पित्तकफापहं ॥ धारं स्मा
वपतितं दिव्यं तत्सर्वदोषजित ॥ १८ ॥ पालेयं गुरु हैमं रूक्षं विशदं कफवातकृत ॥ हैमं गुरुतरं शीतं पित्तघ्नं वातवर्ध
नं ॥ १९ ॥ चंद्रकांतजलं रूक्षं लघु पित्तविषास्रनुत ॥ दिवार्कविकरैर्जुष्टं निशि शीतकरांशुभिः ॥ २० ॥ तत्पयं हंसोद
कं नाम स्निग्धं दोषत्रयापहं ॥ अभिनिष्पंदि निर्दोषमांतरिक्षजलोपमं ॥ २१ ॥ बल्यं रसायनं मेध्यं शीतं लघु
सुधासमं ॥ वर्षासु दिव्यं पानीयमौद्भिदं वा प्रशस्यते ॥ २२ ॥ शरत्सु सर्वमुदकं यस्य कस्याखिलं हितं ॥ हेमंते सा
रसं तोयं तडागं वा गुणावहं ॥ २३ ॥ वसंतग्रीष्मयोः कौप्यं नैर्झरं वाप्यमेव च ॥ प्रावृषि प्रवरं चौंड्यमनर्तवं

पाठ यस्य कस्याखिलं हितं द्विः २

मथाखिलं ॥२४॥ नद्यः शीघ्रवहा लघ्व्यः सर्वा याश्चामलोदकाः ॥ मंदगाः कलुषा गुर्व्यो याश्च शैवलसेविताः ॥२५॥
हिमवत्प्रभवाः पथ्या नद्यो ऽश्मारुतपाथसः ॥ गंगा सतद्रूसरयूयमुनाद्या गुणोत्तमाः ॥२६॥ ईषत्पित्तकराः स्वच्छाः प्रोक्ता
वातकफापहाः ॥ मलयाचलजा नद्यो लघ्व्यः शीघ्रवहा हिताः ॥२७॥ कृतमालाताम्रपर्णीप्रमुखास्त्वमलोदकाः
स्थिरास्त्वद्रुमा वा एवं कुर्वंति श्लीपदापचीः ॥२८॥ शोथपाददशिरःकंठगलरोगार्बुदकृमीन् ॥ सिंधुसेलभवा नद्यो ।
वेणीगोदावरीमुखाः ॥२९॥ कुर्वंति प्रायशः कुष्ठमीषद्वातकफापहाः ॥ विंध्याचलोद्भवाः शिप्रारेवाद्याः पांडुकुष्ठदाः ॥
३०॥ पारिपात्रोद्भवाः प्रोक्ताश्चिंबलाचर्मण्वतीमुखाः ॥ पथ्यास्तु गाराजास्तत्र त्रिदोषघ्न्यो बलावहाः ॥३१॥ दरीजाः कु-
ष्ठकंठांत्रिश्लेष्मश्लीपदरोगदाः ॥ प्राच्यावंत्यः परांत्याश्च गुरुजानि प्रकुर्वंति ॥३२॥ मरुजा मधुरा बल्या लघ्वी-
ग्निप्रदाः सराः ॥ पश्चिमांभोधिपतिता गोमतीनर्मदादयः ॥३३॥ पथ्या वातास्तु पित्तघ्न्यो बल्याः कंडूकफापहाः ॥ द-
क्षिणाब्धिगता बल्याः पित्तघ्न्य ःकफवातदाः ॥३४॥ पूर्वांभोधिवहा नद्यो मंगोदगुरवो घनाः ॥ सौमानानां सं-
प्रातः सर्वेषांग्रहतां वसं ॥३५॥ नैर्मल्यं तत्र शैत्यं च तत्तेषां स च परो गुणः ॥ मुक्ताको दोसलिलं पीतं कार्श्यं मंदाग्निदो-
षकृत् ॥३६॥ मध्ये ग्निदीपनं श्रेष्ठमंते स्थौल्यकफप्रदं ॥ जीव नं जीविनां जीवो जगत्सर्वं तु तन्मयं ॥३७॥ नदु

त्यन्नतया संजैर्नैः क्वचिद्वारि वार्यते ॥ अथवा गादृः ॥ क्वचिदुष्णं क्वचित्शीतं क्वचित्क्वथितशीतलं क्वचिद्द्रव्यसमा
युक्तं न क्वचिद्वारि वार्यते ॥ ३९ ॥ पानीयं न तु पानीयं तोये नान्यप्रदेशजे ॥ अजीर्णे क्वथितं चामे पक्वे जीर्णे तु नेतर
त् ॥ ४० ॥ आनूपं दोषकृद्वारि प्रायो मिष्टं हि निंदितं ॥ जांगलं हंति सकलान्दोषानग्निप्रदीपनं ॥ ४१ ॥ साधारणं ।
हिमं स्वादु तृष्णाघ्नं हर्षदं लघुः ॥ वर्षास्वयो वगाहेत पिबेदथ न वं पयः ॥ ४२ ॥ पर्णादिदुष्टलभते सवाह्याभ्यंतरामय
न ॥ कलुषं कृष्णमंभो यत्पर्णानीलीतृणादिभिः ॥ ४३ ॥ दुष्टगंधमसंस्पृष्टं सूर्येचंद्रमसोः शुभिः ॥ व्यापन्नमिति ।
जानीयात्सर्वदोषप्रकोपकृत ॥ ४४ ॥ तोयं तद्वर्जयेत्सर्वे पक्वानर्तसमुद्भवं ॥ व्यापन्न.मपि पानीयं क्वथितं सू
र्यतापितं ॥ ४५ ॥ तप्तायःपिंडसिकताताम्रा वारि धूपसाधितं ॥ कर्पूरजातिपुंनागपाटलादिसुवासितं ॥ ४६ ॥ शु
चिस्रांद्रपटस्रावैस्क्षुद्रजंतुविवर्जितं ॥ स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्जितं ॥ ४७ ॥ नत्त्सर्वदोषशमनं दीपनं
पाचनं लघुः ॥ उष्णं तदग्निजननं लघ्वछं वस्तिशोधनं ॥ ४८ ॥ पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहं ॥ त
त्पादहीनं पित्तघ्नमर्द्धहीनं च वातजित ॥ ४९ ॥ त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघुः ॥ निहंति श्लेष्मसं।
घातं मारुतं चापकर्षति ॥ ५० ॥ अजीर्णे जरयत्याशु पीतमुष्णोदकं निशि ॥ पादावशेषसलिलं ग्रीष्मे शारदिश्

पच्यमानं निष्फेनं निर्वेगं निर्मलं जलं ४

स्यते॥५०॥हेमंते शिशिरे वर्षो स्वर्धे हीनमधा वपि॥शृतशीतं सदा पथ्यं लघुनीयं त्रिदोषजित॥५१॥तच्चापर्युषि
तं निंद्यमम्लीभूतं त्रिदोषकृत॥दिवा सृतं पयो रात्रौ गुरुत्वमधिगच्छति॥५२॥रात्रौ शृतं दिवा पीतं गुरुत्वमधिग
च्छति॥आमं जलं जीर्यति याममात्रेन दग्धमात्रं शृतसीतवाहि॥ मुहूर्तकाले जलमुष्णमेवं त्रिधेति चोक्तं जल
जीर्णकाले॥५४॥अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये॥मंदाग्नौ उदरे कुष्ठे ज्वरे सामे पिवेत्तथा॥५५॥व्रणे च म
धुमेहे च पानीयं मंदमाचरेत॥इति पानीनामगुणाः॥अथ दुग्धं०॥दुग्धं प्रस्रवणोक्षीरं सौम्यं संजीवनं पयः
दुग्धं बलकरं शीतं मधुरं वातपित्तजित॥५६॥स्निग्धं रसायनं मेध्यं जीवनं धातुवर्द्धनं॥चेतो रक्तगदश्वासक्षयार्शो
भ्रमनुत्कुरु॥५७॥वालवृद्धक्षशादीनां स्त्रीरक्तानां प्रशस्यते॥प्रायःप्राणाभृतो सात्म्यं विशेषादो जसे हितं॥५८
गोक्षीरं मधुरं शीतं गुरु स्निग्धं रसायनं॥वृंहणोस्तन्यकृद्गल्पं जीवनं वातपित्तनुत॥५९॥कृष्णगव्याव्रं क्षीरं
श्वेताया श्लेष्मलं गुरु॥वालवत्साविवत्सानां गवां क्षीरं त्रिदोषकृत॥६०॥पिण्याकाद्यशनाज्जातं क्षीरं गुरु क
फापहं॥आविकक्षीर०॥आजं गव्यं गुरुणाग्राही विशेषाद्दीपनं लघु॥हंति क्षयार्शोतीसारप्रदराशोभ्रमज्वरा
न॥६१॥अजानामल्पकायत्वात्कटुतिक्तादिभक्षणात॥स्तोकांबुपानाद्व्यायामात्पयः सर्वगदापहं॥६२॥आवि

शस्तंवातकफानाहकृमिशो
थोदरार्शसां ४

उक्तंस्वादुरसंहृद्यंवल्यंश्वासानिलापहं

॥म.कि.नि.॥

गु   ग्राही

केमधुरंकेरुच्यंस्निग्धंवातकफापहं॥ कृकाशोनिलोद्भूतेकेवलेवानिलेहितं॥६३॥ माहिषंमधुरंक्षीरंस्निग्धंगुरुव
लप्रदं॥ निद्राशुक्रकरंशीतमत्यभिष्यंदिवह्निनुत॥६४॥ नार्याल्लघुपयःशीतंदीपनंवातपित्तनुत॥ चक्षुःशूला
भिघातघ्नंनस्याश्च्योतनयोर्वरं॥६५॥ हस्तिन्यास्वादुवल्यंचचक्षुष्यंशीतलंगुरु॥ औष्ट्रंस्वादुरसंरूक्षंल
वणंलघुदीपनं॥६६॥ कृमिकुष्ठकफानाहशोथोदरहरंपरं॥ आश्वमुक्तंपयोरूक्षंवल्यंशोथानिलापहं॥ ल
वणाम्लंलघुस्वादुसर्वमेकशफंतथा॥ धारोष्णंशस्यतेगव्यंधारशीतंतुमाहिषं॥६८॥ शृतोष्णमाविकं
पथ्यंशृतशीतमजापयः॥ शृतशीतंजयेत्पित्तंशृतोष्णंकफमारुतौ॥६९॥ अतिपक्वंगुरुस्निग्धंवृष्यंवल
विवर्धनं॥ आममामप्रदंक्षीरमभिष्यंदिपरंगुरु॥७०॥ प्राभातिकंपयःप्रायोविष्टंभिगुरुवृंहणं॥ रात्रौचंद्रगु
णाधिक्याद्व्यायामपरिवर्जनात॥७१॥ प्रादोषंश्रमनुत्पथ्यंचक्षुष्यंवातपित्तहत॥ दिवाकरकराघाताद्व्या
यामानिलसेवनात॥७२॥ विवर्णमम्लंदुर्गंधिलवणंग्रथितंपयः॥ वर्जयेदम्ललवणयोगात्कुष्ठादिदोष
कृत॥७३॥ सन्तानिकास्त्यानरूपाशृतदुग्धोपरिस्थिता॥ सन्तानिकागुरुःशीतावृष्यापित्तास्रवातनुत॥
॥७४॥ सप्तरात्रात्परंक्षीरमप्रसन्नंतुमोरटं॥ नष्टदुग्धभवंमस्तुमोरटंजैज्जटोब्रवीत॥७५॥ क्षीरंतत्कालस्रु

आममेवस्त्रि
यादुग्धंतत्प
थ्यंतुत्रिदोष
हृत ५

धोष्णंदीपनंवल्यंलघुशीतं
त्रिदोषनुत् सुधासमंतुतद्द
स्याच्छ्रातशीतंत्रिदोषकृत ७

॥रामः॥

दधिस्त्यानं पयः सम्यक्घानमीषत्तुमेदकं ४.

तायाः पीयूषं घनमुच्यते ॥ पक्वं दध्नासमं क्षीरं विज्ञेया दधिकूर्चिका ॥ ७४ ॥ तक्रेण तक्रकूर्चीस्या [illegible] तयोः
पिंडः किलाटकः ॥ पाकं विना स एव स्यात्क्षीरशाकः सितान्वितः ॥ ७५ ॥ मोरटस्तु स पीयूषं कूर्चिका दधितक्रा।
योः ॥ किलाटक्षीरशाकाभ्यामेते निद्रामपेष्टिदा ॥ ७६ ॥ गुरवः श्लेष्मला वृष्या हृद्या वाताग्निनाशना ॥ वातलानु
जेरा रूक्षा ग्राहिणी तक्रकूर्चिका ॥ ७७ ॥ इति दुग्धवर्गः ॥ अथ दधिवर्गः ॥ मंदं दुग्धवदव्यक्तरसं किंचिद्घनं भवे
त् ॥ तन्मिष्टमम्लमत्यम्लं मधुराम्लमिति स्मृतं ॥ १ ॥ दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ॥ पाकेम्लं ग्राहि
पित्तास्रशोथमेदकफप्रदं ॥ २ ॥ मूत्रकृच्छ्रे प्रतिश्याये शीतके विषमज्वरे ॥ अतीसारे रुचौ कार्श्ये शस्यते बल
वर्द्धनं ॥ ३ ॥ मंदं त्रिदोषजननं मधुरं वातपित्तजित् ॥ अम्लं पित्तास्रकफकृदत्यम्लं रक्तपित्तकृत् ॥ ४ ॥ मधुराम
लं गुरु शोभि श्रेष्ठं दधि पूर्ववदादिशेत् ॥ गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदं ॥ ५ ॥ पवित्रं दीपनं स्निग्धं पुष्टिकृ
त्पवनापहं ॥ आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहं ॥ ६ ॥ शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनं ॥ आवि
कं दधि दुर्नामकफवातप्रकोपनं ॥ ७ ॥ अभिष्यंदरसे पाके स्वादु पाके न दोषलं ॥ माहिषं दधि सुस्निग्धं श्लेष्मलं
वातपित्तनुत् ॥ ८ ॥ वृष्यं विपाके मधुरं गुरु रक्तप्रसादनं ॥ सर्वेषु दधिषु श्रेष्ठं गव्यमेव गुणावहं ॥ ९ ॥ गालितं द

रुः विपाके औष्ट्रमेकशफं

नार्या दधि त्रिदोषघ्नं चक्षुष्यं तर्पणं गुरु गुरु बल्यं मधुरं पाके स्निग्धं वह्निकरं परं हस्तिन्या दधि वीर्योष्णं कटुपाकेऽग्निनाशनं कषायानुरसं वीर्यवर्धनं कफवातजित् औष्ट्रं विपाके कटुकं मेदि क्षारं अम्लकं दधि निहंत्युदरकुष्ठार्शःशूलवंधानिलकृमीन् अश्वाद्येकशफं रूक्षं दधि मि ष्येदि दोषलं दीपनं स्वादु चक्षुष्यं वातकृत्कफमूत्रकृत् १

धि स्व स्निग्धं वातघ्नं श्लेष्मलं गुरु बल्यं पुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ॥ ८९ ॥ शृतक्षीरभवं रुच्यं दधि स्निग्धं गु णोत्तमं ॥ पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनं ॥ ९० ॥ असारं दधि संग्राहि कषायं वातलं लघुः ॥ विष्टंभि दीपनं रुच्यं ग्रहणीरोगनाशनं ॥ ९१ ॥ ससर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् ॥ सगुडं वातनुद्वृष्यं बृंहणं तर्पणं गु रु ॥ ९२ ॥ वसंते शरदि ग्रीष्मे दधि प्रायेण निंद्यते ॥ हेमंते शिशिरे शस्तं वर्षास्वल्पगुणावहं ॥ ९३ ॥ मूत्रकृच्छ्रे रुचौ कार्श्ये। शीतके विषमज्वरे ॥ अतीसारे प्रतिश्याये दिवा च दधि शस्यते ॥ ९४ ॥ शस्यते दधि नो रात्रौ शस्तं चाम्बुघृतान्वितं ॥ द ध्युत्तरो दधिस्नेहो दध्युग्रं तत्र कटु रसः ॥ ९५ ॥ दध्नः सरो गुरुर्वृष्यो वातवह्निप्रणाशनः ॥ बस्तेर्विधमनोऽम्लः श्लेष्मपित्त श्लेष्मविवर्धनः ॥ ९६ ॥ मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत् ॥ स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहं ॥ ९७ ॥ अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसंग्रहं ॥ इति दधिवर्गः ॥ अथ तक्रवर्गः ॥ दंडाहतं कालसेयं गोरसश्च विलोडितं ॥ ससरं निर्जलं घोलं मथितं रसवर्जितं ॥ समोदकं श्वेतमंथं उदश्वित्त्वर्धवारिकं ॥ पादोदकं भवे त्तक्रं सर्वमेतच्च भाषितं ॥ ९९ ॥ तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु ॥ वीर्योष्णं बल्यं रूक्षं प्रीणनं वातना शनं ॥ १०० ॥ हंति शोथगरच्छर्दिप्रसेकविषमज्वरान् ॥ पांडुमेदोग्रहण्यर्शोमूत्रग्रहभगंदरान् ॥ १०१ ॥ मेह

गुल्ममतीसारश्शूलप्लीहकफक्रमीन॥ श्वित्रकुष्टघृतव्यापत्कुष्टतृस्वोदराऽरुचीः॥१०२॥ तक्रं निदाघे शरदि दौर्बे
ल्येभ्रममूर्छयोः॥ पित्तास्त्रमदशोषेषु कक्षाग्निन प्रशस्यते॥१०३॥ शीतकालेग्रहणीपर्शःकफवातामयेषुच॥ स्रोतो
निरोधेमंदाग्नौतक्रमेवामृतोपमं॥१०४॥ तक्रंतुमधुरंसर्वेष्वम्लेषम्लंवातपित्तजित॥ अम्लंवातहरंतत्तुरक्तपित्त
प्रकोपनं॥१०५॥ वातेम्लंसैंधवोपेतंस्वादुपित्तेसशर्करं॥ पिबेत्तक्रंकफेरूक्षंव्योषक्षारसमन्वितं॥१०६॥ समुद्धृ
तघृतंतक्रंपथ्यंलघुविशेषतः॥ स्तोकोद्धृतघृतंतस्माद्वृष्यंगुरुकफावहं॥१०७॥ अनुद्धृतघृतंसांद्रंगुरुपुष्टिकफ
प्रदं॥ यान्युक्तानिदधीन्यष्टौतद्गुणंतक्रमादिशेत॥१०८॥ सरसंनिर्जलंघोलंमथितंरसवर्जितं॥ दधिवद्घोलमथितं।
किंचित्तुलघुनीततः॥११०॥ मंडस्तक्रात्लघुस्तत्रकूर्चिकादधिसंभवा॥ इतितक्रवर्गः॥ अथनवनीतं॥ हैयंगवीनं
सरजंनवनीतंतुमंथजं॥ नवनीतंलघुग्राहिसद्यस्कंस्वादुशीतलं॥१११॥ मेध्यमीषत्कषायाम्लंवृष्यंपित्तानिला
लापहं॥ अविदाह्यग्निकृच्चक्षुष्यंक्षयार्शोर्दिताकासजित॥११२॥ नवनीतंचिरोद्धृतंगुरुमेदःकफप्रदं॥ शोफघ्नंबल
कृद्वृष्यंविशेषाद्दम्नेशिशोः॥११३॥ क्षीरोत्थंनवनीतंतिस्निग्धंचक्षुष्यंरक्तपित्तजित॥ वृष्यंबलकरंग्राहिमधुरं
शीतलंपरं॥११४॥ अथघृतनाम॥ घृतमाज्यंहविःसर्पिराधारमम्नतारुच्यं॥ घृतंरसायनंस्वादुचक्षुष्यं

गुरुदीपनं ॥१५॥ शीतवीर्यं विषालक्ष्मीकफपित्तानिलापहं ॥ अल्पाभिष्यंदि कांत्योजस्तेजोलावण्यबुद्धिकृत ॥१६॥
उदावर्तज्वरोन्मादशूलानाहव्रणाञ्जयेत् ॥ स्निग्धंकफप्रदंरक्षःक्षयवीसर्परक्तजित ॥१७॥ स्वर्यं क्षते हतं प्रायः
शस्यते बालवृद्धयोः ॥ घृतं क्षीरोद्भवं ग्राहि शीतलं नेत्ररोगजित ॥१८॥ निहंति पित्तदाहास्रमदमूर्छाभ्रमानिला
न ॥ पुराणं कटुकं पाके सर्पिर्दोषत्रयापहं ॥१९॥ श्रोत्रनेत्रशिरःशूलकुष्टापस्मारशोथजित ॥ योनिरोगज्वरश्वा
सकुष्टार्शोगुल्मपीनसान ॥२०॥ निहंति दीपनं वस्तिनस्यपूर्तिषु शस्यते ॥ घृतमंडोपि घृतवदुक्तोसौ स्त्रोतोगो ।
लघुःसरः ॥२१॥ दशवर्षोत्परं सर्पिः कौंभमित्यभिधीयते ॥ रक्षोघ्नं लघु तस्मात्तु गुणैः श्रेष्ठं महाघृतं ॥२२॥ घृत
स्य गुणा दोषा तु क्षीरतुल्या समादिशेत ॥ सर्वेषु गुणा न ऊध्यमाविकं निंदितं पुनः ॥२३॥ अथ तैलनाम ॥ तै
लमुष्णं गुरु स्थैर्यं बलवर्णकरं सरं ॥ वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥२४॥ सूक्ष्मं कषायानुरसं ति
क्तं श्लेष्मानिलापहं ॥ विपाके मधुरं तीक्ष्णोष्णं हंता रक्तपित्त त ॥२५॥ लेखनं बद्धविण्मूत्रं गर्भाशयशो
धनं ॥ दीपनं मतिदं केश्यं व्यवायि व्रणमेहनुत ॥२६॥ श्रोत्रयोनिशिरःशूलनेत्ररोगविनाशनं ॥ मथितं च्युत
विद्धच्छिन्नभग्नघातविषादिषु ॥२७॥ सते ग्निदग्धे तत्पथ्यं पानाभ्यंगादिभिः सदा ॥ घृतमद्यात्परं पथ्यं हीनवी

क्षय २

तिमोर्लं ६

यं प्रजायते ॥१२८॥ तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकं ॥ एरंडतैलं मधुरमुष्णं दीपनशोधनं ॥१२९॥ वृष्यं रसा
च्यं वयःस्थापि मेधाकांतिबलप्रदं ॥ कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनं ॥१३०॥ हंति वातोदरानाहगुल्माष्ठी
लाकटिग्रहान् ॥ वातशोणितशूलादिवृध्माशोथामविद्रधीन् ॥१३१॥ इष्वीकापीलु · जीमूतदंतीमूलकशि
ग्रुजं ॥ निंबातसीकरंजाक्षहस्तिकर्णगुडभवं ॥१३२॥ शंखिनीनीपकंपिल्लवल्लज्योतिष्मतीकृतं ॥ कुसुंभसर्षपो
द्भूतं तैलं सौवर्चलं तथा ॥१३३॥ विपाके कटुकं तीक्ष्णमुष्णं तिक्तं सरं लघु ॥ हंति कुष्ठामयश्लेष्ममेहमर्द्धंमद
कृमीन् ॥१३४॥ निंबतैलं जयेत्कुष्ठव्रणश्लेष्मज्वरकृमीन् ॥ अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ॥
॥१३५॥ कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥ मार्षपं कृमिजं तैलं कुष्ठकंडूहरं लघुः ॥१३६॥ पित्तास्रदूषणं ।
हंति विषकर्णशिरोगदान् ॥ कौसुंभं कटुकं तैलमचक्षुष्यं बलप्रदं ॥१३७॥ केवलानिलभुक् तीक्ष्णं विदाह्य
स्रं त्रिदोषकृत् ॥ ज्योतिष्मतीभवं तैलं पित्तलं स्मृतिबुद्धिदं ॥१३८॥ अक्षोटकोतिमुक्ताससनालिकेरभवं हरेत् ॥ तै
लं पित्तानिलौ केश्यं गुरु श्लेष्मकरं हिमं ॥१३९॥ शिंशपागुरुगंडीरसरलामरदारुजं ॥ तैलं कषायं कटुकं तिक्तं
दुष्टव्रणापहं ॥१४०॥ वातरक्तविषश्लेष्मकंडूकुष्ठानिलाञ्जयेत् ॥ भल्लातकं तौवरकं वीर्योष्णं स्वादु तिक्तकं ॥१४१॥

एकैषिकं हिमं तैलं पित्तघ्नं श्लेष्मवातजित् इत्यैषिकतैलं पचतिक्तोद्भवं
तैलमीषत्तिक्तं रसायनं दीपनं लेखनं मेध्यं पथ्यं दोषत्रयापहं २

कुष्ठा[...]र्शोघ्नं त्रिदोषास्रमेदोमेहकृमीन्हरेत् ॥ तैलं पलाशमधुकपाटलाफलसंभवं ॥१४२॥ कषायमधुरं दाह
पित्तश्लेष्मगदान्हरेत् ॥ कूष्मांडत्रपुसैर्वारुतुंबीकालिंगनिंबकैः ॥१४३॥ कृतं प्रियालजीवंतीश्लेष्मातकभवं त
था ॥ तैलं गुरु स्वादुपाकं शीतं मूत्रप्रवर्तकं ॥१४४॥ अदीपनमभिष्यंदि कफदं वातपित्तनुत् ॥ आम्रतैलमनाति
क्तं मधुरं नातिपित्तकृत् ॥१४५॥ कफवातहरं रूक्षं सुगंधि विशदं परं ॥ स्थावराणां तथान्नाः स्नेहाः प्रोक्तास्तु तै
लवत् ॥१४६॥ गोणामेतेषु तैलत्वं तिलतैलं वरं पुनः ॥ मेदोमज्जावसाभेदैर्ग्राम्यानूपौदकोद्भवाः ॥१४७॥ गुर
वो मधुरा उष्णाः समीरणविनाशनाः ॥ जांगलैकशफादीनां क्रव्यादीनां कषायकाः ॥१४८॥ लघवः शीतला ज्ञे
या रक्तपित्तनिवर्हणाः ॥ प्रतुदविष्किरादीनां तानव्याः कफनाशनाः ॥१४९॥ घृतं तैलं वसा मेदो मज्जा नो वातन
श्नाः ॥ पयोन्तरं परिस्तेयाविपाके स्वादवृष्परं ॥ ॥१५०॥ इति तैलवर्गः ॥ अथ मद्यनामगुणाः ॥ मद्यं हाला सुरा मे
डा मदिरा वरुणात्मजा ॥ सुरा गंधोत्तमा कल्या देवसृष्टा च वारुणी ॥१५१॥ मद्यं पित्तकरं प्रायः सरं रोचनदी
पनं ॥ विदाहि सृष्टविण्मूत्रं तीक्ष्णं वातकफापहं ॥१५२॥ विधिनान्नयुतं पीतं तत्स्यादमृतसंनिभं ॥ अथोन्य
कुरुते रोगान्नतिपीतं विषोपमं ॥१५३॥ ह्रासोस्य मिव दाहित्वात् कफपित्ते प्रशस्यते ॥ बलपुष्टिकरं मद्यं रक्ता।

कृष्ण २

ष्मीहरि दीपनं ॥१५४॥ माध्वीकोल्पगुणो किंचित्तद्वज्जूरमनिलप्रदं ॥ तदेव विशदं रुच्यं श्लेष्मघ्नं न परं लघुः ॥१५५॥
शालिषष्टिकपिष्टादिकृतं मद्यं सुरा मता ॥ सुरा गुर्वी बलस्तन्यपुष्टिमेदकफप्रदा ॥१५६॥ ग्राहिणी शोथगुल्मा
र्शोग्रहणीमूत्रकृच्छ्रनुत ॥ पुनर्नवाशालिपिष्टैर्विहिता वारुणी स्मृता ॥१५७॥ सुरावद्वारुणी लघ्वी पीनसाध्मान
शूलनुत ॥ प्रसन्नास्यात्सुरामंडस्तस्मात्कादंवरी घना ॥१५८॥ जगलस्तदधः प्रोक्तो जगलान्मेदको घनः ॥ पक्व
सो जगलो सारः सुराबीजं तु किण्वकं ॥१५९॥ प्रसन्नानाहगुल्मार्शःछर्द्यरोचकवातनुत ॥ दीपन्याध्मानहृल्लु
क्षितोदरशूलप्रणाशिनी ॥१६०॥ कादंबरीव गुरुर्वृष्या दीपनी वातकृत्सरा ॥ जगलःकफनुद्ग्राही शोथार्शोग्रह
णीमिहः ॥१६१॥ मेदको मधुरो बल्यः स्तंभनः शीतलो गुरुः ॥ पक्वसो हतसारत्वाद्विष्टंभी वातवर्द्धनः ॥१६२॥ किं
ण्वकं वातशमनमहृद्यं दुर्जरं गुरुः ॥ ऐक्षिकी या सुरा सा स्यादिक्षुत्वक्शालितंडुलैः ॥१६३॥ ऐक्षिकी पांडुशो
फार्शःपित्तास्रकफकृष्णनुत किंचिद्वातकरी रूक्षा दीपनी रेचनी लघुः ॥१६४॥ यवपक्वकृतं मद्यं प्रोक्तं य
वसुरा च सा ॥ कोंतोली कोहली ज्ञेया मैरेयो धान्यजासवः ॥१६५॥ आसवस्य सुरायाश्च द्वयोरप्येकभाजने
संधानं तद्विजानीयान्मैरेयमुभयात्मकं ॥१६६॥ क्वचित्तु धातकीपुष्पगुडधान्याम्लसाधितं ॥ गुर्वी यवसुरा रू

क्षास्याद्विषं मिस्त्रिदोषकृत ॥१६७॥ कोहली तद्गुणा वृष्या दृष्टिमांद्यप्रदा गुरुः ॥ मैरेयं बृंहणं वृष्यं गुरु संतर्पणं ।
सरं ॥१६८॥ मद्यं सर्वं मसंजातं मधूलक मुदीर्यते ॥ मधूलकं गुरु स्वादु स्निग्धं शुक्रकफप्रदं ॥१६९॥ शार्करो दीपनः
स्वादुः पाचनो रोचनो लघुः ॥ स्त्रीविलासकरो वातशोथवस्तिविकारनुत ॥१७०॥ मध्वासवो लघू रूक्षः कुष्टमेह
विषापहः ॥ गौडोग्निवर्धनो वर्ण्यो बलकृत्तर्पणं कटुः ॥१७१॥ तिक्तको बृंहणः स्वादुः स्पष्टविण्मूत्रमारुतः ॥ इक्षोः प
क्वरसैः पक्वसिधुः पक्वरसस्मृतः ॥१७२॥ आमैः स एव विहितो बुधैः शीतरसो मतः ॥ सिधुः पक्वरसः श्रेष्ठः स्वराग्निब
लवर्णकृत ॥१७३॥ वातपित्तकरो हृद्यः स्नेहनो रोचनो जयेत ॥ विबंधमेदःशोफार्शःशोषोदरकफामयान ॥१७४
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥ जांबवक्षोदरस्तु मद्यं जंबूरसगुडोद्भवः ॥१७५॥ जांबवो बद्धविष्यंदः का
षायोनिलकोपनः ॥ अरिष्टासवसीधूनां गुणान्कर्माणि चादिशेत ॥१७६॥ कुद्धाय यथास्वं संस्कारमवेक्ष्य कुश
लो भिषक ॥ नवं मद्यमभिष्यंदि त्रिदोषजननं सरं ॥१७७॥ अहृद्यं बृंहणं दाहि दुर्गंधि विशदं गुरु ॥ जीर्णं तदेव रो
चिष्णु कृमिश्लेष्मानिलापहं ॥१७८॥ हृद्यं सुगंधि सुगुणं लघु स्रोतोविशोधनं ॥ सात्विके गीतहास्यादि राजसे
साहसादिकं ॥१७९॥ तामसे निंद्यकर्माणि निद्रादि कुरुते मदः ॥ शुक्तं कफघ्नं तीक्ष्णोष्णं लघु रोचन पाचनं ॥१८०॥

पांडुकृमिहरं रूक्षं भेदनं रक्तपित्तकृत्॥ गौडानि रसमुक्तानि मद्यमुक्तानि यानि च॥१२१॥ यथापूर्वं गुरूणि नराणामभि
ष्यंदकराणि च॥ स्यात्कांजिकं तु सौवीरमारनालं त्रिदोषजित्॥१२२॥ कांजिकं शिशिरस्पर्शे पाचनं रेचनं लघुः तु
षोदकं यवैरामैः सतुषैः शकलीकृतैः॥१२३॥ सौवीरकं कृतं त्वामैः पक्वैर्वा निस्तुषैर्यवैः॥ गोधूमैस्तु सुराम्लं स्यात्सौवीरक
मिति कथित॥१२४॥ तुषांबु दीपनं हृद्यं पांडुकृमिगदापहं॥ सौवीरकं ग्रहण्यर्शोनाशनं भेदि दीपनं॥१२५॥ धान्याम्लं
धान्ययोनित्वात्प्रीणनं लघु दीपनं॥ स्पर्शाद्दाहहरं पानात्पवनश्लेष्मनाशनं॥१२६॥ गंडूषान्मुखवैरस्यदौर्गंध्यकफ
कृंतनं॥ इति मद्यवर्गः॥ अथ मूत्रवर्गः॥ मूत्रं गोनागमहिषीहयाजोविखरोष्ट्रजं॥ नराणां च भवेत्सर्वं पाचनं दी
पनं लघुः॥१२७॥ लवणानुरसं तिक्तं रूक्षं स्रोतोविशोधनं पित्तलं कटुकं हृद्यं भेदि वातानुलोमनं॥१२८॥ निहंति
वातगुल्मार्शःशोफोदरकफकृमीन्॥ कुष्ठपांडुगदानाहविषशूलारुचीस्तथा॥१२९॥ गोमूत्रं तेषु सर्वेषु मूत्रयो
गे प्रशस्यते॥ हस्ति ~~[illegible]~~ मूत्रं विषार्शोघ्नं कुष्ठगुल्मकृमीञ्जयेत्॥१३०॥ महिषं शोफगुल्मार्शःपांडुमेहेषु यो
जयेत्॥ आश्वं भेदि विशेषेण कफकंडूकृमीञ्जयेत्॥१३१॥ आजं गुल्मविषश्वासकामलापांडुदोषजित्॥ आ
विकं शोफकुष्ठार्शोमेहवर्चोग्रहापहं॥१३२॥ गार्दभं ग्रहणीमेहकुष्ठोन्मादकृमीञ्जयेत्॥ औष्ट्रमुन्मादशो।

पार्शः कृमिघ्नः शूलोदरापहं ॥१८४॥ नरमूत्रं गरं हंति सेवितं तु रसायनं ॥ गोजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते ॥१८५॥
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं मतं ॥१८६॥ इति मूत्रवर्गः ॥ योरातीसुखयतिलकः कह्लारमल्लस्तेन श्रीमदनन्नृपे
णा निर्मिते त्र ॥ ग्रंथे श्रीमदनविनोदनाम्नि पूर्णाश्चित्रोयं ललितपदे जल्पादिवर्गः ॥१८७॥ ॥ इति मदनपालविरचि
ते मदनविनोदनिघंटौ जलादिवर्गोऽष्टमः ॥ ॥ मद्रक्षितानेनकृपाणिवक्रे प्रसारिते बीजस्य ततो जगति सविस्म
यं सादरमीक्ष्यमाणो यशोदयाने दशशिशुं नमामि ॥१॥ अथ इक्षुनामगुणाः ॥ इक्षुर्महारसो वेणुर्निःसृतो गुडप
त्रकः ॥ नरराराजो मधुतृणो गंडीरी मृदुपुष्पकः ॥२॥ इक्षवः मूलो लोहितेक्षुः पौंड्रकः पुंड्रकोपरः ॥ रसालः सुकुमा

सु

रोपि कान्तारेक्षुर्भीरुको मतः ॥३॥ इक्षुः स्वादुर्गुरुः शीतो वृष्यः स्निग्धो बलप्रदः ॥ जीवनो वातपित्तघ्नः कुर्यान्मूत्रा
कफक्रमीन् ॥४॥ इक्षवः मूलेतिमधुरो मध्ये मधुर एव तु ॥ अग्रे ग्रंथिषु विज्ञेयो लवणो रसतस्तथा ॥५॥ लोहितेक्षु
र्गुरुः शीतो दाहपित्तास्रकृच्छ्रजित् ॥ पौंड्रकः शीतलः स्निग्धो बृंहणः कफकृत्सरः ॥६॥ कान्तारेक्षुस्तु रुणो वंशः क्षारः
किंचित्तु तत्समः ॥ वंशवच्छतपोरोपि किंचिदुष्णः समीरजित् ॥७॥ कांतारतापसौ तद्वत्काष्ठेक्षुर्वातलो हिमः ॥ कोश
कारो गुरुः शीतो रक्तपित्तक्षयापहः ॥८॥ सूचीपत्रो नीलपौंड्रो नेपालो दीर्घपत्रकः ॥ वातलाः कफपित्तघ्नाः सक

सितामत्स्यंडिकापद्मीमीनोडीवस्त्रकस्तथा॥ अन्यासितोपलाशुद्धासिताहिक्षुरिकामला॥ खंडमन्यत्खंडसितामाधवीमधुशर्करा॥ यवासशर्करान्यास्याद्यथेक्षुधायसंभवाः॥ अन्यापुष्पसिताप्रोक्तापुष्पसंस्कृतशर्करा॥ २

षायाविदाहिनः॥ १०॥ अथरसः॥ दंतैर्निपीडितस्तेषां रसः पित्तास्रनाशनः॥ शर्करासमवीर्यः स्यादविदाही कफप्रदः॥ ११॥ गु
रुर्विदाही विष्टंभी यांत्रिकस्तु प्रकीर्तितः॥ अथगुडनाम॥ गुडामये कामलशोषमेहे गुल्मामये पांडुहलीमकं च॥ वा
ते सपित्ते श्वपि राजयक्ष्मे रुचिप्रदो रोगहरो गुडः स्यात्॥ १२॥ काशे शोफे गुडो नेष्टो अन्यत्रापि हितो मतः॥ योगयुक्तो
पि सर्वत्रा हितो गुणागुणाद्वत्॥ १३॥ फाणितं इक्षुगुडको गुडस्त्रिक्तरसो द्रवः॥ मत्स्यंडी ग्राहिणी बल्या गुरुः पित्तानि
लापहा॥ १३॥ अथमिश्री॥ सितोपलासरा गुर्वी वातपित्तहराहिमा॥ १४॥ अथखांड॥ खंडमप्येवमादेश्यं रुच्यं पुष्टिब
लप्रदं॥ अथमधुशर्करा॥ माधवी शर्करा सौम्या कफपित्तहरा गुरुः॥ १५॥ अथयवासशर्करा॥ यवासशर्करा शीता वात
लाकफपित्तजित्॥ अथपुष्पवासितशर्करा॥ सीतापुष्पसिता हृद्या रक्तपित्तहरा गुरुः॥ १६॥ अथराव॥ फाणितं गु
र्वभिष्यंदि दोषलं मूत्रशोधनं॥ अथमधुकराव॥ मधुकफाणितं वस्तिदूषणं वातपित्तलं॥ १७॥ अथगुड॥ गु
डः सारो गुरुस्त्वादुर्बीतपित्ताग्निकृत्सरः॥ बल्यकृमिश्लेष्मकरो मूत्रास्रविशोधनः॥ १८॥ जीर्णोऽल्पथ्योल्लघुः पथ्यो॥
नाभिष्यंद्यग्निपुष्टिकृत्॥ अथइक्षुविकार॥ इक्षोर्विकारा विमला यथा कुर्युर्गुणास्तथा॥ तद्दाहमूर्च्छापित्ता
स्रविषमोहहराहिमाः॥ १९॥ गुरवो मधुराबल्याः स्निग्धा वातहरा सराः॥ २०॥ अथमधुनामगुणाः॥ मधुपुष्पासवः

पुष्परसो माक्षिकमीरितं ॥ माक्षिकं पैत्तिकं क्षौद्रं भ्रामरं मधु विस्तरात् ॥ २१ ॥ माक्षिकं तैलसंकाशं पैत्तिकं घृतसंनि-
भं ॥ क्षौद्रं कपिलवर्णं स्याद्भ्रामरं स्फटिकामलं ॥ २२ ॥ मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनं ॥ चक्षुष्यं दीपनं स्वर्यं व्र-
णशोधनरोपणं ॥ २३ ॥ वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं जयेत् ॥ कुष्ठार्शःकासपित्तास्रकफमेहकृमीञ्जयेत् ॥ २४ ॥ मे-
दस्तृष्णावमिश्वासहिक्कातीसारहृद्ग्रहान् ॥ दाहक्षततक्षयं तत्तु योगवाह्यल्पवातलं ॥ २५ ॥ माक्षिकं मधु पुष्पश्रेष्ठं नेत्रा-
मयहरं लघु ॥ पैत्तिकं लघु रूक्षोष्णं पित्तदाहास्रवातकृत् ॥ २६ ॥ क्षौद्रं माक्षिकवद्वेयं विशेषान्मेहनाशनं ॥ भ्रा-
मरं कफपित्तघ्नं मूत्रजाड्यकरं गुरुः ॥ २७ ॥ नवीनं मध्वभिष्यंदि स्निग्धं श्लेष्महरं सरं ॥ पुराणं ग्राहि तद्रूक्षं मेदोघ्न-
मतिलेखनं ॥ २८ ॥ विषादिदुष्टपुष्पेभ्यः सविषा मक्षिकादयः ॥ मधु चिन्वंति तस्मात्तत्स्वभावात्सविषं स्मृतं ॥ २९ ॥
तस्मादग्न्यातपाद्यार्त्तैर्नयुक्तं हंति मानवं ॥ उष्णकाले च देशे च द्रव्ये रूक्षे च योजितं ॥ ३० ॥ निरूहे छर्दने यद्यैतद्दु-
ष्टं न निवार्यते ॥ यस्मात्पाकबलाच्चैव न तयोस्तद्धि निवर्त्तते ॥ ३१ ॥ आमामये जलेनापि न द्विष्येन विरुध्यते ॥ ३२ ॥ अथ
मधूत्थं ॥ मदनं मधुजं सिक्थं मधूच्छिष्टं मधूत्थितं ॥ मदनं मृदु सुस्निग्धं भूतघ्नं व्रणरोपणं ॥ ३३ ॥ भग्नसंधान-
कृद्वातकुष्ठवीसर्परक्तजित् ॥ यो राज्ञां मुख्यतिलकः खारमल्लस्तेन श्रीमदनन्नृपेण निर्मितेत्र ॥ ग्रंथेऽभ्रम्मा।

दनविनोदनाम्नि पूर्णोभूत्त्रयोयं ललितपदे गुडादिवर्गः॥ ॥ इति मदनपालविरचिते मदनविनोदनिघंटौ गुडादिव
र्गो नवमः॥ ॥ अजन्मरूपं बहुजन्मरूपं तमालभासं विशदप्रकाशं॥ मुक्तिप्रदं बद्धमलं खलेन त्रैलोक्यनाथं शि
रसा श्रयामि॥ १॥ अथ शालिभेदाः॥ शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः॥ मुद्गादिद्विदलं सैवं कंग्वादि
तृणधान्यकं॥ २॥ क्षुद्रधान्यं कुधान्यं तत्क्षुद्रकधान्यं यवादिकं॥ रक्तशालिर्लोहितः स्याद्दारुडः शकुनाहृतः॥ ३॥ सु
गंधिको महाशालिः कलमस्तु कलामकः॥ रक्तशालिर्दीर्घशूकः पुंड्रो माहिषमस्तकः॥ ४॥ पूर्णाचंद्रो महाशालिः पुं
ड्रीकः प्रमोदकः॥ पुष्पांडकः शीतभीरुः कांचनः शकुनाहृतः॥ ५॥ पांडुर्गौरः सारिवाख्यो लोध्रपुष्पः सुगंधिकः॥
हायनो दीर्घमालश्च महादूषकदूषकौ॥ ६॥ शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः॥ पित्तघ्ना ल्पानिलकफा
मूत्रलाल्लघवो हिमाः॥ ७॥ रक्तशालिर्वरस्तेषां वर्ण्यो बल्यस्त्रिदोषजित्॥ चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्
ज्वरापहा॥ ८॥ विषव्रणहरः किंचित्तस्मादल्पगुणाः परे॥ महाशालिः परं बल्यो रक्तशालिसमो गुणैः॥ ९॥ षष्टि
कः कंगुकः पीतः प्रमोदकमुकुंदकाः॥ महाषष्टिकवेदारं पुष्पं कुरवकादयः॥ १०॥ षष्टिका मधुराः शीता लाघवो
बद्धवर्चसः॥ वातपित्तप्रशमनाः शालीनां सदृशा गुणैः॥ ११॥ षष्टिकः प्रवरस्तेषां लघुः स्निग्धस्त्रिदोषजित्॥ पा

के स्वादुर्मेदुर्गुर्वी हि स्थैर्यकारी बलप्रदः ॥ ११ ॥ कशालिर्गुरोस्तुल्यस्तस्मादल्पगुणाः परे ॥ कलमश्रीहिस्त्वरितकः कुक्कुटांडक
पाटलाः ॥ १२ ॥ शालामुखस्तरणबाष्पो नंदीजंतुमुखादयः ॥ श्रीहयो मधुराः शीताः षष्टिकानां गुणैः समाः ॥ कृष्णव्रीहिर्वर
स्तेषां तस्मादल्पगुणाः परे ॥ शालयो दग्धभूजाता लघुरुक्षाः कफापहाः ॥ १३ ॥ स्थलजाः स्वादवः पित्तकफघ्ना वातव
ह्निदाः ॥ केदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥ १४ ॥ रोप्यातिरोप्या लघवो मूत्रलास्ते गुणोत्तमाः ॥ छिन्नरूढा हि
मारुक्षाः पित्तघ्ना लघुपाकिनः ॥ १५ ॥ अथ गोधूमाः ॥ गोधूमः सुमनाः म्लेच्छो मधूली तु पिसीतिका ॥ नंदीमुखोऽल्प
गोधूमोऽल्पो के पीशिलुकोच्यते ॥ १६ ॥ गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ॥ कफशुक्रप्रदो बल्यः स्निग्धः संधानकृत्
सरः ॥ १७ ॥ स्तस्मात्स्थूलगोधूमान्म्लेच्छो हीनतरो गुणैः ॥ अथ यवनाम ॥ यवस्तीक्ष्णशुचिःशूको निःशूकोतिया
वोपरः ॥ यवः कषायो मधुरः शीतः पित्तकफास्त्रजित् ॥ १८ ॥ प्ररोपुतिल्ववत्पथ्यो रूक्षो मेधाग्निवर्द्धनः ॥ लेखनो बद्ध
निष्यंदः स्वर्यो मेदस्तृषापहः ॥ १९ ॥ बहुवातमलः स्थैर्यवर्णकारीस्तु पिच्छिलः ॥ अस्मादतियवः किंचिद्गुणैर्न्यूनस्ततो न त
रुःस्मृतः ॥ २० ॥ अथ सेविः ॥ शिंबीमुद्गश्चणो माषः सतीनः सकलायकः ॥ मसूरश्चक्रमंगल्यो मकुष्ठः त्रिपुटाद
यः ॥ २१ ॥ विदला मधुराः स्नेहः कषायाः कटुपाकिनः ॥ वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ॥ २२ ॥ तेषु

ढमसृतामप्यामन्येत्वाध्मानकारकाः॥ सिंब्यःविष्टंभिनोमेहृष्टिशुद्धावातपित्तलाः॥२५॥ विशदागुरवोहृद्यारूक्षाः क
टुकपाकिनः॥ सितासितादिभेदेनबहुधातेप्रकीर्तिताः॥२६॥ अथमुग॥ मुद्गोबल्लाटोमंगाल्योहरितःशारदोपरः॥
पीतःप्रचेतोवसकोमाधवःप्रवरोसितः॥२७॥ वनमुद्गस्तुवरकोराजमुद्गस्तुखंडवाः॥ मुद्गोरूक्षोलघुर्ग्राहीकफपि
त्तहरोहिमः॥२८॥ स्वादुरल्पानिलोनेत्र्योवन्योप्युक्तगुणाःस्मृतः॥ हरितःप्रवरस्तेषांतत्क्वाथकेतिकृमुत्तमं॥२९॥ अथ
उरद॥ माषोवीजकरोहारिःसबलोराजमाषकः॥ माषोगुरुःस्वादुपाकःस्निग्धोरुच्योनिलापहः॥३०॥ उष्णःसंतर्प
णोबल्यःशुक्रलोबृंहणःपरं॥ भिन्नमूत्रमलस्तन्यमेदःपित्तकफप्रदः॥३१॥ गुदकीलार्दितश्वासपंक्तिशूलानि।
चंवरवडु रमास
नाशयेत्॥३२॥ अथचौला॥ राजमाषःस्वादुरूक्षःकषायस्तर्पणोगुरुः॥ ग्राहीवातकरःस्तन्यबलवर्चोरुचिप्रदः॥
मोथी
३३॥ अथमोट॥ मकुष्टकोमकुष्ठःस्यान्निष्पावोवल्लकाःस्मृतः॥ मकुष्टोवातलोग्राहीकफपित्तहरोलघुः॥३४॥ कौ
तिजिन्मधुरःपाकेकृमिजिज्ज्वरनाशनः॥ अथनिष्पाव॥ निष्पावोनिलपित्तास्रमूत्रस्तन्यकरःसरः॥ विदाहुष्णो
गुरुःशोफकफहृच्छुक्रनाशनः॥३५॥ अथवटुली॥ वर्तुलस्तुसतीनस्याद्धरेणुःस्वल्पवर्तुलः॥ वर्तुलःशीतलो।
ग्राहीकफपित्तहरोलघुः॥३६॥ विपाकेमधुरोरूक्षोहरेणुस्तद्गुणाःस्मृतः॥३७॥ अथमटर॥ कलायं खंडिकःप्रोक्तं

स्त्रिपुटःखडुरवेडिकः॥कलायःकफपित्तघ्नोग्राहीशीतोतिवातलः॥३८॥त्रिपुटोपिगुणैरेवंखंजकंकफपित्तजि
त॥अथचणकः॥चणकोहरिमंथःस्याद्वाजिमंथोथजीवनः॥चणकःशीतलोरूक्षःपित्तरक्तकफापहः॥३९॥ल
घुःकषायोविष्टंभीवातलःपुंस्त्वनाशनः॥४०॥अथमसूरः॥मसूरिकामसूरःस्यान्मंगल्यापांडुरापरा॥मसू
रोमधुरःपाकेसंग्राहीशीतलोलघुः॥४१॥कफपित्तास्त्रजिद्रूक्षस्तच्छावोलघुतिक्तकं॥अथकुलत्थी॥कुलत्थ
स्त्रिकपिश्चत्रःकुलालीवनजःपरः॥कुलत्थःकटुकःपाकेकषायःपित्तरक्तजित॥४२॥लघुर्विदाहीवीर्योष्णः॥
श्वासकासकफानिलान॥हंतिहिक्काश्मरीशुक्रदाहानाहान्सपीनसान॥४३॥स्वेदसंग्राहकोगुल्मःमेदःकृ
मिहरःपरः॥वन्योविशेषतःशीतोनेत्रामयविषापहः॥४४॥अथतिलः॥तिलःस्तस्तैलफलस्तिलपिंडोपरःशितः॥
जर्तिलोवनजातःस्यादाढकीतुवरीमता॥४५॥तिलोष्णोहीगुरुःस्वादुःस्निग्धोस्नःकफपित्तलः॥वल्यःकेश्योहिम॥
स्पर्शःस्तन्योव्रणहितःपरः॥४६॥दंत्योल्पोमूत्रहृद्धातनाशनोग्निमतिप्रदः॥कृष्णःश्रेष्ठतमस्तेषुशुक्लोमध्यमः
शितः॥४७॥अन्येहीनतराःप्रोक्तास्तज्ज्ञैरक्तादयस्तिलाः॥४८॥अथतुवरि॥तुवरीग्राहिणीशीतालघुःकफविषा
स्त्रजित॥अथअतसी॥अतसीमसृणानीलपुष्पीचेलुरूमाक्षुमा॥अतसीमधुरातिक्तास्निग्धोष्णावात

जिद्गुरुः॥४५॥ अथ कुसुंभवरटै॥ कुसुंभं पावकं पीतमल्लकं वस्त्ररंजकं॥ तद्बीजं किरटालब्धी गुष्ठाप प्रोक्ता रातथा
॥४६॥ कुसुंभं वातलं कृच्छ्रं रक्तपित्तकफापहं॥ किरटा नसीवद्धिदृष्टा विशेषाद्विषनाशिनी॥५०॥ अथ सर्षपराई॥ सर्षपः
कटुकः स्नेहो भक्त तुष्णो रक्तपित्तापहः॥ तरौ भोज्यः सउद्दिष्टः सिद्धार्थः श्वेतसर्षपः॥५१॥ राजिका त्वासुरी राजी स्तुती स्त्याक्षु
क्षसर्षपः॥ सर्षपः कफवातघ्नस्तीक्ष्णोष्णो रक्तपित्तजित॥५२॥ किंचिद्रुक्षोग्निदः कंडुकुष्ठकोष्ठकृमीन्हयेत॥ राजिका
तद्गुणा ज्ञेया तीक्ष्णानी आविशेषतः॥५३॥ अथ शणाः॥ शणाः प्रोक्ता मातुलानी जंतुनेतु मेलाशनः॥ शणो हिमो गुरुग्राही
हीनस्तुष्यंप्रदरास्रजित॥५४॥ अथ कंगुमेदाः॥ कंगुश्यामाकनीवारवंशको द्दालनर्तकाः॥ वराटिका त्लोध्रपतीर्ग्गको
द्रवश्चमधूलिका॥५५॥ नंदीमुखी वेणुयवाः प्रियंगुः कोरदूषकाः॥ गवेधुका नल्लो नाली मुकुंदवरकादिकं॥५६॥ तृ
णाधान्यं लघु स्वादु कटु पाकि विलेखनं॥ रुक्षोऽलं वद्धनिष्यंदं वातपित्तप्रकोपनं॥५७॥ पीततंदुलिका कंगुः प्रियंगु
कर्कटीमता॥ सितकंगुस्तु सुभारी रक्तकंगुस्तु शोधिका॥५८॥ चीरणाकः काककंगुः स्याच्छ्यामाकस्तृणबीजकः॥५
९॥ अथ कोद्रव यवनाली नाम॥ कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः॥ प्रियंगुः पित्तजिद्रुक्षो भग्नसंधान
कृद्गुरुः॥६०॥ श्यामाकः शोषणः शीतो रुक्षः पित्तकफापहः॥ कोद्रवः शीतलो ग्राही विषपित्तकफा जयेत॥६१॥

तोदि

नीवारउद्दिकाचौरोमुनिश्रोहिर्मुनिप्रियः॥नीवारःशीतलोग्राहीपित्तघ्नःकफवातकृत्॥४५॥यवनालोदेवधान्यं
जुर्ण्हलिर्जुन्नलोनलः॥यवनालःस्वादुशीतोवातलःकफपित्तजित्॥४६॥अथगिरिधान्यं॥गवेधुकाकर्षरागीस्या
द्धोजिह्वाकर्षिकामता॥गवेधुकाकटुःस्वाद्वीकार्श्यकृत्कफनाशनी॥४७॥वार्जरीदुर्जराज्ञेयावातपित्तप्रका
शिनी॥अथगुणागुणज्ञानं॥अपर्याप्तंव्याधिहतमनार्तवमभूमिजं॥नवंजंत्वादिभिर्दुष्टंनधान्यंगुण
वन्मतं॥४८॥धान्यंनवमभिष्यंदिगुरुस्वादुकफप्रदं॥वर्षोषितंसर्वधान्यंगौरवंपरिमुंचति॥४९॥नमुंचतितत्
वीर्यंक्रमान्मुंचत्यतःपरं॥विदाहिगुरुविष्टंभिविरूढंदृष्टिदूषणं॥५०॥एतेषुयवगोधूममुद्गतिलमाषानवाहि
ताः॥रूक्षपुराणाविरसानतथागुणकारिणः॥५१॥योराज्ञांमुख्यतिलकःकाष्ठारमस्तेनश्रीमदनन्नृ
पेणनिर्मितेऽत्र॥ग्रंथेभून्मदनविनोदनाम्निपूर्णश्चित्रोयंललितपदेसुधान्यवर्गः॥५२॥ ॥इतिमदन
पालविरचितेमदनविनोदनिघंटौधान्यवर्गोदशमः॥ ॥राधाहरिंचरणयोःपतितंकराभ्यांकोपाच्च
घ्नानतमुदीक्ष्यपुनर्हसंतं॥तत्पादयोःसमपतच्चकिताभियाताम्स्यापयत्जयतिकेतवगोपवेषः॥१॥अथ
आहारनामगुणाः॥आहारोभोजनंजग्धिरसनंजेमनंतथा॥आहारोबलकृत्सद्यःप्रीणनोदेहधारकः॥२॥

ओजस्तेजस्करोत्साहपुष्टितुष्टिस्मृतिमतिप्रदः॥ अथ भात १॥ भक्तं मंधस्तु भक्तान्नं कूरं दीदिविरोचनः॥ भक्तं वह्निकरं प
थ्यं तर्पणं मूत्रलं लघुः॥३॥ सुधौतं प्रस्रुतं चोष्णं विशदं गुणवन्मतं॥ अधौतमस्रुतं शीतं गुर्वरुच्यं कफप्रदं॥४॥
भ्रष्टतंदुलजं रुच्यं सुगंधि कफजिल्लघुः॥ भक्तं मांसरसक्षीरवैदलाम्लादिसाधितं॥५॥ स्नेहशाकैश्च गुरु तद्वृष्यं
बल्यं कफप्रदं॥ रसौदनो गुरुर्वृष्यो बल्यो वातिज्वरापहः॥६॥ घोलभक्तं ग्रहहरापर्शः आमभक्तं पाचनं हिमं॥७॥ अथ या
यवाग्वादिलक्षणं॥ यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा॥ चतुर्गुणे तोये संसिद्धा विलेपी घनसिक्थका॥८॥ पे
यासिक्थान्विता तोये चतुर्दशगुणे कृता॥ मंडश्चतुर्दशगुणे सिद्धस्तोये विसिक्थकः॥९॥ अथ यवागूगुणाः
यवागूर्ग्राहिणी बल्या ज्वरघ्नी वस्तिशोधनी॥ अथ विलेपी॥ विलेपी दीपनी बल्या हृद्या संग्राहिणी लघुः॥
व्रणाक्षिरोगिणां पथ्या तर्पणी तृड्ज्वरापहा॥१०॥ अथ पेया॥ पेया कुक्षिगदस्फोटज्वरस्तंभातिसारजित्॥ हृ।
[illegible] ग्निकृल्लघुर्दोषमलस्वेदानुलोमनी॥११॥ अथ मंड॥ मंडो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत्॥ स्रो
तोमार्दवकृत्पित्तज्वरश्लेष्मश्रमापहः॥१२॥ वाद्यमंडलाजामंडौ॥ वाद्यमंडो वै यैर्भृष्टैर्लाजामंडस्तु शालिभिः
वाद्यमंडो लघुर्ग्राही शूलानाहत्रिदोषजित्॥१३॥ नवज्वरे पिपप्यो यं पटोलमगधान्वितः॥ लाजामंडो लघु।

ग्नोऽसि हृद्यः पाचनदीपनः ॥१४॥ अथाष्टगुणमंडः ॥ तंदुलैरर्धमुद्गांशैः किंचिद्भृष्टैः सुपाचितः ॥ हिंगुसैंधवसंयुक्तो धनिकानत्रात्रिक
टुसंस्कृतः ॥१५॥ ज्ञेयः सोऽष्टगुणो मंडो ज्वरदोषत्रयापहः ॥ रक्तस्य वर्धनः प्राणप्रदो वस्तिविशोधनः ॥१६॥ अथ —— मुद्ग
यूषः ॥ यूषः स्यान्नो वै दलानामष्टादशगुणेंऽभसि ॥ मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः ॥१७॥ व्रणोर्ध्वजत्रुहृद्दा
हकफपित्तज्वरास्रजित् ॥१८॥ अथ दाडिमामलकयूषः ॥ दाडिमामलकैर्यूषः पित्तवातहरो लघुः ॥ अथ मुद्गामल
कयूषः ॥ मुद्गामलकयूषस्तु भेदनः कफपित्तजित् ॥ तृड्दाहशमनः शीतो मूर्छाश्रमभ्रमापहः ॥१९॥ अथ कुलत्थ
यूषः ॥ कुलत्थयूषो गुल्मार्शःकफवातानाश्मशर्कराः ॥ तूनीप्रतूनीमेदांसि मेहं हंत्यग्निकृत्सकः ॥२०॥ अथ सुष्कमूलकयू
षः ॥ सुष्कमूलकयोर्यूषो गलग्रहकफज्वरान् ॥ हंति श्वासप्रतिश्यायकासमेदोरुचिक्रमीन् ॥२१॥ अथ चणकयूषः
चणकैर्विहितो यूषो रूक्षस्तुवरको लघुः ॥ रक्तपित्तप्रतिश्यायकासपित्तकफापहः ॥२२॥ अथ मकुष्ट(मोथी)यूषः ॥ मकुष्टयू
षः संग्राहि पित्तश्लेष्मज्वरापहः ॥ लघुः संतर्पणः पथ्यो हृद्यः पीनसकासजित् ॥२३॥ अथ कृताकृतयूषौ ॥ यूषः कृता
स्त्योलवणस्नेहकट्वा(कारि)दिसाधितः ॥ अकृतस्तैर्विनासिद्धः क्रमाद्गुरुलघू च तौ ॥२४॥ अथ गुरुलाघवयूषौ ॥ यूषा गोरा
सधान्याम्लफलाम्लादिभिरन्विताः ॥ पयो नवं गुरुस्तत्र वातघ्ना रुचिकारिणः ॥२५॥ अथ यूषाः ॥ यैरन्नैरौषधैर्यैश्च

कृतामंडादयो बुधैः॥ विचार्य तद्गुणानेतोस्तद्गुणानेव निर्दिशेत्॥२४॥ अथ दालि॥ सूपं तु सूपकोभ्रष्टैः सिद्धै-
र्निस्तुषैः कृतः॥ सूपं विष्टंभि रूक्षं स्यान्निरन्नं तु विशेषतः॥२५॥ निस्तुषं भृष्टमिन्नं तल्लाघवं सुतरां व्रजेत्॥ अथ
खिचरी॥ कृचित्समाषैं कार्यैवं कृसरा तिलतंदुलैः॥ कृसरा केवलयाहासिद्धा तंदुलवैदलैः॥२६॥ कृशरा शुक्रला बल्या
गुरुः पित्तकफप्रदा॥ दुर्जरा पुष्टि विष्टंभिमलकृद्वातनाशनी॥२७॥ अथ खीरि॥ खिच्चीपि तद्गुणा सैषा स्वधान्य
गुणकारिणी॥ क्षैरेयी परमान्नं स्यात्पायसं क्षीरतंडुलैः॥२८॥ क्षैरेयी दुर्जरा बल्या धातुपुष्टिप्रदा गुरुः॥ विष्टंभिनी हरे
त्पित्तरक्तपित्ताग्निमारुतान्॥२९॥ अथ गुडंबा नाम॥ गुडादिपक्वं क्वथितमाममाम्रफलं पुनः॥ स्नेहैलानागरैर्युक्तं।
ज्ञातव्यो रागखांडवः॥३०॥ अथ खांडव॥ सिता रुचक सिंधूत्थैः सवृक्षाम्लपरूषकैः॥ जंबूफलरसैर्युक्तो रागो राजिकया
कृतः॥३१॥ खांडवा मधुराम्लादिरससंयोगसंभवाः॥ दीपना बृंहणा रुच्यास्तीक्ष्णा हृद्याः श्रमापहाः॥३२॥ अथ आम्राम
लकखंड॥ आम्रामलकलेह्याद्याः हृद्याः पुष्टिबलप्रदाः॥३३॥ तर्पणा रोचनाः स्निग्धा मधुरा गुरवस्तथा॥३४॥ अथ सि
खरण॥ ससितं दधि मथ्याज्य मरिचैलादिसंस्कृतं॥ मथितं चीनकाभिन्या कर्पूरपरिवासितं॥३५॥ रसाला [illegible] बल्या
रोचनी वातपित्तजित्॥ स्निग्धा गुरुः प्रतिश्यायं विशेषेण विनाशयेत्॥ अथ सरवत्पना॥ द्राक्षाम्लिका परूषादि

रसाला शिखरिणी युक्ता मार्जि
ताकथिता बुधैः २ ——
मार्जिका [illegible]

तैलैखंडादिमिश्रितं ॥ मरिचार्द्रककर्पूरचातुर्जातादिसंस्कृतं ॥ ३९ ॥ पानकं द्विविधं तस्मादम्लानम्लविभेदतः ॥ द्राक्षा
खर्जूरकाश्मर्यसमधूकपरूषकैः ॥ ४० ॥ पंचसाराभिदं पानं चंद्रचूर्णाधिवासितं ॥ पानकं मूत्रलं हृद्यं प्रीणनं तृट्।
श्रमापहं ॥ ४१ ॥ यथाद्रव्यगुणं तत्तु गुरुलघ्वादि निर्दिशेत ॥ पंचसाराभिधं पित्ततृष्णादाहश्रमापहं ॥ ४२ ॥ माध्वीकं
मददाहास्रपित्तघ्नं तृषापहं ॥ आम्लिकायाः स्वतं तृष्णाक्लमिदाहश्रमापहं ॥ ४३ ॥ अथ सट्टकं ॥ निःस्नेहं दधिनि
र्मथ्य पटे शर्करयान्वितं ॥ सव्योषदाडिमाजाजिसट्टकोयमुदाहृतः ॥ ४४ ॥ सट्टको रोचनः स्वर्यः पित्तानिलहरो गुरुः
दीपनस्तर्पणो बल्यः श्रमक्लमतृषापहः ॥ ४५ ॥ अथ अंगारकर्कटी ॥ कुकूलखर्परभ्राष्ट्रकंद्वंगारविपाचिताः ॥ मंडा
काया यथापूर्वं गुरवो बृंहणा मताः ॥ ४६ ॥ मंडको विस्तृतः सूक्ष्मः खर्परादिषु पाचितः ॥ स एव वर्तितः स्थूलस्तु
बुधैः पूपलिका मता ॥ ४७ ॥ अंगारकर्कटीसैव विज्ञेयांगारपाचिता ॥ अत्युष्णो मंडकः पथ्यः शीतः सगुरुरुच्यते ॥
४८ ॥ अंगारमंडको ग्राही लघुर्दोषत्रयापहः ॥ पोलिका कफकृद्बल्या पित्तलावातनुद्गुरुः ॥ ४९ ॥ अंगारकर्कटी बल्या
बृंहणी शुक्रला लघुः ॥ दीपनी कफहृद्रोगपीनसश्वासवातजित ॥ ५० ॥ अथ पिष्टान्नभक्ष्याः ॥ शालिपिष्टकृता
भक्ष्या नातिबल्या विदाहिनः ॥ अवष्टंभा गुरवश्चोष्णाः कफपित्तप्रकोपनाः ॥ ५१ ॥ अथ गोधूमपिष्ट ॥ गोधूमवि

॥ राम ॥

हिताभक्ष्यावल्याः पित्तानिलापहाः ॥५२॥ अथ माषपिष्टभक्ष्याः ॥ वैदलावातलाभक्ष्या गुरवस्तुवराः स्मिताः ॥ माषपिष्टकृ-
ताभक्ष्यावल्याः पित्तकफप्रदाः ॥५३॥ अथ गुडपाचितभक्ष्याः ॥ विचार्यान्नगुडं भक्ष्यौ गुणानपि विनिर्दिशेत् ॥ गोडि-
काः गुरवो भक्ष्याः वातघ्नाः कफशुक्रलाः ॥५४॥ अथ घृतपक्वं ॥ घृतपाचितभक्ष्यास्तु बल्याः पित्तानिलापहाः ॥ अथ
तैलपक्वं ॥ तैलजा दृक्समीरघ्ना उष्णाः पित्तास्रदूषणाः ॥५५॥ अथ दुग्धपक्वं ॥ दुग्धालोडितगोधूमशालिपिष्टा-
दिनिर्मिताः ॥ वातपित्तहरा भक्ष्या हृद्याः शुक्रबलप्रदाः ॥५६॥ अथ घेवरः ॥ विचार्यान्नगुणां भक्ष्यानन्यानपि वि-
निर्दिशेत् ॥ क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितं ॥५७॥ विस्तार्य सर्पिषा पक्वान्ततः श्वेताविमिश्रितं ॥ घृतपूरो-
यमुद्दिष्टः कर्पूरमरिचान्वितः ॥५८॥ शमिता मर्दिता क्षीरनालिकेरसितादिभिः ॥ अवगाह्य घृते पक्वो घृतपूरोप-
रः स्मृतः ॥५९॥ घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः ॥ सद्यः प्राणप्रदो बल्यः क्षतजेर्वहराः परं ॥६०॥ अथ सं-
यावः ॥ शमितां (मैदा) सर्पिषाभृष्टां श्वेतां मरिचमिश्रितां ॥ एलालवंगकर्पूरचूर्णादिपरिसंस्कृतां ॥६१॥ क्षिप्त्वान्यस-
मितालंबपुटेषु सघृतं पचेत् ॥ ततः खंडेन्यसेत्पक्वे संयावो यमुदाहृतः ॥६२॥ शमितां मंडुदुग्धेन मोदयित्वा सुशो-
भनं ॥ पचेद्घृतोत्तरं खंडेन्यसेत्पक्वं नवे घृते ॥६३॥ ततो मरिचचूर्णैलाखंडचूर्णावचूर्णितां ॥ कुर्यात्कर्पूरसंयुक्तं

संयावममृतोपमं ॥६४॥ अथ खजल्लाः ॥ मर्दयित्वा तु शमितामपूपास्तन्वः कृताः ॥ पक्वा घृते सिता पाकमंडिता मधुशीर्षकाः
॥६५॥ घृतेन मर्दितां तोयैः शमितां मृदु मर्दयेत् ॥ मातुलुंगत्वचाखंडपक्वमार्द्रकपूरितं ॥६६॥ विधाय पूपकं कृत्वा गंधाढ्यं केसरा
न्वितं ॥ पक्वा सर्पिषि खंडावगाहितो मधुशीर्षकः ॥६७॥ अथ पूआः ॥ शमितां गुडतोयेन मेलयित्वा सुगालितां ॥ घृ
ते विस्तीर्य विपचेत्सुवृत्तान्मृदु पूपकान् ॥६८॥ अथ दध्योडीः ॥ शालिपिष्टयुतं दध्ना मर्दयित्वा घृते पचेत् ॥ वेष्टयेत्पक्व
खंडेन सुवृत्तान्दधिपूपकान् ॥६९॥ अथ विष्यंद यालूराः शीतलोके ॥ संयावमधुशीर्षाद्याः पूपकाः दधिपूपकाः ॥ गुर
वो बृंहणा हृद्या वृष्याः पित्तानिलापहाः ॥७०॥ एतेस्कों सैरमेदेन विविधास्तेपि तद्गुणाः ॥ दधिक्षीरेरसमेपक्वात्वर्षभा
गावशेषिते ॥७१॥ आवपेद्रक्तशालीनां तंदुलांस्तिलसंयुतान् ॥ प्रियालपनसाद्यानां बीजमुष्टीः समावपेत् ॥७२॥
क्षीरतुल्ये घृते चैव शर्करां च महागुणां ॥ सितहस्तिकटुकोपेतः कर्पूरेणाधिवासितः ॥७३॥ एष विष्यंदनो नाम
देवलोकेपि दुर्लभः ॥ यस्मात्पक्वोपि स्निग्धे तस्यंदते सर्वतो मुखं ॥७४॥ तस्मात्सद्विधानज्ञैर्विष्यंदन इति स्मृतः ॥
विष्यंदो बृंहणो हृद्यः पित्तानिलहरो गुरुः ॥७५॥ अथ लपसी ॥ शमितां भर्जयेन्नेदं घृते श्वेतां ततो न्यसेत् ॥ चार
मज्जादिसंयुक्तां पयसा योजयेत्ततः ॥७६॥ एषैलादियुता तैलैर्लपसिका ललिता मता ॥ लपसिका बृंहणी वृष्या

वातपित्तहरा गुरुः ॥५७॥ अथ फेणीः ॥ फेणिका पुटिनी शुभ्रा वातपित्तहरा लघुः ॥ लक्षणां फेनिकादीनां स्वरूपं शास्त्र
द्विचारयेत् ॥५८॥ अथ लड्डू ॥ मोदकाल्लड्डुकाः प्रोक्तास्ते चानेकविधा मताः ॥ दधिक्षीरं च नष्टदुग्धं च समिता माषपिष्टकाः ॥ मं
सूरणार्द्रककूष्मांडशालूकामिषमत्स्यकाः ॥ इत्यादिभिर्बहुविधाः कल्प्यास्ते स्वरूपशास्त्रतः ॥ स्वद्रव्यं विचार्य मति ।
मांल्लड्डुकानपि निर्दिशेत् ॥ मोदकाद्गुर्जराच्छ्राप्यावल्याः पित्तानिलापहाः ॥६०॥ अथ वराघोलवराः ॥ माषमुद्गादिपिष्टा
नां वटुकावटिकादयः ॥ तत्कारणगुणान्ज्ञात्वा तद्गुणानपि निर्दिशेत् ॥६१॥ माषाणां वटुको हृद्यो बल्यो वातहरो गुरुः ॥ वि
ष्टंभी घोलवटको विदाही पवनापहः ॥६३॥ अथ कांजीवटकः ॥ शांडाकीवटको दृष्टिनाशनो दोषलो गुरुः ॥ तषांबुवटको
रुच्यः पित्तलः कफवातजित् ॥६४॥ अथ इंदुरी ॥ इंदुरी श्रुकलाक्षौ रुविष्टंभकफवातकृत ॥ अथ सोहारीः ॥ सोपालिका
गुरुर्वृष्या रोचनी दोषनाशनी ॥६५॥ अथ कुंडलिनी ॥ द्विप्रस्थां शुद्धशमितां प्रस्थं गोधूमशालितं ॥ विमर्द्य पयसा
स्थाप्यं व्रजे घावन्तदम्लतां ॥६६॥ सछिद्रे नालिकेरस्य पात्रे निक्षिप्य निर्मले ॥ परिभ्राम्य परिभ्राम्य घृते तप्ते विपाचये
त् ॥६७॥ कर्पूरवासिते स्वपविषिक्तोन्तपवक्त्रभां ॥ स्तुपक्कोर्के करणाकारां सिताल्लेहेद्विनिक्षिपेत् ॥६८॥ सानुकुंडलिकाना
मपुष्टिकांतिबलप्रदा ॥ धातु वृद्धिकरा वृष्या हृद्या चेन्द्रियतर्पणी ॥६९॥ तस्यामलत्वमाप्रायांन्यस्य द्धौश्चमगाश्चि

ते ॥ अथ धुधुरी ॥ गोधूमाद्यास्तु कुल्माषा अर्द्धस्विन्ना मताः क्वचित् ॥ कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥
७० ॥ अथ सक्तवः ॥ नवीननिस्तुषोद्भृष्टयवचूर्णं तु शक्तवः ॥ ७१ ॥ अथ मंथः ॥ शक्तवस्तु घृताभ्यक्ताः शीतवारिविलो
डिताः ॥ नातिद्रवा नातिसान्द्रा मंथः सद्भिः प्रकीर्तितः ॥ ७२ ॥ मंथो बलकरः सद्यः परिणामे बलप्रदः ॥ मेहतृष्णाज्वरैः
छर्दिदुष्टदाहश्रमाञ्जयेत् ॥ ७३ ॥ द्राक्षासितेक्षुस्वरसैर्मिश्रः पित्तास्रवातजित् ॥ द्राक्षामंथैर्युतो बल्यः कासश्रम
मदापहः ॥ ७४ ॥ वर्गत्रयसमायुक्तो दोषवर्चोऽनुलोमनः ॥ अथ मातृगुणाः ॥ शक्तवो यवजाः शीता दीपना लघवः स
राः ॥ कफपित्तहरा रूक्षा लेखनाः पानतस्तु ते ॥ ७५ ॥ सद्यो बलप्रदाः पुष्टाः धर्मादिक्लान्तदेहिनां ॥ निस्तुषैर्भर्जितैः
पिष्टैश्चणकैः सयवैः कृताः ॥ ७६ ॥ शक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ॥ पिंडीभूता गुरुस्तेषां द्रवत्वाच्चे
ह्रि काललघुः ॥ ७७ ॥ न भुक्त्वा न पयः पीत्वा न निशायां न वा बहून् ॥ न जलान्तरितान्नद्भिः शक्तूनद्यान्न केवलान्
७८ ॥ अथ खीलः ॥ भ्रष्टशाल्यादिजा लाजा धाना भ्रष्टयवोद्भवाः ॥ लाजा लघुतराः शीता बल्याः पित्तकफ
छिदः ॥ ७९ ॥ छर्दितीसारदाहास्रमेहमेदस्तृषापहाः ॥ ८० ॥ अथ बहुरी ॥ धाना विष्टंभिनी रूक्षा कफमेदोह
रा गुरुः ॥ अथ चिउरा ॥ पक्वार्द्रव्रीहयः सम्यक् पीडिताः पृथुका मताः ॥ पृथुका गुरवो बल्याः श्लेष्मला वातना

शनाः ॥ ८२ ॥ अथ सोरहा ॥ सिंविधान्यै रर्थपक्वैः सुभ्रष्टैः सौल्लकोमतः ॥ सोल्लकोल्यानिलोमेदःकफदोपकभावतः ॥ ८३ ॥
अथ उंवी ॥ अपक्वमाषैर्गोधूमैर्लैर्वोल्लंवल्लैश्चिकाः ॥ उंवीकफप्रदा बल्या लघुपित्तानिलापहा ॥ ८४ ॥ अथ पक्वमां
सं ॥ हिंगुतप्ते च तैले त्वा मांसमालोड्य भर्जितं ॥ मात्रयोऽस्यांगुसंसिप्य पचेत्सम्यग्विचक्षणः ॥ ८५ ॥ मरिचार्द्रकसं
युक्तं सुगंधिद्रव्यवासितं ॥ शीतद्रव्यं स्तधातुल्यं परिशुष्कं तदुच्यते ॥ ८६ ॥ अथ लेह ॥ घनद्रवोपलिप्तं तत्प्रदिग
धमिति कीर्त्यते ॥ ८७ ॥ अथ पिष्टमांस ॥ रसेन युक्तं सरसं स्थूल्यं स्थूलेन सं तैस्तः ॥ परिशुष्कं स्थिरं स्निग्धं रोच
नेन पैरांगुरुः ॥ ८८ ॥ बलमेधाग्निमांसौजःशुक्रवृद्धिकरं परं ॥ तदेव शिलिपिष्टत्वाद्घ्रिप्रमिति कीर्त्यते ॥ ८९ ॥ अथ
शूलपक्वमांस ॥ उल्लिप्तं गुरुपथ्यं तत्परिशुष्कसमं गुणैः ॥ प्रदिग्धं वातलं बल्यं गुरुशुक्रविवर्द्धनं ॥ ९० ॥ सरसं
न तु रोगं तेयं विशेषाल्लघु दीपनः ॥ प्रोतं शूलेन पिशितं सौरभाद्यं तु नामतः ॥ ९१ ॥ लिप्ता विधूमे रंगारैः पाचितं
शूल्यमुच्यते ॥ शूल्यं सर्वोत्तमं मांसे लघुपथ्यतमं मतं ॥ ९२ ॥ अथांगारपक्वमांस ॥ अंगारादिषु यत्पक्वं प्र
तप्तं तदुदाहृतं ॥ अथ पिष्टमांसरूपादि ॥ मांसं दाडिमसिंधूत्थसौरभादिसमन्वितं ॥ पिष्ट्वा पूपादि संकल्प्य पक्वे
पिष्टमिति स्मृते ॥ ९३ ॥ अथ तंदूरपक्वमांस ॥ भर्जितं स्यात्तबताद्देतु भ्रष्टायत्साधितं पुनः ॥ मांसं सौरभसंलिप्तं कंदु

॥श्रीगुरुः॥

॥५७॥

॥म॰वि॰नि॰॥

पक्वं मधुरप्रभं ॥ ९३ ॥ अथ तैलपक्वमांसं० ॥ प्रदिग्धं सरसं पिष्टं भर्जितं कंडुपाचितं ॥ प्रतप्तं परिशुष्कं च शूल्यं यच्चान्य
दीदृशं ॥ ९४ ॥ मांसं तैलेन सिद्धं तद्वीर्योष्णं गुरु पित्तलं ॥ ९५ ॥ अथ घृतपक्वमांसं० ॥ घृतपक्वं न देवस्याल्लघुहृद्यम
पित्तलं ॥ अनुष्णवीर्यं बलदं हृद्यं दृष्टिप्रसादनं ॥ ९६ ॥ अथ तक्रादिसिद्धमांसं० ॥ गोरसस्नेहधान्याम्लफलाम्लकटु
कादिभिः ॥ सिद्धं मांसं भवेद्बल्यं रोचनं दीपनं गुरुः ॥ ९७ ॥ अथ वहस्विन्नमांसं० ॥ मांसं सीतरसं रूक्षं विरसं वातलं गु
रुः ॥ अथ वेसवारः ॥ गतास्थि मांसं सुस्विन्नं पुनर्दृषदि पेषयेत् ॥ व्योषादिसंस्कृतं कृत्वा पचेद्भूयो घृतान्वितं ॥ ९८ ॥ वे
सवारोयमुद्दिष्टो बल्यो वातहरो गुरुः ॥ ९९ ॥ अथ सौरभवेसवारः ॥ स्विन्नमुद्गादिकल्को पि वेसवारो ऽपरः स्मृ
तः ॥ हरिद्राव्योषसिंधूत्थहिंगुधान्यकदाडिमैः ॥ १०० ॥ साजाजिभिर्वेसवारं सौरभो यमुदाहृतः ॥ अथ सौराव० ॥ मु
द्गादिवेसवारं तु यथा द्रव्यगुणान्वदेत् ॥ पिष्टमांससमुद्भूतः स्मृतो मांसरसो रसः ॥ १०१ ॥ सौरावः सौरवः सम
द्योरसोलवणः स्मृतः ॥ १०२ ॥ अथ स्वानिष्कं० ॥ संयुक्तो वेसवारेणा रसः स्वानिष्क उच्यते ॥ अथ मांसरसगुणाः ॥
रसो हृद्यः श्रमश्वासवातपित्तक्षयापहः ॥ प्रीणनो ब्रणायुक्तानां क्षीणानामल्परेतसां ॥ १०३ ॥ विशिष्टभग्नसंधी
नां शुष्कानां शुद्धकोष्ठिणां ॥ शस्यते स्वरहीनानां दृष्ट्यायुःश्रवणार्थिनां ॥ १०४ ॥ अथ दाडिमादियुक्तमांसरसं०

॥राम:॥

सदाडिमादिर्वल्लदोषैर्दोघ्नः सक्तनस्तुयः ॥ अथकडी ॥ सौरवः प्रीणनः शीतो मुखशोषश्रमापहः ॥ दीपनः क्रमिवा
तघ्नः सर्वधातुविवर्धनः ॥१०५॥ खानिष्कस्तु गुरुः पथ्यो दीप्ताग्नीनां विशेषतः ॥ अम्लमांसादिसंयुक्ता लवणांबुविपाचि
ताः ॥१०६॥ दलिकावणिकाज्ञेया रसाद्या लघवो मताः ॥ तक्रादिकाथसंभूता कथिता कथिता बुधैः ॥१०७॥ कथिता पाचनी
हृद्या रुच्या वह्निप्रदा लघुः ॥ कफानिलविबंधघ्नी किंचित्पित्तप्रकोपनी ॥१०८॥ अथरायतानामांतरेण काथिली ॥ शा
कं तक्रादिभिः सम्यक्साधितं कथितं मतं ॥ कथितं दीपनं रुच्यं वातश्लेष्मश्रमापहं ॥१०९॥ त्यक्तास्वहेतुं शाकस्य गुणा
नेन कुणं भवेत् ॥११०॥ अथपापर ॥ पर्पटा लघवो रुच्या लघ्वी यान क्षारपर्पटः ॥ अथखरी ॥ पिशपाकस्ति लकिट्टं
स्यात्पललेतिलपिष्टकं ॥ पिशपाको ग्न्यपनो रुक्षो विष्टंभी दृष्टिदूषणः ॥१११॥ अथतिलौरी ॥ पटलं वंहरांह्निग्धं
कफपित्तहरं गुरुः ॥११२॥ द्रव्यकालक्रियायोगदेशादीन्विविचार्य तु ॥ अन्येषामप्यनुक्तानामेषामपि गुणान्वदेत् ॥
११३॥ योराज्ञो मुख्यतिलकः कघारमल्लस्तेन श्रीमदनन्रपेण निर्मिते त्र ॥ ग्रंथे भून्मदनविनोदनाम्नि पूर्णो श्च
चोयं ल्लिनपदैः कृतान्नवर्गः ॥ ॥ इति मदनपालविरचिते मदनविनोदनिघंटौ कृतान्नवर्गैकादशः ॥ ॥
सुखेनुपद्मप्रतिबोधलुब्धविधुंतुदालिभ्रममारधानं ॥ लक्ष्मीकपोलप्रतिबिंबितांगं नीलांबरं नीलं कलयामितेजः ।

१॥ अथ हस्तीनामगुणाः॥ हस्ती मतंगजो दंती मातंगो नेकपः करी॥ सिंधुरः कुंजरः पद्मी वारणो द्विरदो द्विपः॥ इभो दंत
वलो नागः कुंभी स्तंबेरमो गजः॥ हस्तिनी धेनुका प्रोक्ता करेणुः करिणी च सा॥ ३॥ हस्ती कफानिलौ हन्याद्दुष्टं पित्ता
स्रकोपनः॥ अथ घोडा॥ घोटकः सैंधवो वाजी तुरंगस्तुरगो हरिः॥ तुरंगमो हयः सप्तिर्वाहो वाजी यजुर्जवी॥ ४॥ घोटि
का वडवा वामी प्रसूका श्वा च वाजिनी॥ घोटकः कटुकः पाके दीपनः कफपित्तकृत॥ ५॥ वातहृद्बृंहणो बल्यश्चक्षु
ष्यो मधुरो लघुः॥ ६॥ अथ खचर०॥ खरजोख्यामश्वतरः शीघ्रगो वेगपूजितः॥ बल्य मांश्वतरं मांसं बृंहणं कफ
पित्तलं॥ ७॥ अथ ऊट॥ उष्ट्रः क्रमेलको वक्रग्रीवः शाखाशनो मयुः॥ दिककुन्वोरभो दीर्घजंघो धूम्रो मरुप्रियः
॥८॥ उष्ट्रमांसं लघु स्वादु चक्षुष्यमनिलापहं॥ उष्णमर्शः प्रशमनं भेदः पित्तकफप्रदं॥ ९॥ अथ गदहा॥ गार्दभो रा
सभो भारवाही दूरगमः खरः॥ गार्दभं पिशितं बल्यं बृंहणं कफपित्तकृत॥ १०॥ कटुपाके लघु श्रेष्ठं तस्माद्वन्यखरो
द्भवं॥ अथ भैसा॥ महिषः सैरिभः शृंगी वाहवैरी घनाघनः॥ कासारो गवयो दंशी लुलापः कालवाहनः॥ ११॥ माहि
षं मधुरं मांसं स्निग्धोष्णं वातनाशनं॥ निद्रारेतो बलकरं दंतदार्ढ्यकरं गुरुः॥ १२॥ तद्वदारण्यकं विद्याद्विशेषाच्छो
षिरोगहितं॥ १३॥ अथ मरछ०॥ ऋक्षोऽच्छभल्लो भल्लूकः खरकीरबद्रुश्चगंडकाः॥ ऋक्षः स्निग्धो गुरुर्वृष्यो स्वादुष्णः पव

नापहः ॥ १४ ॥ गंडको वद्धविण्मूत्रः पवित्रो निलनाशनः ॥ अथ सिंहसार्दूलनाम ॥ सिंहः पंचाननो दृप्तो मृगेन्द्रः केश-
रीहरिः ॥ सार्दूलस्यात्तेचवैरेवो मृगनाथः सलवजः ॥ १५ ॥ सिंहसार्दूलयोर्मांसं मधुरं वातनाशि रोगजित् ॥ १६ ॥ अथ व्या-
घ्रं ॥ व्याघ्रो मृगारिर्मृगहा व्यालो भीमपराक्रमः ॥ अथ चीता ॥ चित्रको वेगवी श्वित्री द्वीपिस्यात्तीक्ष्णदंष्ट्र-
कः ॥ १७ ॥ अथ वीगा ॥ वृक ईहामृगः कोकस्तरक्षस्तु मृगादनः ॥ अथ कूकरः ॥ कुकुरः स्तनरवः श्वास्यात्कौले-
यः स्तनकः स्तनः ॥ सारमेयकृतज्ञश्च भीषणो मृगदंशकः ॥ १८ ॥ व्याघ्राश्चित्रसरक्षश्च वृकाणां पललं गुरु ॥ उष्णं
वातापहं श्वर्य्ये हितमक्षिविकारिणः ॥ १९ ॥ अथ सूकर ॥ सूकरो रोमसः पोत्री कोलो घोणी किरिः किटिः ॥ दं-
ष्ट्री क्रोडस्तब्धरोमभूदाराश्च वराहकः ॥ २० ॥ सूकरं पिशितं स्वादु वल्यं वातापहं गुरु ॥ स्निग्धोष्णं शुक्रलं रुच्यं
हृद्यं स्थूल्यत्वदार्ढ्यकृत् ॥ २१ ॥ अथ छेरीमांस ॥ छागी गलस्तनी मेजा सर्वभक्षा स्तवजा स्तुभा ॥ वर्करस्छागल-
श्छागो वस्तोऽजस्छिलकः पशुः ॥ २२ ॥ छागमांसं गुरु स्निग्धं लघुपाकं त्रिदोषजित् ॥ अदाहिवृंहणो नातिशीतं पी-
नसनाशनं ॥ २३ ॥ देहधातुसमानत्वादनभिष्यंदि वृंहणं ॥ २४ ॥ अथ मेढा ॥ मेषमांसं गुरु स्निग्धं बल्यं पित्तकफा-
प्रदं ॥ अथ मेढा ॥ मेदपुच्छामिषं वृष्यं कफपित्तकरं गुरु ॥ २५ ॥ अथ हरिणा ॥ हरिणः स्ताम्रवर्णस्यात्कुरंगश्चा त

मेषो मेंढो मेढ्र मेढः उरभ्रउरणो विकः ऊर्णा
युरेडको वृष्णिर्मेदपुच्छस्तु दुंबुकः २५ २

॥श्रीगुरुः॥

॥प६॥

॥म.वि.नि.॥

लोचनः ॥ सारंगोजितयोनिश्चा वातायुश्चपलामृगः ॥ २६ ॥ एणाः कृष्णोपरः कृष्णः कुरंगः कृष्णसारकः ॥ एणमांस।
हिमं रूक्ष्यं ग्राही दोषत्रयापहं ॥ २७ ॥ बद्धसंवलदं पथ्यं लघु हृद्यं ज्वराश्रजित ॥ अथ वारासिंगा ॥ गोकर्णो विक
टःश्रृंगी विकृंगोन्यस्तु शंवरः ॥ गोकर्णशंवरौ शीतौ गुरू स्निग्धौ कफप्रदौ ॥ २८ ॥ रसे पाके च मधुरौ रक्तपित्तवि
नाशनौ ॥ २९ ॥ अथ रोझ ॥ ऋष्यो नीलांडको नीलो गवयश्च गवाकृदर्शनः ॥ गवयो मधुरो वृष्यो स्निग्धोष्णः कफपि
त्तलं ॥ ३० ॥ अथ कस्तूरीयमृग ॥ कस्तूरीहरिणोगंधी मंडनी मृगमातृका ॥ कस्तूरी हरिणः स्वादुः वद्धविट् दी
पनो लघुः ॥ ३१ ॥ मुंडिनी ज्वरकासाश्रक्षयकाश्वापहा हिमा ॥ अथ चीतालवेपाढ ॥ कृतमालो पर्णावरः पृषतो
विंदुचित्रकः ॥ वातप्रमी वातमृगश्चिक्काषः कोष्णपुच्छकः ॥ ३२ ॥ कृतमालादिजं मांसं मधुरं ग्राहि दीपनं ॥ रूक्ष्यं
शीतं लघु स्वादु ज्वरदोषत्रयास्रजित ॥ ३३ ॥ अथ हरिणाभेद ॥ हरिणस्ताम्रश्रृंगो न्यंकुर्वै रुवृषारकः ॥ हरो मां
संगुरु स्वादु वृष्यं पित्तानिलापहं ॥ ३४ ॥ न्यंकुः स्वादुर्लघुर्वल्यो वृष्यो दोषत्रयापहः ॥ ३५ ॥ अथ खरहा ॥ ससः शूली
रोमकर्णो लंवकर्णो विशेषतः ॥ ससः शीतो लघुः स्वादु ग्राही पथ्योग्निदीपनः ॥ ३६ ॥ संनिपातज्वरश्वासरक्तपित्त
कफापहः ॥ अथ शाशा ॥ सल्लकः सल्लकीश्वाविच्छ्वेधा स्याच्छल्यलिनी खरा ॥ सल्लकः श्वासकासास्रशोषदोषत्र।

॥रामः॥

॥प६॥

सृगालो जंबुकः फेरुर्गोमायुः फेरवं शिवः शिवेशो वंचकः क्रोष्टा लोपकः
खल्वजंबुकः ५

यापहः ॥३७॥ सिधा तथैव विज्ञेया विशेषाद्बलवर्द्धिनी ॥३८॥ अथ विलाई ॥ विडालश्चोतुर्मार्जारो वृषदंशकआखुभ
क् ॥ नकुलः पिंगलोवभ्रुः सर्पारिः सर्पभक्षकः ॥३९॥ मार्जारो मधुरः स्निग्धो वीर्योष्णः कफवातजित् ॥ कशनाश्वास ।
कासघ्नो नकुलो पित्तसमो गुरुः ॥४०॥ अथ वंदेर ॥ कस्तूरीविलाव ॥ ग्राम्यो वन्यस्तोयजातः पक्षिमार्जारविज्ञकाः
सुगंधिवृषणाश्चेति मार्जाराः षट् प्रकीर्तिताः ॥४१॥ वानरो मर्कटः कीशो वनौकाश्च वली मुखः ॥ हरिः शाखामृगः शा
वीप्लवंगः प्लवगः कपिः ॥४२॥ वानरः पवनश्वाससमेदपांडुक्रमीञ्जयेत् ॥ अथ स्याल ॥ शृगालो बलदो वृष्यः सर्ववा
तक्षयापहः ॥४३॥ अथ मूसा ॥ मूषकः खनकः स्तेयी वृषउंदुरुराखुकः ॥ मूषको वद्धविण्मत्रो बल्यो वृष्यो नि
लापहः ॥४४॥ इति चतुष्पदमांसगुणाः ॥ अथ पक्षीनाम ॥ पक्षी विहंगमः पत्री शकुनिर्विहगः खगः ॥ अंडजो वि
पत्ररथः पतत्री शकुनिर्द्विजः ॥४५॥ अथ तीतिर ॥ तित्तिरिश्चित्रपक्षस्यात्कस्तोगोरः कपिंजलः ॥ तित्तिरिर्वर्णदो दी
प्तो हिक्काहो षत्रयापहः ॥४६॥ श्वासकासहरः पथ्यस्तस्मात्क्रोडोऽधिको गुरुः ॥ अथ बटेर ॥ वर्तीरो वर्तिकश्चित्र
स्ततोल्पा वर्तिकामता ॥ वर्तीरोऽग्निकरः शीतो ज्वरदोषत्रयापहः ॥४७॥ अथ लाव ॥ लावश्चित्रश्चित्रतनुः सचधु
धीमतो बुधैः ॥ पांशुलः श्लेष्मलस्तेषां वीर्योष्णोनिलनाशनः ॥४८॥ गौरिकः कफवातघ्नो रूक्षो वह्निप्रदः परं ॥ पौंड्रकः

पांशुलो गैरिको न्यस्तु पौंड्रको दर्भरस्तथा लावाह्वयाहि माः स्निग्धा ग्राहिहरणो वह्निदीपनाः १

गवरा

पित्तलः किंचिल्लघुः श्लेष्मानिलापहः ॥४९॥ दर्भरो रक्तपित्तघ्नो हृद्यो मधुरो हिमः ॥ अथ चिराः ॥ चटकः कलविंकः स्यादन्यो
ग्राम्यस्तु पुंड्रकः ॥ चटकः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः ॥५०॥ संनिपातहरो वेश्मचटकः शुक्रलः परं ॥५१॥ अथ
वटेरः ॥ वर्तिको मधुरः शीतो सरः कफपित्तनुत् ॥५२॥ अथ पारेवा पडुकी ॥ पारावतः कलरवो मंजुघोषो मदोत्कटः ॥ कपोतो
धूम्रस्तथान्यः कारा कपोतकः ॥५२॥ पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः ॥ संग्राही शुक्रलः शीतः कपोतोऽ
पि समो मुना ॥५३॥ किंचिल्लघुः परं कारा कपोतः सर्वदोषकृत् ॥ अथ मोरः ॥ मयूरश्चंद्रकी केकी मेघरावो भुजंगभुक्
शिखी शिखावलो बर्हि शिखंडी नीलकंठकः ॥५४॥ शुक्लापांगः कलापी च मेघनादोऽनुलास्यपि ॥ मयूरो रेहराः श्रोत्र
शिरोरुग्वातशोषजित् ॥५५॥ उल्लोवल्लायुर्मेधाग्निकेशदृक्स्वरवर्णदः ॥ सेव्यं मयूरजं मांसं हेमंते शिशिरे मधौ ॥५६॥
न शरद्ग्रीष्मयोः पथ्यं वर्षास्वप्यहिभक्षणात् ॥५७॥ अथ मुरगा ॥ कुक्कुटो विष्किरः प्रोक्तः कालज्ञश्चरणायुधः ॥ कृ
कवाकुस्ताम्रचूडः स्यादन्योरण्यकुक्कुटः ॥५८॥ कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलजिद्गुरुः ॥ चक्षुष्यः शुक्र
कफकृद्वन्यो रूक्षः कषायकः ॥५९॥ पानीयकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः ॥ अथ शुकमैना ॥ शुको र
क्तमुखः कीरो वाग्मी सुंदरदर्शनः ॥ सारिका रसिका दूती सुमतिः प्रियवादिनी ॥६०॥ शुकः शीतो लघुर्ग्राही क्षतकास

अथ गिद्ध नाम गृध्रः सुदृष्टिः शकुनी वक्रचंचुश्च दूरदृक् गृध्र
स्य काकवन्मांसं विशेषान्नेत्ररोगजित् ५

क्षयापहः॥ हंसस्तद्वन्मता सारी स्निग्धा बुद्धिबलाग्निकृत्॥६१॥ अथ कोइल॰॥ कोकिलः कलकंठः स्यात्परपुष्टो वन
प्रियः॥ पिकः परभृतो हारीतास्त्वाक्षो मधुदूतकः॥६२॥ कोकिलो दीपनो ग्राही चक्षुष्यः क्षयकासजित्॥६३॥ अथ ।
काक॰॥ काको ध्वांक्षो गरुडकामी बलिपुष्टः सकृत्प्रजः॥ वायसो बलिभुक्काणः क्रूरदृक्करटो द्विजः॥६४॥ अथ गिद्ध॰
भासः शिखी वान्भासंतो गृध्रा दूरजः स्मृतः॥ अथ गृध्रभेद काकभासनाम॰॥ काकभासभवं मांसं चक्षुष्यं दीप
नं लघु॥ आयुष्यं बृंहणं बल्यं क्षतदोषक्षयापहं॥ अथ हंस॰॥ हंसः श्वेतगरुन्मानसौकाः रक्तैः पदाननैः॥ राजहंसः स्मृतः
कृष्णैर्धार्त्तराष्ट्रोऽथ मल्लिकः॥६६॥ मलिनैः कलहंसस्तु पीतैः कादंब उच्यते॥ कारंडवः प्लवो मद्गुर्वरटा हंसयोषितः॥६७॥ हं
सः स्निग्धो गुरुर्वृष्यो वीर्योष्णः स्वरवर्णकृत्॥ वातास्रपित्तशमनो बृंहणो बलवह्निदः॥६८॥ अथ चकवा॰॥ सारसो ।
लक्ष्मणो रक्तमूर्धा स्यात्पुष्करास्त्वयः॥ चक्रवाकः पत्ररथश्चक्रश्चक्रीसकामकः॥६९॥ रथांगनामा काकोयवंकः
स्याद्द्वोहपक्षकः॥७०॥ अथ बगुला॰॥ बको बकोटो धवलो बलाका बिसकंठिका॥ अथ चारि॰॥ आरिः शारिरि
निश्चैवे चित्राजलचारिणी॥७१॥ अथ चक्रादिमांसगुणाः॥ चक्रकंकबकोथारिमांसं स्निग्धं हिमं गुरु॥ मधुरं सृष्टा
विरम्मूत्रं वातपित्तास्रनाशनं॥७२॥ (गिरगिट) ककर॰॥ करेटुकः कर्करेटुः ककरः कर करस्तथा॥ ककरो बृंहणो बल्यो वातपि

खंजन नीलकंठ

न्नहरो लघुः॥७३॥ अथ सँकरफोरा॥ कैंसा॥ खंजरीटः खंजनकश्चापना माकिकीदिदिकः॥ अथ पपीहा॥ चातकस्तु घना
गकः सारंगस्तोककोंभ्रमा॥७४॥ अथ भरदुवा॥ भरद्वाजः कंकारारोब्या आरोहिः कुदिः परः॥ खंजरीटादिमांसगुणाः॥
खंजरीटश्चटकवच्चारवः श्लेष्मानिलापहः॥ चातकोनिलपित्तघ्नो भरद्वाजः कफास्रजित्॥७५॥ सिकराचिल्ह॥ श्येनः
शशादनः पत्री श्विरिश्चिश्चिश्चिरिश्चिका॥७६॥ श्येनचिल्हिमवं मांसं प्रायो दोषकरं गुरुः॥ अथ [illegible] वा॥ उल्लू, काठ
कौशिकः काकवैरी घूको निशाचरः॥ उलूकपललं भ्रांतिकरं वातप्रकोपनं॥७७॥ अथ चकोर॥ चकोरश्चंद्रिकापायी
जीवंजीवः सलोचनः॥ चकोरो वंहणो बल्यः स्निग्धो श्लोवातनाशनः॥७८॥ अथ क्रौंच कुरर पेचक॥ रटा टीहरी॥ कु।
क्रौंचः पेचकोन्यस्तु पुच्छाधोभागलोहितः॥ क्रौंचः कुररो थान्यः स्यात्कोयष्टिष्टिट्टिभस्तथा॥७९॥ क्रौंचः पित्तानिलहरः
पेचकः कफवातजित्॥ कुररः क्रौंचवद्वेयष्टिट्टिभो ल्यमहत्करः॥८०॥ अथ मत्स्य॥ मत्स्यो झषस्तिमिर्मीनः कंठे
वैसारिणोंडजः॥ पृथुरोमाभिसारः स्याद्विसारः शकुलीनथा॥८१॥ रक्तोद्रोरक्तमुखो रोहितो मत्स्यपुंगवः॥ सहस्र
दंष्ट्रः पाठीनः कृष्णवर्णो महाशिराः॥८२॥ शफरः क्षुद्रमत्स्यः स्यात्प्रोष्ठी तु शफरी स्मृता॥ जलमीनश्चिलिचि।
मस्तिमिः ख्यातः समुद्रजः॥८३॥ मत्स्या बल्यप्रदा वृष्या गुरवः कफपित्तलाः॥ उष्णामिषं दिनः स्निग्धा वृंहणाः प

वनापहाः॥८४॥ अथ सामान्यमत्स्यगुणाः॥ नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः॥ कौप्या वृष्याः कफाष्ठीला
मूत्रकृच्छ्रविबंधदाः॥८५॥ ताडागा गुरवो वृष्याः शीतला बलमूत्रदाः॥ ताडाकवन्हिभिर्भरजावल्गायुर्मतिदक्षणाः॥८६॥
सरोजा मधुराः स्निग्धा बल्या वातनिवर्हणाः॥ समुद्रा गुरवो नातिपित्तलाः पक्वनापहाः॥८७॥ तत्रापि लवणाम्भोजार्ग्य
हितो दृष्टिनाशनाः॥ ह्रदोद्भवा बलकरा तनुस्वच्छजलोद्भवाः॥८८॥ हिमंते कूपजा मत्स्याः शिशिरे सारसा हिताः॥ मधुग्री
ष्मांबुकालेषु नदीचौऽप्नगगजाः॥८९॥ शरत्सु नैर्भराः सर्वे वर्षोत्थाः सर्वदोषजाः॥ अथ रोहू॥ रोहितः प्रवरस्तेषु ना
तिपित्तकरो लघुः॥९०॥ कषायानुरसो बल्यः पाठीनः श्लेष्मलो गुरुः॥९१॥ अथ क्षुद्रमत्स्य॥ क्षुद्रमत्स्याः स्वादुर
सा दोषत्रयनिवर्हणाः॥ सूक्ष्माः परं पुंस्त्वहरा रुच्याः कासानिलापहाः॥९२॥ त्रिदोषघ्नः चिलिचिमिस्तिमिर्बल्यः परं
मतः॥ मत्स्यगर्भः परं वृष्यः स्निग्धः स्थौल्यकरो गुरुः॥९३॥ कफमेदः प्र[illegible]दो बल्यो ग्लानिहृन्मेहनाशनः॥ अथ सु
डसिमगरः॥ शिशुमारो दृढो बल्यो मकरस्त्वसिदंष्ट्रकाः॥ शिशुमारो गुरुर्वृष्यो कफकृद्वातनाशनः॥९४॥ बृंहणो
बलदः स्निग्धस्तद्वन्मकरमादिशेत्॥९५॥ अथ कछुवा॥ कच्छपो गूढपात्कूर्मः कमठो दृढपृष्ठकः॥ कच्छपो बल
दः स्निग्धो वातजित्पुंस्त्वकारकः॥९६॥ अथ मेडुक॥ मंडूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः॥ मंडूकः श्लेष्मलो ना

निपित्तलो बलकारकः ॥९७॥ अथ केकडा ॥ कर्कटः कुरविस्त्रः स्यात्कुलीरः षोडशांघ्रिकः ॥ कर्कटो बृंहणो बल्यः शीतलो
सरुदापहः ॥९८॥ अथ सर्पः ॥ सर्पो भुजंगो भुजगः फणी भोगी भुजंगमः ॥ कुंडली कंचुकी चापि पन्नगः पवनाशनः ॥
९९ ॥ गूढपादुरगो नागो जिह्मगश्च सरीसृपः ॥ चक्षुःश्रवा दीर्घपृष्ठो व्यालश्चाशीविषस्त्वहिः ॥१००॥ दर्वीकरो विष
धरो दंदशूको बिलेशयः ॥ कुंभीनसः फणाकृच्च दंष्ट्रीकाकोदरो विषी ॥१०१॥ डुंडुभो राजिलः प्रोक्तो जगरो वाहसुः
धिशुः ॥ जलसर्पोऽलगर्दः स्यात्त्रिलिंगो गोनसः स्मृतः ॥१०२॥ अथैषां मांसगुणाः ॥ सर्पाणां स्नेहनं मांसं चक्षुष्यं बृं
हणं गुरुः ॥ दूषीविषघ्नं कृमिहरं मेधाग्निबलवर्धनं ॥१०३॥ अथ गोहः ॥ गोधा घोरकरा पंचनखरा जजनिस्तथा
क्रूलसर्पेरा गोधेयो गोधेरः समहाविषः ॥१०४॥ गोधाग्निजननी बल्या वृष्या पित्तानिलापहा ॥ अथ सद्योहत
मांसगुणाः ॥ सद्योहतं भजेन्मांसं व्याधिवारिविषामृतं ॥ वयस्थमकृशं सात्म्यमन्यथा परिवर्जयेत् ॥१०५॥ अथ वृद्ध
बालमांसं ॥ वृद्धानां दोषलं मांसं बालानां बलदं गुरुः ॥१०६॥ अथ मृतगर्भागर्भगुणाः ॥ मृतगर्भा गुरुर्योषिद्गर्भो
गर्भवती तथा ॥ अथ स्वयंमृतमांसं ॥ स्वयंमृतमबल्यं स्यादतीसारकरं गुरुः ॥ विषांबुरुग्मृतं मृत्युदोषत्रयरु
जावहं ॥१०७॥ अथ खगाः ॥ विहंगे पुमान् श्रेष्ठः स्त्री चतुष्पदजातिषु ॥ पश्चार्धे लघु पुंसां स्यात्स्त्रीणां पूर्वार्धे

माक्षिशोत ॥१०८॥ तुल्यजातिस्वल्पदेहामहादेहेषु पूजिताः ॥ अल्पदेहेषु शस्यंते तथैव स्थूलदेहिनः ॥१०९॥ चेष्टावतां।
परं मांसमलसेभ्योल्लघु स्मृतं ॥ देहमध्यं गुरुप्रायः सर्वेषां प्राणिनामपि ॥११०॥ पक्षमोक्षेपाद्विहंगानां तदेव समनु
च्यते ॥ गुरूण्यंगानि सर्वेषां गलग्रीवं च पक्षिणां ॥१११॥ येमृगा विहगास्तोयदूरवासप्रचारकाः ॥ तेनभिष्यंदिनः स
र्वेविपरीता अतोन्यथा ॥११२॥ जलानूपभवाः सर्वे जलानूपचराश्चये ॥ गुरुभक्षागुरुतरं तेषां मांसमुदीरितं ॥११३॥ वन्यो
त्यन्तिप्रचाराणां लघु स्याल्लघुभक्षिणां ॥ उरः स्कंधोदरं मूर्धापादौ पाणी कटी तथा ॥११४॥ पृष्ठत्वग्यकृदंत्राणि गुरूणि ह
यथोत्तरं ॥ योराज्ञां मुकुटतिलकः कादारमल्लस्तेन श्रीमदनन्रपेणानिर्मितेत्र ॥ ग्रंथेस्मिन्मदनविनोदनाम्नि पूर्णो
श्चित्रो यं ललितपदैश्च मांसवर्गः ॥११५॥ ॰॥ इति मदनपालविरचिते मदनविनोदनिघंटौ मांसवर्गो द्वा
दशः ॥ ॰॥ प ॥ गोपालबालैः सह मंत्रविद्याविनोदवंतं धृतकाकपक्षं ॥ उपास्महे वाङ्मनसातिदूरमहं परं नील
मचिंत्यलीलं ॥१॥ अथानुपानादि ॥ वातेनुपानं स्निग्धोष्णं रूक्षोष्णं श्लेष्मणि स्मृतं ॥ पित्ते स्निग्धहिमं स्नेहं पा
नेतोयमशीतलं ॥२॥ भल्लातकस्नेहमूर्छाव्यापन्नानां शीतलं जलं ॥ शालिमुद्गादिभक्ष्याणां पूषो मांसरसोथवा ॥३॥
माषादिभोजने मस्तु धान्याम्लं दधिवा स्मृतं ॥ मद्यं शोकविषार्तानां मत्स्याग्नीनां च शस्यते ॥४॥ क्लांतानामुपवास

दक्षिणे सुखमाप्नोति वामशायी हरेद्रुजः ९

स्त्रीमाराध्यमरुदादिभिः॥ पयः सुधासमं प्रोक्तं क्षीराणां नीरकं पित्तिनां॥ ५॥ असात्म्यं दोषलं शीतमतिमात्रमथो गुरुः॥ उष्णा
उपानतो भुक्तं सुखमन्नं प्रजीर्यते॥ ६॥ तदरोकर्षयेति तं स्थापयेन्मध्यसेवितं॥ पश्चात्पीतं तं क्वं हयंति तत्समीक्ष्य प्रयोजये
त्॥ ७॥ न पिबेत्स्वासकासार्तो जंतुरोगक्षतादिषु॥ पीत्वा तिष्ठापाध्ययनं निद्रां न त्वरया भजेत्॥ ८॥ नक्तं कफानिलपित्तघ्नं चे
कद्वित्रिपलोन्मितं॥ वारिणाश्वाशु पक्काले दृष्टिकारि रसायनं॥ ९॥ वलीपलितवैस्वर्यं पीनसस्वासशोषजित्॥ पा
नीयप्रसृतीरष्टौ यः पिबेदरुणोदये॥ स जराव्याधिनिर्मुक्तो जीवेद्वर्षशतं सुखी॥ मुक्तोपविशतस्थौल्यं बलमुत्ता
नशायिनः॥ ११॥ आयुर्वामकटिस्थस्य मृत्युर्धावति धावतः॥ रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा॥ १२॥ निद्रा
काले कृता दृष्टिबलोत्साहहानिलप्रदा॥ धातुसाम्यावहा क्षीणश्रान्तानां शस्यते सदा॥ १३॥ निद्रासात्मी कृता ये तु रात्रौ
वा यदि वा दिवा॥ न तेषां स्वपतां दोषो जाग्रतां चोपजायते॥ १४॥ भोजनानंतरं निद्रा वातश्लीकफपुष्टिकृत्॥ कफमे
दो विषार्तानां रात्रौ जागरणं हितं॥ १५॥ दिवास्वप्नश्च तृट्छर्दि हिक्काजीर्णातिसारिणां॥ दंतधावनमुद्दिष्टमास्य
वैमल्यकारकं॥ १६॥ प्रसेकारुचिदौर्गंध्यमलपित्तकफापहं॥ मदात्ययः श्रमः श्वासो दंतनात्येष्ठरोगवान्॥ १७॥ हिक्काछ
र्दिशिरःपीडामूर्छा शोषी न तच्चरेत्॥ मुखप्रक्षालनं शीतपयसा रक्तपित्तजित्॥ १८॥ मुखस्य पिटिकाशोषनीलिकाव्यंग

नाशनं ॥ पादप्रक्षालनं दृष्टिकरं वृष्यं श्रमापहं ॥ १९ ॥ पादाभ्यंगः परं वृष्यो बलोत्साहविवर्द्धनः ॥ निद्रासुखकरः सुप्तीश्र
मनेत्ररुगापहः ॥ २० ॥ स्नेहगंडूषकरणं मुखशोषद्विजामयान् ॥ स्वरघातोष्ठपारुष्यरक्तपित्ताग्निनाशयेत् ॥ २१ ॥ सुखो
ष्णोदकगंडूषकफारुचिमलापहः ॥ विषमूर्छामदार्तानां शोषिणां रक्तपित्तिनां ॥ २२ ॥ कुपितानांक्षिमलक्षीणरुक्षाणां
न च शस्यते ॥ अंजनं नेत्रनैर्मल्यं दृष्टिकारि रुजापहं ॥ २३ ॥ रात्रिजागरितः श्रांतः छर्दितो भुक्तवांस्तथा ॥ ज्वरातुरः शि
रःस्नातः कदाचिन्नांजनमाचरेत् ॥ २४ ॥ व्यायामः कर्मसामर्थ्यं स्थैर्यं दोषक्षयाग्निकृत् ॥ स सेव्यो गुणमाधत्ते बलिनां स्नि
ग्धभोजिनां ॥ २५ ॥ व्यायामदृढगात्रस्य व्याधिर्नास्ति कदाचन ॥ विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं च पच्यते ॥ २६ ॥ भवंति
शीघ्रं नैतस्य वलीशैथिल्यता जराः ॥ वसंते शीतसमये स्वल्परो समनोहितः ॥ २७ ॥ अन्यदापि स कर्त्तव्यः शतार्थे
नवलावलं ॥ तनुं समीक्ष्य च स्वेदं कंठग्रीवाललाटयोः ॥ २८ ॥ भुक्तवान् कृतसंभोगः कासी श्वासी क्षयी कृशः
रक्तपित्ती क्षती शोषी न तं कुर्यात् द्विचक्षराः ॥ २९ ॥ अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ॥ मर्दनं श्रमवा
तघ्नं निद्रापुष्टिबलप्रदं ॥ ३० ॥ केशश्मश्रुनखानां च कर्त्तनं शुचि रूपकृत ॥ केशप्रसाधनी केश्या रजोजंतुमला
पहा ॥ ३१ ॥ अभ्यंगो वातरोगघ्नो धातुसाम्यं बलं सुखं ॥ निद्रावर्णमृदुत्वानि कुरुते दृष्टिपुष्टिकृत् ॥ ३२ ॥ शिरोभ्यं

॥श्रीगुरुः॥

॥६४॥

॥म॰वि॰नि॰॥

गः शिरस्त्वक्केशदार्ढ्यप्रसादपुष्टिदः॥ उच्चैःश्रवणबाधिर्यमलमन्याहनुग्रहान्॥३३॥ कर्णपिकर्णरोगांश्च कुरुते कर्णपूरणं॥ सिक्तस्याद्रियथा मूलेनरूणां पल्लवादयः॥३४॥ वर्धंते हि तथा नृणां स्नेहसिक्तस्य धातवः॥ स्नेहावगाहनं वातशमनं धातुपुष्टिदं॥३५॥ मात्राभिस्तिस्रश्चतुःपंचषट्सप्ताष्टभिराव्रजेत्॥ रसासृङ्मांसमेदोस्थिमज्जाधातून्यथाक्रमं॥३६॥ वांतोनवज्वराजीर्णीविरिक्तः केवलामरुक्॥ निरूढोऽनर्परोगी यश्च स्नेहाभ्यंगादि वर्जयेत्॥३७॥ उद्वर्तनं वातहरं भ्राजकानलदीपनं॥ गात्रस्थिरत्वमासादमृदुत्वं कफनाशनं॥३८॥ स्नानं वातश्रमालक्ष्मीपापकंडूमलापहं॥ हृद्यं कामकरं वह्निसर्वेंद्रियविवर्धनं॥३९॥ न तदुष्णेन शिरसो योज्यं नेत्राहितं यतः॥ कफवातप्रकोपे तु भेषजार्थे तदाचरेत्॥४०॥ न चातिसारज्वरितकर्णशूलानिलार्तिषु॥ आध्मानारोचकाजीर्णीभुक्तवत्सु च गर्हितं॥४१॥ अनुलेपात्तृषामूर्छादौर्गंध्यश्रमदाहजित्॥ सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः॥४२॥ कुसुमांबररत्नादिधारणं कांतिकारकं॥ पापरक्षोग्रहहरं कामौजःश्रीविवर्धनं॥४३॥ उपानद्धारणं नेत्र्यमायुष्यं पादरोगजित्॥ उष्णीषं शुचिदं केश्यं रजोवातातपापहं॥४४॥ छत्रधारणमोजस्यं चक्षुष्यं हिमघर्मजित्॥ बालव्यजनमोजस्यं मक्षिकादिनिवारणं॥४५॥ व्यजनस्यानिलः शोषमूर्छास्वेदश्रमापहः॥ यष्टिधारणमुत्साहस्थैर्यविष्टंभवीर्यकृत्॥४६॥ रक्षःस

॥रामः॥

यष्टिधारणमुद्दिष्टं गंगउदकमीक्षयेत्॥

पीडिभयजिद्धिशोषात्स्थविरेहितं॥ आस्यस्थैर्यत्वचिरलेष्मसौकुमार्यंसुखप्रदं॥४७॥ यत्तुचंक्रमणंनातिदेहपीडाकरंभवे
त्॥ तदायुर्बलमेधाग्निप्रदमिंद्रियबोधनं॥४८॥ सुखशय्यासनंनिद्रापुष्टींद्रियबलप्रदं॥ आतपःस्वेदमूर्छास्तृट्श्रमास
हद्भ्रमश्रमान्॥४९॥ कुरुतेपित्तवैवर्ण्यस्वेदंछायात्वपोहति॥ अग्निःशीतानिलस्तंभकफवेपथुनाशनः॥५०॥ रक्त
पित्तप्रदूषीस्याद्दामाभिष्यंदपाचनः॥ धूमःपित्तानिलौकुर्याद्दवश्यायःकफानिलौ॥ ज्योत्स्नाशीतास्मरानंदप्रदातृड्
पित्तदाहजित्॥ तमोभयावहंमोहकफपित्तक्रमप्रदं॥५१॥ वृष्टिर्व्यथाहिमानिद्राभिष्यंदालस्यकारिणी॥ प्रवातंरौक्ष्य
वैवर्ण्यस्तंभकृद्दाहपित्तनुत्॥५२॥ स्वेदमूर्छापिपासाघ्नमप्रवातमतोन्यथा॥ सुखंवातंप्रसेवेतग्रीष्मेशरदिचांतरा॥
५३॥ निर्वातमायुषेसेव्यमारोग्यायचसर्वदा॥ सद्योमांसंनवंचान्नंबालास्त्रीक्षीरभोजनं॥ घृतमुष्णोदकस्नानं
सद्यःप्राणकराणिषट्॥५४॥ पूतिमांसंस्त्रियोवृद्धाबालार्कस्तरुणंदधि॥ प्रभातेमैथुनंनिद्रासद्यःप्राणहराणि
षट्॥५५॥ अन्नाद्दशगुणंपिष्टंपिष्टाद्दशगुणंपयः॥ पयसोदशगुणंमांसंमांसाद्दशगुणंघृतं॥ घृताद्दशगुणंतैल
मभ्यंगेनतुभोजने॥ लंघनंकफमेहाध्मानामज्वरहरंलघुः॥५६॥ पाचनंदीपनंवातकरंस्रस्तातिसारजित्॥ त
न्नयुक्तंनरेबालेगर्भिण्यांस्थविरेकृशे॥५७॥ शोककामभयक्रोधमार्गश्रमचिरज्वरे॥ एवंवानिलोगुरुःस्वादुः

विग्रही वातलः श्रांतकफशोषवतां हितः दक्षिणः पवनः स्वादुरक्तपित्तहरो लघुः॥ श्र १

स्निग्धः पित्तास्रवर्द्धनः ॥६२॥ रोगकृद्विषजुष्टानां स्वतन्त्रगणवलासिनां ॥ विदाहप्रदो वल्यश्चक्षुष्यो न च वातलः ॥ पा
श्चिमः पवनो रूक्षस्तीक्ष्णः स्नेहवलापहा ॥ विशदः शोषणो नृणां कफमेदोहरो लघुः ॥ ॥ उत्तरो मारुतः शीतः
स्निग्धो दोषप्रकोपजित् ॥ क्लेदनः प्रकृतिस्थानां वलदो मधुरो मृदुः ॥६३॥ क्षयक्षीणविषार्त्तानां विशेषाद्गुण
कारकः ॥ रसो मधुरकः शीतो धातुस्तन्यवलप्रदः ॥६४॥ चक्षुष्यो वातपित्तघ्नः कुर्यात्स्थौल्यं कफं कृमीन् ॥ सो
तियुक्तो ज्वरश्वासगलगण्डार्बुदादिकृत् ॥६५॥ रसोऽम्लः पाचनो रुच्यः पित्तश्लेष्मकरो लघुः ॥ लेखनोष्णो वहिः शी
तः क्लेदनः पवनापहः ॥६६॥ सोतियुक्तः परं दाहरक्तपित्तादिरोगकृत् ॥ लवणः शोधनो रुच्यः पाचनः कफपित्तदः ॥६७
पुंस्त्ववातहरः कायशैथिल्यमृदुताकरः ॥ सोतियुक्तोक्षिपाकास्रपित्तकोष्ठादितापकृत् ॥६८॥ कटुकः पित्तलः
श्लेष्मकृमिकण्डूविषापहः ॥ आग्नेयो वातलस्तन्यमेदस्थौल्यहरो लघुः ॥६९॥ सोतियुक्तो भ्रमक्लैब्यतालुशोष
तिदाहदः ॥ तिक्तः शीतस्तृषामूर्छाज्वरपित्तकफाञ्जयेत् ॥७०॥ वातलोग्निकरस्तन्यशोधनः शोषणो लघुः ॥
सोतियुक्तः शिरःशूलमन्यास्तंभभ्रमादिकृत् ॥७१॥ कषायो रोपणो ग्राही शोषणो वातकोपनः ॥ सोतियुक्तो
ग्रहाध्मानहृत्पीडाक्षेपकादिकृत् ॥७२॥ प्रसन्नदृष्टिर्दृढदंतकेशः शशांकवक्त्रः पलितैर्विहीनः ॥ पिकाभकं

ऽःकमल्लास्यगंधोनस्योपसेवीभवतीहमर्त्यः॥७३॥कासोपलेपस्वरभेदनिद्रातंद्रास्यदौर्गंध्यविषोपसर्गाः
कफप्रसेकग्रहणीप्रदोषाभवंतिजंतोर्वमिनोनन्नूनं॥७४॥बुद्धेःप्रसादंबलमिंद्रियाणांधातुस्थिरत्वं
ज्वलनातिदीप्तिं॥चिराच्चपाकंवयसःकरोतिविरेचनंसम्यगुपास्यमानं॥७५॥वस्तिर्वातेचपित्तेचकफेर
क्तेचशस्यते॥संसर्गेसंनिपातेचवस्तिरेवहितःसदा॥७६॥मूलेनिषिक्तोहियथाद्रुमःस्यान्नीलच्छदःकोमल
पल्लवाग्रः॥कालेमहत्पुष्पफलप्रदश्चतथानरःस्यादनुवासनेन॥७७॥त्वग्दोषाग्रंथयःशोफारोगाःशो
णितसंभवाः॥रक्तमोक्षणशीलानांनभवंतिकदाचन॥७८॥संघर्षात्कुपिताभवंतिहिमरुत्तावर्षासुवाता
दयःक्लिन्नत्वाद्वपुषोनलेन्नशमनेरेवैद्येनदेयंततः॥अन्नंदीपनपाचनंवलमलघ्नंदोषपलोमार्दवंहसन्न
तिकषायतिक्तकटुकैःस्निग्धंचकिंचिद्रसैः॥७९॥दिव्यंचोष्णमथांबुनप्रशिशिरंसक्षौद्रमल्पंपिबेद्धद्धे।
त्योषधयोतिदाहमधिकंतारुण्ययोगात्तदा॥व्यायामार्कमरीचिमैथुनसुखावश्यायवर्जीततोभ्यंगोप्या
खुस्नुजेगदंशमशकैर्वर्ज्येशयीतालये॥८०॥शीतेनत्वृतरक्षिवातरहितेसांगारधानेगृहेनिर्वातेक्षिति।
पःशयीतमधुरंकिंचिच्चपीत्वासवं॥काश्मीरागरुलेपभूषिततनुर्वालांगनाभिःस्वपेद्युक्तःशीतजलावगा

हुनरतिंस्वापंदिवाचत्यजेत॥२१॥सेव्याःस्वादुकषायतिक्तविशदावर्षान्ययेजांगलाद्राक्षाक्षीरसितेक्षुशालिम
धुरागोधूममुद्गादयः॥नैर्मल्यादखिलंजलेलघुतरंवानास्त्रजश्चंदनंसेवेरिंदुकरान्प्रदोषसमयेगाहेत
साअंसरः॥२२॥वर्षासूपचितंविरेकविधिनापित्तंहरेद्बुद्धिमान्युक्त्यारक्तविमोक्षणेनहविषस्तिक्तस्यपाने
स्तथा॥रात्रौजागरणंव्यवायमधिकंघर्मंतुषारंदधिक्षाराम्लोष्णविदाहितीक्ष्णकटुकंनिद्रांदिवाचत्य
जेत॥२३॥हेमंतेलवणाम्लतिक्तकटुकक्षारोत्करंबृंहणंसर्पिस्तैलसमेतमुष्णमशनंतीक्ष्णानिपाना
निच॥सेवेतागुरुभूषितस्तुशिशिरंगाहेततैलप्लुतःकौशेयास्तरणेशयीतशयनेसांगारधानेगृहे॥२४॥
श्यामांपीनपयोधरोरुजघनामाश्लिष्यधन्यांगनांवासल्लीकागुरुलेपभूषिततनुंधूपैर्वरैर्धूपितां॥का
मंमैथुनमत्रतर्पितवपुःसेवेतवल्यैरसैःकर्तव्यःशिशिरेप्ययमेवनितरांशीताधिकत्वाद्विधी॥२५॥तीक्ष्ण
क्षारकषायरूक्षकटुकंकोष्णंवसंतेशनंसन्मद्यंमधुमुद्गजांगल▪यवप्रायंहितंचाईवं॥व्यायामंविधि
नेचकोकिलकुलालापाकुलेकामिनींस्नानोद्वर्तनचंदनानिनृपतिःसेवेतरम्याःस्रजः॥२६॥हेमंतेनि
चितःप्रकुप्यतिकफोभानोःकरैरीरितस्तस्मात्तीक्ष्णशिरोविरेकवमनैर्गंडूषधूमादिभिः॥तत्प्राज्ञोविजये।

नविष्वजलरक्ताथैरथ्योष्णांशुभिः शीतस्निग्धगुरुद्रवाम्लमधुरं निद्रां दिवा च त्यजेत् ॥१७॥ ग्रीष्मे शीतगृहान्स
तां सिसरितो वापिर्वा मिस्रजोहारान्नशीतलतालवृन्तपवनान्सेवेत निद्रां दिवा ॥ वासोस्वच्छलघून्यनुल्लमधु
रं चान्नं ससर्पिर्द्रवं मंथ्यक्षीरस्तुपानकानि च सितादिग्धानि शीतान्यपि ॥१८॥ शुभ्रे हर्म्यतले मले च शाय
नेप्रत्यग्रपुष्पांचिते वा तैश्चंदनचंद्रचर्चिततनुः संस्पृश्यमानः सखैः ॥ व्यायामेपरिशोषि मैथुनरतिं मद्यं
तथोष्णान्नसान्त्राक्ष्ण्यान्परित्यजेन्मतिमतो वैद्यस्य वाक्ये रतः ॥१९॥ यो रात्रौ मुखव्यतिलकः कश्चारमस्त्रस्तेन
श्रीमदनन्तपेनेनिर्मिते ग्रन्थे ॥ ग्रन्थेस्मन्मदनविनोदनाम्नि पूर्णोश्चिन्नो यंस्वलितपरैश्च मिश्रवर्गः ॥ ॰ ॥ इ
ति श्रीमदनपालविरचिते मदनविनोदनिघंटौ मिश्रवर्गस्त्रयोदशः ॥ ॰ ॥

मदनविनोदसमाप्तः